# Śabdapramāṇa Vicāra



Dr. T.ARYADEVI

# ॥ शब्दप्रमाणविचारः ॥

डो. टी. आर्यदेवी

(Sanskrit)
SABDAPRAMANAVICARA

By
Dr. T. Aryadevi

Ist Edition 1997

Published by
Saparya Publications
24/421, Sankarayya Road
Thrissur 680 004

Printed at
Kairali Press, M. G Road
Thrissur.

Price: Rs. 300 (Library Edition)
Rs. 150 (Paper Back Edition)

# Sabdapramanavicara

Dr. T. Aryadevi

Publishers :

Saparya Publications

Thrissur

# ABOUT THIS BOOK

What differentiates a human being from other animals is his discriminative power originated through the acquired knowledge. It is true that animals also possess the power to acquire knowledge to a certain extent. But that is at a very lower level when Compared to that of man. This discriminative power in the one which has enabled him to conquer the whole world and bring others under his control. So it is obvious that knowledge is the root cause of the success of the human beings.

Man was aware of the importance of knowledge from time immemorial. He used to think about knowledge and analyse it. There were differences of opinion among the thinkers. Thus, gradually, different schools of thought sprung up. They are Samkhya, Yoga, Nyaya,– Vaisesika, Purvamimamsa, Uttaramimamsa and also carvaka, baudha and jaina etc. They discuss various things like the origin of the world, nature, origin and causes and types of knowledge etc. Through meditation and reflection, the ancient seers arrived at certain conclusions.

Nyaya–Vaisesika philosophy asserts the difference between जीवात्मा and परमात्मा। According to them, knowledge is a quality of the soul and the soul is the समवायिकारण of the knowledge. First they divide the knowledge into two as अनुभव and स्मृति। अनुभव is again divided into two as यथार्थ or real and अयथार्थ or unreal. यथार्थानुभव is divided into four kinds as 1) प्रत्यक्ष or Perception 2) अनुमिति or inference 3) उपमिति or comparison and 4) शाब्द or verbal testimony.

The knowledge called pratyaksa is originated through the contact of the sense organs with their objects. Anumiti is produced from paramarsa. Upamiti takes its origin from sadrsyajnana. Sabdabodha originates from sabda or pada. As the valid knowledge is of four kinds, the instruments of valid knowledge or pramanas are also four. They are pratyaksa, anumana, upamana and sabda.

Although all pramanas are equally important in view of acquiring knowledge, sabdapramana, though mentioned last, should be considered as the most important on account of its possessing contents largely. The famous poetician Dandin has extolled it thus-

'इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।।'

This whole universe may have become totally dark, if he light called word does not illumine till the end of the mundane existence.

The word or language is the medium of expression. By using words we express our ideas to others and by hearing words we realise others ideas.

Ancient Indian philosophers have studied completly the concept of sabda as a pramana The Word has the power to denote a meaning. This power is called sakti. According to mimamsakas this 'sakti' is another padartha or catagory but Naiyayikas consider it as samketa. Sometimes a secondary meaning is denoted by the word Here the word, by its power laksana denotes the secondary meaning. According to poeticians, another sabdavyapara viz. Vyanjana is also there by which the Suggested sense is realised.

The sentence-meaning is known to the hearer, when he remembers the meaning of words with the help of saktigraha. Apt words should be used (आकाङ्क्षित) and the words in a sentence should be used without pause in utterance (सन्निधि). The hearer (श्रोता) should understand the intention (तात्पर्यज्ञान) of the speaker and, there must be yogyata also in the meaning.

The study of the sabdapramana is very vast. The systems of philosophies like Mimamsa, Nyaya and vyakarana had dealt with this. Mimamsakas prefer bhavanamukhya vis'esyaka sabdabodha, Naiyayikas prathamanthartha mukhyavi-

sesyaka sabdabodha and vaiyakaranas dhatuarthamukhya visesyaka sabdabodha. Thus in the sentence चैत्रः तण्डुलं पचति, according to Mimamsakas, the meaning is 'चैत्रकर्तृका तण्डुलकर्मिका विक्लृत्तिफलका भावना', according to Naiyayikas – तण्डुलनिष्ठविक्लृत्यनुकूलव्यापारानुकूलकृतिमान् चैत्रः', and according to Vaiyakaranas. 'चैत्रकर्तृकः तण्डुलकर्मकः पाकः'.

The present work, sabdapramanavicara is a study on the concept of sabda. At first I have explained the means of valid knowledge in general and then the concept of sabda as a means of valid knowledge with special consideration. The theories of Abhihitanvaya and Anvitabhidhana also have been dealt with. Sakti, laksana and vyanjana which are the sabdavyaparas are discussed. The differences of opinion in the various systems of Indian philosophies like Mimamsa, Nyaya and vyakarana in the field of sabdabodha or verbal testimony is also presented here

There may be drawbacks and shortcomings in this book. I will be highly grateful if the drawbacks are pointed out. So that they may be eliminated in future.

At this juncture, I am indebted to Dr. M. S. Menon, who is my teacher and well wisher, who has inspired me to publish this book and has kindly written a preface to this book. I am also thankful to Dr. K. Kunjunni Raja the veteran sanskrit scholar of international fame who has kindly written an introduction to this book. I am also very grateful to the kairali press for their help in publishing this book. There are also persons deserving thanks, but I am afraid the mere mentioning of such names may be considered ungratefulness for words would be inadequate.

**T. Aryadevi**

sesyaka sabdabodha and vaiyakaranas dhatvarthamukhya Visesyaka sabdabodha. Thus in the sentence [illegible] according to Mimamsakas, the meaning is [illegible] according to Naiyyikas [illegible] and according to Vaiyakaranas. [illegible]

[illegible]

[illegible]

The present work, sabdapramanavicara is a study on the concept of sabda. At first I have explained the means of valid knowledge in general and then the concept of sabda as a means of valid knowledge with special consideration. The theories of Abhihitanvaya and Anvitabhidhana also have been dealt with. Sakti, laksana and vyanjana which are the sabdavyaparas are discussed. The differences of opinion in the various systems of Indian philosophies like Mimamsa, Nyaya and vyakarana in the field of sabdabodha or verbal testimony is also presented here.

There may be drawbacks and shortcomings in this book. I will be highly grateful if the drawbacks are pointed out. So that they may be eliminated in future.

At this juncture, I am indebted to Dr. M. S. Menon, who is my teacher and well wisher, who has inspired me to publish this book and has kindly written a preface to this book. I am also thankful to Dr. K. Kunjunni Raja the veteran sanskrit scholar of international fame who has kindly written an introduction to this book. I am also very grateful to the kairali press for their help in publishing this book. There are also persons deserving thanks, but I am afraid the mere mentioning of such names may be considered ungratefulness for words would be inadequate.

T. Aryadevi

# PREFACE

"The Concept of Sabda as a Pramana in Navyanyaya's is an original, authentic and deep study of the Concept of Sabdapramana or Verbal Testimony following the Siddhantas of the Navyanyaya system of Philosophy. In five chapters this text makes a survey of the Pramanas in general according to the different schools of thought in the Navyanyaya. The four Pramanas according to Nyaya are established, against the views of the other schools. The two main views on Sabdabodha ie; 'the Abhihitanvaya' and 'Anvitabhidhana' are critically presented and discussed in this work in detail. The Sabda Vrittis 'Lakshana' and 'Vyanjana' are defined and illustrated in a chapter. In another chapter the author explains the conditions of Vakyarthajnana and also the concepts of 'akanksha', 'Yogyata' and 'Sannidhi' according to different Schools of Philosophy. The main role of 'Tatparyajnana' is also discussed in detail in this text. One chapter is devoted to the discussion of 'Sabdabodha'. In this context the nature of 'Sakti' is explained clearly introducing the different views of the Vaiyakarans and the Naiyayikas A thorough and deep discussion on 'Lakshana' and 'Vyanjana' is presented in this context in the light of the views of the different Schools of thought.

The nature of the concepts 'Akanksha', 'Yogyata', and 'Sannidhi' as well as the conditions of 'Vakyarthajnana' according to the Naiyayikas, Vedantins, Bhattas and Prabhakaras have also been discussed in this treatise elaborately. Another Salient feature of this text is the discussion on 'Tatparyajnana' according to the different schools of Philosophy.

I appreciate this meritorious work which is a faithful approachment and thorough study of different Sastras-like

'Nyaya', 'Vyakarana' and 'Mimamsa'. The deep Knowledge of the author in the different Sastras, especially in Navyanyaya is highly appreciable. I am glad to introduce this work of Dr. Aryadevi which is rich and appreciable contribution to the field of Navyanyaya studies.

Dr. M. S. MENON
Retired Professor and
Head of the Department of
Sanskrit, University of Calicut

Calicut
4-1-1996

# INTRODUCTION

I have great pleasure in introducing this excellent Sanskrit work on *Sabdapramana* according to the Nyaya school; giving a lucid and faithful exposition of the various aspects of the Nyaya theory on Sabdapramana. It is a worthy successor of the *Sabdatarangini* by the late Veppathur Subrahmanya Sastri. Dr. Arya Devi is thorough with the traditional texts on Nyāya, and has had the previlage of studying under savants like Damodara Pisharodi and P. C. Vasudevan Elayath. She has used Pareekshit Thampuran's commentary on *Muktavali, Dinakari* and *Ramarudriya.* Recently Dr. Vattanky has brought out an English book on the subject, containing a translation and notes not only on *Muktavali,* but also on *Dinakariya.* Matilal's book, *The Word and the World* is also a brilliant modern work on the topic. She has not examined them, but has not missed much, since they are also meticulously following the Navya Nyaya tradition. While recommending Dr. Arya Devi's book to all serious students of Nyāya theory of Śābda Pramāṇa, I wish that she will continue her studies in the field boldly, using comparative and historical methods also, and clarify some of the confusions that remain in the traditional approach.

## Aksepa, Arthapatti and Laksana

In his brilliant study on 'The Word and the World' the late B. K. Matilal explains the Bhatta Mimamsaka theory of cognition of the sentential meaning thus: The separate word meanings, being independent of each other, cannot-naturally *merge* into each other to form a continuous line. Though the primary meaning of a word is universal *(jāti)*, in a sentence it is the particular *(vyakti)* that has to be resorted to, to bring about the intended activity *(arthakriyakari)*. Regarding the question as to how in a sentence the particular is got from the primary word meaning

which is a universal, "The Bhatta answer is that it is done through *aksepa*, i.e., a kind of extrapolative judgement (when word meanings are individually cognized) or through a sort of suggestive inference (*arthapatti*) on the part of the hearer."

This view seems to be based on the statement of Gangesopadhyaya, founder of the Navya Nyaya school of Indian logic, who refers to the different theories regarding the problem as to how the concept of the particular is obtained from the universal which is the primary meaning of a word. In the *Saktivada* of the *Tattvacintāmaṇi* (Bid. Ind. edn, Calcutta, 1892-1991, p. 578):

भट्टमते तु जातिरेव शक्या लाघवात्; व्यक्तिस्त्वाक्षेपलभ्या।

Gadadhara explains it in the *Saktivada* (Kashi Skt. Ser. 57, p. 207):

पदान्न व्यक्तेः स्मरणमनुवादो वा। किंत्वाक्षेपादेव व्यक्तिधीः। आक्षेपिका च जातिरेव। आक्षेपश्चानुमानमर्थापत्तिर्वा।

The Prabhakara theory is given correctly by Gangesa, that it is the same *sakti* that gives both the universal and the particular, because of the invariable association between the universal and the particular.

एकवित्तिवेद्यत्वनियमाद् जातिरेव व्यक्तिं बोधयतीति गुरवः।

(P. 570)

A third view given by Gangesa and ascribed to Mandanamisra is that it is through *laskana*, the secondary significatory power. He says:

न व्यक्तेराक्षेपः, किंतु लक्षणया गोपदाद् गोव्यक्तिधीरिति मण्डनः। यदाह —

'जातावस्तित्वनास्तित्वे न हि कश्चिद् विवक्षति।
नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे॥' इति।

[The particular is understood, not through implication, but from the word 'cow' the meaning of a particular is understood through the secondary significatory power. This is the view of Mandana. He says, "Nobody wants to refer to the existence or non-existence of the universal, since it is eternal: these two (existence and non-existence) are the attributes of the particular, got from the universal through *laksana*.]

The later Navya Nyaya tradition follows Gangesopadhyaya and attributs this view to Mandanamiśrā himself. Thus in the *Sabdasaktiprakasika* Jagadisa says:

यत्तु...सर्वत्र गोत्वादिजातिशक्तेनैव गवादिपदेन लक्षणया गोत्वादिविशिष्टा व्यक्तिर्बोध्यते, व्यक्तीनां बहुत्वेनालभ्यत्वेन च तत्र शक्तेरकल्पनात्, तात्पर्यानुपपत्तेरपि लक्षणायां बीजत्वात्। यदाहुर्मण्डनमिश्राचार्याः- जातेरस्तित्वनास्तित्वे न हि कश्चिद् विवक्षति। नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे।' इति। तदपि तुच्छम्। व्यक्तिं विना कृतायां गोत्वादिजातौ गवादिपदस्य मुख्यप्रयोजनाभावेन तन्मात्रस्याशक्यत्वे तद्वति गवादौ लक्षणाया वक्तुमशक्यत्वात्, शक्यसंबन्धस्यैव लक्षणात्वात्॥

I had already pointed a discrepancy here in the Navya Nyaya version of the BhattaMimāṃsā view. The Bhattas unanimously consider *laksana* as effecting the knowledge of the particular from the primary meaning which is the universal. This verse ascribed to Mandanamisra by Gangesopadhyaya and his followers is actually found in Kumarilabhatta's *Slokavarttika*, *Vakyadhikarana* section (verse 311, page 932 Benares edn.). It forms an integral part of the arguments there and commentators like Parthasarathimisra has taken this verse as Kumarilabhatta's own. We have no reason to suspect it as a later interpolation in the *Slokavarttika*. Moreover, the Bhatta Mimamsa tradition is to resort to *laksana* to explain how a word indicates the particular, since it is based on the incompatibility of the primary meaning which is the universal with the intention

of the speaker or the general purport of the sentence in the context (*tatparyānupapatti*),

It is also to be noted that Mandana was a follower of Kumarilabhaṭṭa and believed in the *Abhihitānvaya* theory as against Prabhakara's *Anvitabhidhana* theory. Moreover, *aksepa* is not different from *arthāpatti* (Gadadhara: *aksepascanumanam arthāpattirvā* quoted above) And *laksana* involves a kind of *arthapatti pramana* as accepted by the Bhatta Mimamsakas. To *reconcile* two known facts — the primary meaning of the word known through remembrance, and the general purport of the sentence known through contextual factors, a meaning which is related to the primary meaning and which is capable of removing the apparent conflict is resorted to in this case. This is *arthapatti* according to the Bhattas; the Naiyayikas consider it as inference based on *vyadhikarana*. Hence there is no substantial difference between the Bhatta view and the so-called Mandanamisra view.

It may be noted that the Bhatta Mimamsakas resort to *laksana* not only to get the particular *(vyakti*) from the primary meaning which is the universal; but also to get the syntactic connection of the word meaning (*anvaya*).

वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति नः स्थितिः ।

Kumarilabhatta, quoted in *Tattvabindu*, p. 153.

पदस्वरूपाभिहितैः पदार्थैः संलक्ष्यतेऽसाविति सिद्धमेतत् ।

Parthasarathimisra, *Nyayaratnamala*, p. 125.

पदाभिहितैः पदार्थैः लक्षणया वाक्यार्थः प्रतिपाद्यते ॥

*Sastradipika*, P. 154.

लभ्यते च समभिव्याहारान्यथानुपपत्या पदानामन्विताथँपराणां स्वार्थाभिधेयार्थरूपा समवेतान्वितावस्थाप्रत्यायनं लक्षणया ।

*Tattvabindu*, P. 131.

पदार्था एव वाक्यार्थं लक्षयन्ति ।

Cidananda, *Nititattvānubhāva*, p. 232.

Thus for the Bhattas *laksana* is responsible for two functions — getting the particular from the universal and getting *anvaya* to connect the word-meaning into the sentence meaning. Two different *laksanas* are not necessary. The same *laksana* can perform both functions. For the *tatparyanupapatti* can be removed only by effecting both functions. The rule.

विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे।

(attributed to Mandanamiśra, but not traced) applied only to *abhidha*, and follows the Bhatta view:

अभिधाशक्तिः विशेषणं गोत्वजातिं बोधयित्वा निवृत्तव्यापारा भवति। अथ विशेष्यं गोव्यक्तिं बोधयितुं तस्या नास्ति शक्तिः। अभिधाशक्तेः विरम्य व्यापारासंभवात्।

This agrees with Sabarasvāmin's view:

पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्थाः अवगताः सन्तः वाक्यार्थं गमयन्ति।

When I pointed out Gangesopadhyaya's mistake in distinguishing the Bhatta view from the view of Mandanamiśra, and *aksepa* or *arthapatti* from *laksana*, in my paper presented at the International Congress of Orientalists New Delhi in 1961, I thought that I was the first to doint out this. Later I have found that some others have also been aware of this. Thus in the *Nyayadipa* commentary on the *Tarkatandava* it is stated thus:

यद्यपि मणौ 'भाट्टमते व्यक्तिस्तभ्येत्युक्त आक्षेपपक्षवालक्षेवत, प एव दोषानुक्त्वा 'जातेरस्तित्वनास्तित्वे...' इति मण्डनश्लोकं संमतित्वेनोक्त्वा मण्डनमतत्वेनोपन्यस्य खण्डितवान्, तथापि मण्डनस्य भट्टशिष्यत्वात्, भाट्टास्तु लक्ष्येत्याहुः इत्युक्तम् आकृत्यधिकरणवार्तिकमते व्यक्तिलक्षणापक्षस्य स्फुटत्वाच्च'इति।

*Aksepa/arthapatti* view is not distinct from *laksana* view; the Mimamsa authority Parthasarathimisra has actually used

the term *aksepa* also in indicating the Bhatta Mimamsa view. He says:-

व्यक्तिप्रतीतिरस्माकं जातिरेव तु शब्दतः ।
प्रथमावगता पश्चाद् व्यक्तिं यां कांचिदाक्षिपेत्

*Vakyarthanirnaya*, V. 42

Matilal has attempted to make subtle distinction between *aksepa* and *arthapatti*, implying their distinction from *aksana* also. He says:-

"When what is presented seems incomplete to us, we are forced to imagine some suitable additional unrepresented element for completion. This is called *aksepa*. By looking at a baby in cradle one may imagine that there is a mother nearby. *Arthapatti* has a slightly different meaning. It is a proper inference from the given data. If I see that my desk is no longer in my room, I can easily infer that it has been removed otherwise it would be impossible to explain such absence under the circumstances".

I do not want to question the correctness of Matilal's statement. *Arthapatti* and *laksana* are technical terms, though with subtle differences in interpretation among the different schools, but *aksepa* is used with different shades of meaning and has not been defined precisely. My aim is to show that Matilal's statement is on the basis of the traditional Navya Nyaya interpretation of the Bhatta Mimamsa view which wrongly distinguishes the Bhatta view from Mandanamisra's view.

## Sabdabodha

Sabdabodha is the process of comprehension of the meaning of a sentence or an expression as understood by the listener; it is the Vakyarthabodha or the understanding of the sentence meaning preasely and accurately in an unambiguous manner from an objective point of view. It is also used to a sort of linguistic paraphrase of the sentence in which the exact denotation of each element

in the sentence and the relation among these elements are clearly indicated. The Sabdabodha approach of under standing a sentence meaning is intended to avoid syntactic ambiguity by specifying the exact relationship among the various elements in the sentence. The vagouries of the surface structure of the sentence will be absent in the *Sabdabodha* paraphrase and the linguistic analysis at the *syntactic* level will become precise. The Navya - Nyaya founded by Gangesa towards the begining of the fourteenth century started to use special technical terms for specifying the meaning components of words in unambiguous manner.

The *Sabdabodha* approach of analysing the exact meaning of a sentence is analogous to Chomsky's distinction between the surface structure and the deep structure of sentences. The underlying relations between the elements of a sentence at the *Sabdabodha* level need not always be the apparent relations at the surface level. Thus *ghatasya nirmitih* 'creation of the pot', and *caitrasya Nirmitih,* 'caitra's creation' though similar at the surface level have different types of *Sabdabodha*. The genitive case in the first expression indicates 'the object of the verb' while in the second expression the genitive case indicates the agent. The former is *ghatakarmika nirmitih,* 'creation which has the pot as its object' but the latter is *caitrakartrka nirmitih* creation which has caitra as its agent.

The technique of *sabdabodha* was adopted by later writers in the various other schools of thought also; but on the basis of the difference in the basic assumptions of these schools there is difference in the emphasis made and the same Sanskrit sentence or expression has different *sabdabodha* paraphrases in the different schools - Nyaya, Mimamsa and Vyakarana. It is on the the question as to which element in a sentence should be regarded as predominant that the schools differ very much. The logicians or Naiyayikas are generally interested in analys-

ing propositional sentences from a static point of view, and hence they consider the substantive as the most important. The grammarians, as well as the early etymology school, consider the sentence from the dynamic point of view and take the finite verb as the most important element. The followers of the Mimamsa school mainly concerned with the interpretation of Vedic injunctions, also consider the verb as more important than the other parts and try to analyse the implications of the sentences of command. Thus the same Sanskrit sentences may be interpreted differently at the deep structure level in the sabdabodha by the different schools of thought, since the differ in their basic standpoint.

The sentence *caitrah ghatam karoti* 'Caitra makes a pot' will be interpreted by the grammarian as *ekatvavacchinna caitrakartṛkah ekatvavacchinnaghatakarmakah vartamanakalaikah karanavyaparah* 'the operation or activity of making, in the present tense, which has Caitra in the singular number as its agent and pot in the singular number as its object'. To the logician the same sentence will mean *ghaṭakarmaka-karaṇakṛtiman caitrah* 'Caitra who has the activity of making which has the pot as its object'. These could be further eldborated pointing out all the implications of the sentence. The passive sentence *caitrena ghatah kriyate* 'A pot is being made by Caitra' could be analysed in the same way, since from the *sabdabodha* point of view there is little difference in meaning between the active sentence and its passive form, according to the grammarians. The Naiyayikas, howover, make a clear distinction between the two.

Among ancient writers neither Panini nor Gautama was interested in discussing the sentences. Jayantha Bhatta says in his *Nyayamanjari* that the absence of any reference in the *Nyaya sutra* shows that the early Naiyayikas considered the sentence as merely a combination of words. Among Indian grammarians it is Katyayana who first defines a sentence as *ekatin* 'that which has one finite verb'. Panini seems to have

held the view that a sentence may contain more than one verb, for his *sutra tiṅ atiṅah* ordains the acute accent to a verb which it follows a non-verb (in a sentence). Later grammarians have also accepted sentences. But strictly from the formal surface level approach, as advocated by Katyayana and Patanjali, such a sentence may be considered as a complex sentence made up of two sentences: but at the deep structure leavel from semantic point of view, they constitute a single sentence.

The Mimamsakas first promulgated and the other schools later accepted the theory that the unity of a sentence is based on the three factors *akanksa* or mutual expectency or interdependence of the meanings of the words in it, *yogyata* or compatibility and *sannidhi* or proximity. The Mimamsaka considered mutual expectancy as psychological while the grammarians and the logicians took it as syntactical. Between the two schools of Mimamsa, the Bhatta and the Prabha kara, there is difference in view as to the factors involved in an injunctive sentence which they analysed. According to Kumarila Bhatta every command to do something raised three questions: 'what should be done?', how is it to be done?', and what is the purpose?'. Prabhakara held that the questions raised are 'what should be done?', 'how is it to be done? and 'who should do it?'. A command or law should be obeyed, not because of the profit motive or the fear of punishment, but simply because it is a command. But Kumarila Bhatta held the view that not even a fool will act but for some purpose *prayojanam Anuddisya na mando'p prpvartate*). Every complete sentence must satisfy these basic psychological requirements according to theMimamskas, and the syntactic connection among the words of a sentence is based primarily on this.

The Mimamsa school held that the finite verb is the central element in a sentence. It consists of two

elements, the verbal root (*dhatu*) and the verbal suffix. Of these the Mimamsakas held that the verbal suffix is semantically more important than the root. The verbal suffix denotes *bhavana* or 'efficient force' which is defined as that activity which brings something into being (*bhavitur bhavananukula*) *bhavakasya vyaparavisesha* 'the operationof the operator conducive to the production of the result' This again is of two kinds *sabdi bhavana* and *Arthi bhavana*. The injunctive sentence induces the hearer to do some action. This is denoted by the optative suffix *liṅ* this is the *sabdi bhavana* the *arthi bhavana* is based on this and is the activity of the agent leading to the result. In the *Bhavana viveka*, Mandına misra defines *bhavana* as the absence of inactivity in general (*audasinyavicchittisamanyarupa*)

Explaining Panini's *sutra samarthah padavidhih* which is primarily concerned with the formation of compound words, Patanjali explains *samarthya* in two ways — *eka rthibhava* 'unity of meaning' and *parasparavyapeksa* 'mutual dependence'. The Mimamsa definition of a sentence given in Jaimini's *sutra arthaikatvad ekam vakyam sakanksyam syad vibhage syad* also refers to the two factors *ekarthi bhava* and *akanksa* or *vyapeksa*. Regarding the meaning of a sentence Patanjali and others refer to two theories. According to Vajapyayana who held that the meaning of a word is the universal (*jati*), the sentence meaning is the mutual associatlon of the word meanings *samsargo vakyarthah;* according to Vyadi who held that the meaning of a word is the mutual exclusion (*bheda*). The first is anlogous to the later *samsarga maryada* of the Naiya yikas and the second seems to be the precursor of the Budbhist theory of *Apoha* as applied to the sentence meaning, which says that the function of a word in a sentence is to exclude all other possible ideas.

Among the grammarians Bhartṛhari in his Sphota theory held that a sentence has to be taken as an integral and indivisible, meaning - bearing iinguistic symbol and its meaning is also indivisible and iS the form of an instantaneous flash of insight *(pratibha)*. According to him the dlvision into words is only a means and has no reality.

The Mimamsakas and the Naiyayikas accepted the reality of inividual words and their independent meanings. According to the Bhatta Mimamsa advocatiug the Abhihitanvaya theory of verbal comprehension, the words in a sentence express their individuai, isolated meanings and stop with that: the syntactic connection among the meanngs is understood from the word meanings through *laksana* or the senondary significative power. The Prabhakara school of Mimamsa, advocated the *Anvitabhidhana* theory which holds that every word in a sentence expresses not only its individual meaning, but also its syntactic relation in the sentence, since the sentence has to be taken as the basic unit of language. The Nyaya School also acccpted the associationist of verbal comprehension, but held that the syntactic connection between the word meanings in a sentence is obtained through *samsarga maryada* or the power of mutual association.

In *nilo ghatah* 'a black pot' the syntactic relation between the two word meanings is identity' this is not directly conveyed by any clement through the power of association: this is called *samsarga maryada*. If the underlying syntactic relation between the elements in a sentence is conveyed through some morphemic element in the surface structure itself, it is called *prakara*. Thus in the sentence *dhanyena dhannaan* 'possessed of wealth in the form of grains', the relation of identify of dhanya and *dhana abheda* is conveyed by the instrumental ending - *ena*. *dhanyabhinnadhanavan*. Thus a distinction is made between the two types, one where

the syntactic relation is inherent in the constituent elements and the other where this relation is absent in the surface structure and has to be got through implication or suggestion.

Every verbal root consists of two elements: *phala* or the result and vyapara or an activity; thus the meaning of every root can be analysed as a kind of activity producing some result. Thus *pac* 'to cook' means *viklityanukulavyapara*, an activity conducive to the softening. In trans itive sentence, the activity pertains to the agent (kartṛ) and the result or effect of the operation accrues to the object (*karma*).

Dr. K. KujunniRaja

# ॥ प्रथमोऽध्यायः ॥

## प्रमाणानि

दर्शनेषु सर्वेषु प्रमाणशब्दोऽतीव प्राधान्यमर्हति। प्रपूर्वकमाङ्-धातोः ल्युटि प्रमाणशब्दो निष्पन्नः। प्रमीयतेऽनेनेति व्युत्पत्त्या प्रमाणशब्दः प्रमाकरणमभिधत्ते। प्रमायाः करणं प्रमाकरणम्। प्रमा यथार्थानुभवः। साधकतमं करणम्। अतिशयेन साधकं साधकतमम्। प्रकृष्टं कारणमित्यर्थः।

**कारणम्**

अनन्य[1]थासिद्धनियतपूर्ववृत्तित्वं कारणत्वम्। अनन्यथासिद्ध-नियतपूर्ववृत्तित्वं नाम अनन्यथासिद्धत्वे सति नियतपूर्ववृत्तित्वम्। अनन्यथासिद्धत्वमन्यथासिद्धिरहितत्वम्। नियतपूर्ववृत्तित्वं नियमेन पूर्ववृत्तित्वम्। कार्यस्योत्पत्तिः येषां सत्त्वमपेक्षते, येषामभावे कार्यं नोत्पन्नं भवेत् तेषामेव नियतपूर्ववृत्तित्वम्।

घटमेकं कार्यं भवति। कपालकपालसंयोगदण्डचक्रकुलालादीनां सत्त्वे एव घटस्योत्पत्तिर्भवेत्, तेष्वन्यतमस्याप्यभावे घटः नोत्पन्नः स्याद्। अत एतानि घटं प्रति नियतपूर्ववर्तीनि। अत एवैतेषां घटं प्रति कारणत्वञ्च।

परन्तु नियतपूर्ववर्तीनि सर्वाणि कारणानि न भवेयुः। दण्डं घटस्य कारणमित्युक्तम्। दण्डे समवायेन स्थिते दण्डत्वदण्डरूपे। तयोः घटं प्रति कारणत्वं नास्ति। दण्डस्य घटपूर्ववृत्तित्वाद्, दण्डेन सहैवानयोरपि स्थितेः, अनयोरपि घटं प्रति नियतपूर्ववृत्तित्वं वर्तते। एवं सर्वाण्यपि कार्यद्रव्याणि प्रति कारणगतधर्माः, कारणनिष्ठ-गुणाश्च नियतपूर्ववर्तिनो भवन्ति। कारणत्वन्त्वेतेषां नास्ति।

---

1 'एवञ्चानन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम्।' त. सं. दी. पृष्ठं २३३

एतेषु कारणलक्षणस्यातिव्याप्तिवारणाय अनन्यथासिद्धत्वे सतीत्युक्तम्। दण्डत्वदण्डरूपादीनां घटं प्रत्यन्यथासिद्धत्वमेव; नानन्यथासिद्धत्वमतो न कारणलक्षणेऽतिव्याप्तिः।

**कारणानि—तेषां विभागः।**

कारणं त्रिविधम् — समवायिकारणं, असमवायिकारणं, निमित्तकारणमिति। घटादिकं कार्यं यस्मिन् समवायसम्बन्धेन स्थितं सत् उत्पन्नं भवति तत्समवायिकारणम्। घटः स्वावयवयोः कपालयोः समवायसम्बन्धेन स्थितः सन् उत्पद्यते। अतः कपालौ घटसमवायिकारणम्। पटः स्वावयवेषु तन्तुषु स्थितः सन् उत्पद्यते। अतः तन्तवः पटस्य समवायिकारणम्। एवं कार्यद्रव्याणां अवयवाः तेषां समवायिकारणम्। गुणानां कर्मणाञ्च, तेषामाश्रयद्रव्याणि समवायीकारणम्।

समवायिकारणप्रत्यासन्नत्वे सति कारणत्वमसमवायिकारणत्वम्। समवायिकारणप्रत्यासन्नत्वं कार्यैकार्थप्रत्यासत्या कारणैकार्थप्रत्यासत्या च। घटं प्रति कपालसंयोगः कार्यैकार्थप्रत्यासत्या असमवायिकारणं भवति। कार्यं घटः। स समवायसम्बन्धेन कपालयोः वर्तते। अत्र कपालसंयोगात्मकासमवायिकारणं स्वकार्येण घटेन सह कपालयोः स्थित्वा घटं प्रति कारणं भवतीत्यतः कपालसंयोगः कार्यैकार्थप्रत्यासत्या घटस्यासमवायिकारणम्। घटरूपं प्रति कपालरूपं कारणैकार्थप्रत्यासत्या असमवायिकारणं भवति। अत्र कार्यं घटरूपम्। घटरूपस्य समवायिकारणं भवति घटः। घटः समवायसम्बन्धेन कपाले वर्तते। कपालरूपमपि समवायसम्बन्धेन कपाले वर्तते। अतोऽत्र कपालरूपं स्वकार्यस्य घटरूपस्य समवायिकारणेन घटेन सहैकस्मिन् कपाले प्रत्यासन्नं सत् कारणं भवतीत्यतः घटरूपं प्रति कपालरूपं कारणैकार्थप्रत्यासत्या असमवायिकारणं भवति।

समवाय्यसमवायिभिन्नं कारणं निमित्तकारणम्। दण्डचक्र--कुलालादयः घटं प्रति निमित्तकारणम्।

भावानामेव त्रिविधं कारणत्वं सम्भवति। अभावस्य तु निमित्तकारणत्वमात्रम्। न तु समवाय्यसमवायिकारणत्वं, तस्य क्वचिदप्यसमवायात्। समवायः द्वयोः भाववस्तुनोरेव सम्बन्धो भवितुमर्हति।

एतत्त्रिविधकारणमध्ये यदेव सातिशयं कारणं तदेव करणम्। प्रमातृप्रमेययोः सतोरपि यदभावत् प्रमानुत्पादकत्वं सोऽतिशयः। तथा चाविलम्बेन प्रमोत्पादकत्वं यस्य तस्यैव प्रमाणत्वम्। अविलम्बेन प्रमोत्पादकं प्रमाणं भवति।

**विविधदर्शनदिशा प्रमाणलक्षणम्।**

सर्वेषु दर्शनेषु प्रमाणशब्दप्रयोगः द्रष्टुं शक्यते। परन्तु प्रमाणानां निरूपणावसरे तेषां स्वरूपलक्षणादिषु प्रतिदर्शनं भेदोऽस्त्येव। [1]अविसंवादिज्ञानं प्रमाणमिति सौगताः। अनधिगतार्थगन्तृ प्रमाणमिति भाट्टाः। प्रमाकरणं प्रमाणमिति नैयायिकाः।

**सौगतमतम्**

आचार्यधर्मकीर्तिः प्रमाणवार्तिके प्रमाणसिद्धिनामके प्रथमपरिच्छेदे प्रमाणमविसंवादिज्ञानमिति कारिकाभागेन अविसंवादिज्ञानस्य प्रमाणत्वं कथयति। अविसंवादनमिति पदेन अर्थक्रियास्थितिरित्यर्थो विवक्षितः। [2]अर्थक्रिया हि क्वचित् स्वरूपप्रतिपत्तिरेव; क्वचित् ततोऽन्या यथासम्भवं व्यवहारविषयः। अर्थक्रियायाः स्थितिः अर्थक्रियास्थितिः। अत्र स्थितिरित्यनेन स्वरूपयोग्यत्वमभिमतम्। अतः यस्माज्ज्ञानात् अर्थं परिच्छिद्यापि न प्रवर्तते, प्रवृत्तो वा कुतश्चिद् प्रतिबन्धाद् अर्थक्रियां नाधिगच्छति तद्ज्ञानमपि प्रमाणं भवति।

अभिप्रेतार्थक्रियायाः निवेदनाद् शाब्दे[3] ज्ञानेऽपि प्रामाण्यं

---

1 प्रमाणमविसंवादिज्ञानम्, अर्थक्रियास्थितिः
अविसंवादनं शाब्देऽप्यभिप्रायनिवेदनात्॥ ३॥ (प्र. वा.)

2 मनोरथनन्दिकृते वृत्तौ पश्यतु (प्र. वा. सपुटे चतुर्थे)

3 शाब्दे ज्ञानेऽपि प्रामाण्यं
शाब्देऽप्यभिप्रायनिवेदनात्॥ ३॥ (प्र. वा)

वर्तते। विकल्पज्ञानं न प्रमाणम्। तेन गृहीतस्यैव ग्रहणात्। हेयोपादेयवस्तुविषयायाः प्रवृत्तेः ज्ञानप्रधानत्वाद् ज्ञानस्यैव प्रमाणता अङ्गीक्रियते; नेन्द्रियादीनाम्। किञ्चार्थप्रतीतेः भेदः धियः विषयाकारभेदकृतः। अपरप्रकारेण कथने तु धियः विषयाकारभेदे एव अर्थाधिगमस्यापि भेदः। अतोऽपि ज्ञानस्यैव प्रमाणत्वमङ्गीक्रियते। यद्यपि विषयाकारस्य धियः इव अर्थाधिगमं प्रति इन्द्रियस्यापि हेतुत्वं वर्तत इति प्रमाणत्वं इन्द्रियेऽप्यस्तीति वक्तुमर्हति, तथापि न केवलं प्रमोत्पत्तिसाधनस्य प्रमाणत्वमङ्गीकर्तुं युक्तम् इत्यभिप्रायः। विषयाकारायाः धियः सत्त्वेऽर्थाधिगमः। तस्या अभावे अर्थाधिगमाभावः। नहीन्द्रियसत्त्वेऽर्थाधिगम इति वक्तुं शक्यते, इन्द्रियसत्त्वेऽपि विषयाकारायाः धिय अभावे अर्थाधिगमाभावात्। अतः ज्ञानस्यैव प्रमाणत्वमङ्गीकर्तुं युक्तम्। एवञ्चाविसंवादिज्ञानं प्रमाणमिति स्थितम्।

'अज्ञाता[1]र्थप्रकाशो वा' इति अन्यथापि प्रमाणलक्षणमभ्यधायि आचार्यधर्मकीर्तिना। अत्र वाग्रहणाद् प्रमाणस्य अपरलक्षणाभिधाने आचार्यस्य तात्पर्यमिति प्रतीतिर्भवेत्। परन्तु[2] अविसंवादित्व-मज्ञातार्थप्रकाशकत्वञ्चोभयमपि परस्परसापेक्षमेव लक्षणं भवितुमर्हति। अविसंवादित्वज्ञानस्यैव प्रमाणलक्षणत्वे सांवृतमपि ज्ञानं प्रमाणं स्यात्। अतः अज्ञातार्थप्रकाशस्यापेक्षा वर्तते। अज्ञातार्थप्रकाशस्यैव प्रमाणलक्षणत्वे तु 'पीतशङ्खा'दिज्ञानमपि प्रमाणं स्यात्। एवञ्च अविसंवादित्वे सति अज्ञातार्थप्रकाशत्वं प्रमाणसामान्यलक्षणमिति फलितम्।

**भाट्टमीमांसकमतम्** ॥

कुमारिलभट्टकृत-श्लोकवार्तिकस्थस्य-
"अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि।
तेनोत्सर्गे स्थिते तस्य दोषाभावात् प्रमाणता" ॥६॥

---

1 अज्ञातार्थप्रकाशो वा; स्वरूपाधिगतेः परम् ॥ ७ ॥ (प्र. वा.)

2 मनोरथनन्दिः एतद् व्यनक्ति (प्र. वा. संपु. ५)

इति श्लोकस्य व्याख्यानावसरे पार्थसारथिमिश्राः "[1]ज्ञानोत्पादहेतुत्वं प्रामाण्यहेतुः, सति तस्मिन् प्रामाण्यस्यौत्सर्गिकत्वाद्, शब्दश्चात्यन्तासत्यपि शशविषाणादौ ज्ञानमुत्पादयति। तदिह चोदनायाः धर्मज्ञानजनकत्वाद् उत्सर्गतः प्राप्तं प्रामाण्यमपवादभूतदोषाभावाद् अनपोदितं भवतीत्य"भिप्रयन्ति। तथा च तेषाम्मते उत्सर्गतः ज्ञानोत्पत्तिहेतुत्वं प्रमाणत्वमिति ज्ञातुं शक्यते।

[2]भाट्टचिन्तामणौ श्रीगागाभट्टैः 'तस्य निमित्तपरीष्टि'रिति सूत्रव्याख्यानवेलायां "किं नाम प्रामाण्य प्रमाकरणत्व"मित्युक्तम्। प्रथमं तावद् यथार्थानुभवत्वं प्रमात्वमिति साम्प्रदायिकमतानुसारेण वदति।[3] तदनन्तरं '[4]वस्तुतस्तु ज्ञानत्वघटितमेव तल्लाधवाद्' इत्यादिना यथार्थज्ञानमेव प्रमा इति स्वाभिप्रायं प्रकटयति। तथा च स्मृतेरपि ज्ञानत्वाद् तस्यापि प्रमात्वं, तत्करणस्य च प्रमाणत्वम् एवञ्च प्रयोगहेतुभूतार्थस्मारकाणां मन्त्राणां प्रामाण्यं सिद्धं भवतित्यभिप्रयन्ति।

तदनन्तरं, "स्मृतित्वञ्च[5] ज्ञातविषयकज्ञानत्वं, संस्कारजन्यज्ञानत्वं वा। एवञ्चाज्ञातविषयकं बाधकज्ञानरहितज्ञानं प्रमेति फलितम्। अनेनैवाशयेनागृहीतग्राहित्वं प्रामाण्यमित्याचक्षते। नचैवं गृहीतविषयकधारावाहिकज्ञानस्याप्रामाण्यप्रसङ्गः। कालस्य षडिन्द्रियवेद्यत्वेन पूर्वक्षणविशिष्टघटस्य विषयीकरणेन तादृशस्योत्तरज्ञानाविषयतयाऽनधिगतार्थविषयकत्वसम्भवात्। मन्त्राणामनुवादवाक्यानां स्मृतीनां च स्वसमानाधिकरणस्वाव्यवहितपूर्वक्षणवर्तिज्ञानाविषयविषयकत्वस्वरूपागृहीतग्राहित्वेन प्रामाण्योपपत्ति" रिति साम्प्रदायिकमतेऽपि मन्त्रादीनां प्रामाण्यं व्यवस्थापयति।

---

1 श्लो. वा. (चोदनासूत्रम् २) पृष्ठं ३५

2 भा. चि. पृष्ठं ९-१०  3 भाट्टचिन्तामणौ १० संपुटं।

4 तत्रैव — "वस्तुतस्तु ज्ञानत्वघटितमेव तल्लाघवात्। न च स्मृतिकरणस्य प्रमाणान्तरतापत्तिः। इष्टत्वात्। निर्युक्तिकप्रवादस्य हेयत्वात्। अत एव मन्त्राणां स्मारकत्वेऽपि प्रामाण्यम्।"

5 भा: चि. पृ. ११

तथा च प्रमायाः अज्ञातविषयकत्वे सति बाधकज्ञानरहित-ज्ञानत्वमिति लक्षणं सम्पन्नम्। प्रमाकरणस्य प्रमाणस्यापि अबाधिताज्ञातार्थाधिगन्तृत्वमिति लक्षणम्।

**वेदान्तिमतम्॥**

वेदान्तिनः प्रमाणनिरूपणे प्रायः भाट्टमतावलम्बिनः। प्रमाकरणं प्रमाणमित्येव प्रमाणसामान्यलक्षणम्। प्रमा च स्मृतिव्यावृत्तं चेद् अनधिगताबाधितार्थविषयकज्ञानत्वम्।

एषाम्मते घटादीनां सर्वेषां मिथ्यात्वाद् बाधितत्वं वर्तत इति घटादिज्ञानं बाधितार्थविषयकमेवेति घटादिज्ञाने अबाधितार्थविषय-कत्वरूपप्रमालक्षणं कथं सम्भवतीति शङ्का स्यात्। परन्तु ब्रह्म-साक्षात्कारानन्तरमेव घटादीनां मिथ्यात्वं ज्ञायत इति तदानीमेव घटादीनां बाधितत्वं, न संसारदशायाम् अतः अबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति घटादिप्रमायां नाव्याप्तिः।

**नैयायिकमतम्**

प्रमाकरणं प्रमाणम्। प्रमा च यथार्थानुभवः। तद्वति तत्प्रकारकः अनुभवः यथार्थानुभवः। स अस्यास्तीति तद्वान्। स इति तच्छब्देन प्रकाररूपो धर्मः उच्यते। तादृशधर्मः यस्मिन् वर्तते स तद्वान्। रजतत्ववति रजते 'इदं रजत'मिति रजतत्व-प्रकारिका मतिः रजतप्रमा। अत्र तद्वत्वं प्रकारतावच्छेदकसम्ब-न्धेन ग्राह्यम्। तेन कालिकसम्बन्धेन शुक्तौ रजतत्वसत्त्वेऽपि प्रकार-तावच्छेदकसम्बन्धेन समवायेन शुक्तौ रजतत्वाभावाद् शुक्तौ 'इदं रजतम्' इति भ्रमे नातिव्याप्तिः। तथापि रङ्गत्वेन रजतावगा-हिनि, रजतत्वेन रङ्गावगाहिनि च 'इमे रङ्गरजते' इति समूहालम्ब-नात्मके भ्रमे अतिव्याप्तिः, तत्र रङ्गविशेष्यकत्वरङ्गत्वप्रकारकत्वयोः, रजतविशेष्यकत्वरजतत्वप्रकारकत्वयोः च सत्त्वात्। अतः तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपार्थविवक्षणमावश्यकम्। ययोः विषयतयोः निरूप्यनिरूपकभावः तन्निरूपितविषयितयोः अवच्छेद्याव-च्छेदकभाव इति सिद्धान्तः। दर्शितभ्रमे रङ्गत्वप्रकारतायां रङ्ग-

विशेष्यतानिरूपितत्वस्य रजतत्वप्रकारतायां रजतविशेष्यतानिरूपितत्वस्य चाभावेन रङ्गविशेष्यकत्वावच्छिन्नरङ्गत्वप्रकारकत्वरजतविशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वयोश्चासत्त्वेन नातिव्याप्तिः। 'घटे घटत्व'मिति प्रमायां घटत्वं विशेष्यं, घटः प्रकारः। अत्र तद्वद्विशेष्यकत्वमित्युक्ते तच्छब्देन घटः, तद्वच्छब्देन घटत्वञ्च ग्राह्यम्। परन्तु घटत्वे घटो नास्ति। अत एतादृशप्रमायामव्याप्ति वारणाय यत्र यत्सम्बन्धोऽस्ति तत्र तत्सम्बन्धानुभव इत्येव तद्वति तत्प्रकारकानुभव इत्यस्यार्थ इति वक्तव्यम्। अतः घटत्वे घटाभावेऽपि तत्र घटसम्बन्धोऽस्त्येवेति नाव्याप्तिः। एवञ्च तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकानुभवत्वं प्रमालक्षणमिति फलितम्। प्रमायाः करणं प्रमाणम्। यथार्थानुभवजनकमित्यर्थः।

तानि च प्रमाणानि प्रत्यक्षानुमानोपमानशब्दभेदात् चत्वारीति नैयायिकाः[1]। चार्वाकास्तावद् प्रत्यक्षमेकमेव प्रमाणं मन्यन्ते। वैशेषिकाः सौगताश्च प्रत्यक्षमनुमानञ्चेति प्रमाणं द्विविधमिति वदन्ति। भासर्वज्ञादिनैयायिकैकदेशिनः प्रत्यक्षमनुमानं शब्दश्चेति त्रीणि प्रमाणानीति वादिनः। मीमांसकेषु प्राभाकराः प्रत्यक्षानुमानोपमानशब्दार्थापत्तयः इति प्रमाणानि पञ्चेति वदन्ति। भाट्टमीमांसकाः प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धय इति प्रमाणानि षडिति कथयन्ति। सम्भवः ऐतिह्यं च प्रमाणे इति पौराणिकाः। चेष्टाप्रतिभाह्रस्वदीर्घादीनामपि प्रमाणत्वमिति केचन वदन्ति।

तत्र चत्वार्येव प्रमाणानीति नैयायिकाः। प्रथमं तावत् प्रत्यक्षम्। प्रत्यक्षप्रमाणसत्त्वे न केषामपि विप्रतिपत्तिः। सर्वैरपि प्रत्यक्षप्रमाणमङ्गीक्रियते।

**करणम्** (अन्नंभट्टमतम्)

असाधारणं[2] कारणं करणमिति तर्कसंग्रहे करणलक्षणमुक्तम्। ईश्वरादृष्टदिक्कालाः उत्पत्तिमन्ति सर्वाणि वस्तूनि प्रति कारणानि भवन्ति। अतस्तानि साधारणकारणानि। न साधारणमसा-

---

1 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' न्या. सू. १. १. ३.

2 त. स. पृष्ठम् ३६.

धारणम् । घटं प्रति दण्डचक्रादयः असाधारणकारणानि । अत एतन्मते दण्डचक्रादीनां करणत्वम् ।

व्यापारवदसाधारणं कारणं करणमित्यपि करणलक्षणं वर्तते । व्यापारः अस्यास्तीति व्यापारवत् । तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारः । करणजन्यत्वे सति करणजन्यकार्यजनकत्वं व्यापारस्य लक्षणम् ।

**प्रत्यक्षप्रमाकरणम् ।**

प्रत्यक्षं प्रतीन्द्रियाणां कारणत्वं वर्तते । तच्च इन्द्रियार्थसन्निकर्ष-द्वारा । इन्द्रियार्थसन्निकर्षं प्रति इन्द्रियाणां कारणत्वमस्ति । अतः इन्द्रियार्थसन्निकर्षस्येन्द्रियजन्यत्वम् । इन्द्रियजन्यं प्रत्यक्षात्मकं ज्ञानं प्रति इन्द्रियार्थसन्निकर्षो हेतुश्च । अतः इन्द्रियार्थसन्निकर्षः व्यापारः । इन्द्रियाणि प्रत्यक्षं प्रति व्यापारवत्कारणानीति प्रत्यक्षप्रमाणानि ।

**केशवमिश्रमतम्**

तर्कभाषाकाराः केशवमिश्रास्तु इन्द्रियार्थसन्निकर्ष अपि प्रत्यक्ष प्रमाकरणमिति वदन्ति । तेषाम्मते अतिशयितं साधकं साधकतमम् । तदेव करणम् । "[1]सत्यपि प्रमातरि प्रमेये च प्रमानुत्पत्तेः इन्द्रिय संयोगादौ (तु) सत्यविलम्बेन प्रमोत्पत्तेरत इन्द्रियसंयोगादिरेव कारणम् । प्रमायाः साधकत्वाविशेषेऽप्यनेनैवोत्कर्षेणास्य प्रमात्रादि-भ्योऽतिशयितत्वादतिशयितं साधकं साधकतमं तदेव करणमित्युक्तम् । अत इन्द्रियसंयोगादिरेव प्रमाकरणत्वात् प्रमाणं न प्रमात्रादि ।"

तर्कभाषाकाराः इन्द्रियाणामपि प्रत्यक्षज्ञानकरणत्वमङ्गीकुर्वन्ति । तेषाम्मते निर्विकल्पकसविकल्पकभेदेन द्विविधस्य प्रत्यक्षस्य करणं त्रिविधम् ।

आत्ममनःसंयोगे इन्द्रियमनःसंयोगे च सति इन्द्रियार्थ-सन्निकर्षानन्तरं निर्विकल्पकं प्रत्यक्षं जायते । अत्रेन्द्रियाणां करण-

1 त. भा. पृष्ठम्-३२

त्वम्। निर्विकल्पकानन्तरं सविकल्पकं प्रत्यक्षं जायते, तत्रेन्द्रियार्थसन्निकर्षः करणम्। सविकल्पकानन्तरं हेयोपादेयबुद्धिः (फलम्) तत्र निर्विकल्पकज्ञानं करणम्। निर्विकल्पकप्रत्यक्षं प्रति इन्द्रियार्थसन्निकर्षस्य, सविकल्पकप्रत्यक्षं प्रति निर्विकल्पकप्रत्यक्षस्य, हेयोपादेयबुद्धिं प्रति सविकल्पकप्रत्यक्षस्य च व्यापारत्वम्[1]।

[2]'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी'ति सूत्रव्याख्यानावसरे 'अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु—सन्निकर्षः ज्ञानं वा' इति वदतः भाष्यकारस्यापि इन्द्रियार्थसन्निकर्षस्य प्रमाणत्वमभिमतमिति प्रतिभाति। [3]वार्तिककारोऽपि इन्द्रियार्थसन्निकर्षस्य प्रत्यक्षप्रमाणत्वमङ्गीकरोति। परन्तु इन्द्रियार्थसन्निकर्ष एव प्रत्यक्षप्रमाकरणं, न त्विन्द्रियमिति तु न तेषामभिप्रायः। इन्द्रियोऽपि प्रत्यक्षप्रमाणमिति कुत्रचित्[4] ते वदन्ति।

वस्तुतस्तु प्राचीनग्रन्थेषु प्रमाणशब्दः क्वचित् प्रमाकरणमित्यर्थे, क्वचित् प्रमितिरित्यर्थे च प्रयुज्यते इति द्रष्टुं शक्यते।

अन्नंभट्टः विश्वनाथपञ्चाननः च इन्द्रियाणामेव प्रत्यक्षप्रमाणत्वमङ्गीकुरुतः। इन्द्रियाणां प्रत्यक्षप्रमाकरणत्वपक्षे चक्षुरादीनि इन्द्रियाणि प्रमाणानि। इन्द्रियार्थसन्निकर्षः व्यापारः।

**प्रत्यक्षप्रमायाः लक्षणम्**

"इन्द्रियार्थसन्निकर्षोत्पन्नं[5] ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्।" इति प्रत्यक्षप्रमालक्षणं न्यायसूत्रकारेणाभिहितम्। [6]तर्कसंग्रहे इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति प्रत्यक्षप्रमायाः लक्षणं निर्दिशति। 'इन्द्रियजन्यं[7] ज्ञानं प्रत्यक्षमिति प्रयक्षप्रमालक्षणं मुक्तावल्यां निर्दिष्टम्। चक्षुरादीनामिन्द्रियाणां घटादिभिरर्थैः सह सन्निकर्षेण यत् ज्ञानं जायते तत् प्रत्यक्षज्ञानमित्युच्यते।

---

1 त. भा. पृष्ठम् ३३
2 न्या. सू. भा. पृष्ठम् २५
3 न्या. वा. पृष्ठम् ६
4 न्या. वा. पृष्ठम् ७
5 न्या. सू. १. १. ४.
6 त. सं. पृष्ठ ४१-४२
7 न्या. सि. मु. पृष्ठम् १७३

**प्रत्यक्षज्ञानहेतवः**

घटादीनां चाक्षुषप्रत्यक्षे जायमाने, घटादिभिरर्थैः सह चक्षुषः कश्चन सम्बन्धः वर्तते। एष सम्बन्धः सन्निकर्ष इति पदेन व्यवह्रियते। अयमेवेन्द्रियार्थसन्निकर्षः।

यदा इन्द्रियं महत्त्वपरिमाणयुक्तेन अर्थेन सन्निकृष्टं भवति तदैव प्रत्यक्षं जायते। महत्त्वरहितानां प्रत्यक्षं न सम्भवति। अतः महत्त्वस्य प्रत्यक्षं प्रति कारणत्वं वर्तते।

चाक्षुषप्रत्यक्षं प्रति आलोकसंयोगोऽपि हेतुः। महत्परिमाण-युक्ते द्रव्ये आलोकसंयोगः यद्यस्ति, तदैव द्रव्यस्य चाक्षुषप्रत्यक्षं जायते।

एवम् उद्भूतरूपमपि चाक्षुषप्रत्यक्षे हेतुः। उद्भूतरूपाभावे चाक्षुषप्रत्यक्षं न स्यात्।

**उद्भूतरूपस्य कारणत्वे मतभेदः**

चक्षुः, त्वक्, घ्राणं, श्रोत्रं, रसना, मनः इति षडिन्द्रियाणि। तत्राद्यानि पञ्च बाह्येन्द्रियाणि, मनस्त्वान्तरेन्द्रियम्। एष्विन्द्रियेषु चक्षुः, त्वक्, मनश्च द्रव्यग्राहकाणि। गुणग्राहकाणि च। अन्यानि तु गुणमात्रग्राहकाणि।

तत्र बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति उद्भूतरूपस्य हेतुत्वं प्राचीननैयायिका अङ्गीकुर्वन्ति। चक्षुषा त्वचा वा सन्निकर्षद्वारा द्रव्यप्रत्यक्षजनने उद्भूतरूपं कारणं भवति एषाम्मते। यस्मिन् द्रव्ये उद्भूतरूपं वर्तते, तस्यैव चाक्षुषप्रत्यक्षं, त्वाचप्रत्यक्षञ्च भवेदित्येषामाशयः। वायौ उद्भूतरूपं नास्ति। अतः वायोः त्वाचप्रत्यक्षं न सम्भवति। केवलं त्वगिन्द्रियेण वायुगतस्पर्शस्यैव प्रत्यक्षं जायते। यथा गन्धग्राहकं घ्राणं कुसुमसमवेतगन्धग्रहण एव समर्थं, न तु गन्धाश्रयकुसुमग्रहणे, तद्वत् त्वगिन्द्रियं उद्भूत-रूपाभाववन्तं वायुं न गृह्णाति, केवलं वायुगतस्पर्शमेव गृह्णाति। अत एतन्मते वायोः प्रत्यक्षं न सम्भवति।

नवीननैयायिकास्तु चाक्षुषप्रत्यक्षं प्रत्येवोद्भूतरूपस्य हेतुत्वमङ्गीकुर्वन्ति। त्वाचप्रत्यक्षं प्रति तु उद्भूतस्पर्शस्य हेतुत्वम्। तथाचैषाम्मते वायोः त्वाचप्रत्यक्षं सम्भवति, तत्रोद्भूस्पर्शसत्त्वात्।

**प्राचीननवीनमतयोः गौरवलाघवचिन्ता**

कार्याभावे कारणाभावस्य प्रयोजकतया बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति उद्भूतरूपस्य कारणत्वमङ्गीकुर्वतां प्राचीनानां मते बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षाभावं प्रति उद्भूतरूपाभावस्यैव प्रयोजकता कल्प्या इति लाघवमिति ते मन्यन्ते। नवीनास्तु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति आत्मावृत्तिशब्दभिन्नविशेषगुणवत्वस्य प्रयोजकत्वाङ्गीकारात्, तदभावस्य बहिरिन्द्रियजन्यप्रत्यक्षाभावं प्रति प्रयोजकत्वसम्भवात् न तेषाम्मते गौरवमिति कथयन्ति। यथा उद्भूतस्पर्शाभाववत्याः, किन्तु उद्भूतरूपवत्याः प्रभायाः चाक्षुषप्रत्यक्षं प्राचीना अङ्गीकुर्वन्ति, तथैव उद्भूतरूपाभाववतः, परन्तूद्भूतस्पर्शवतः वायोः त्वाचप्रत्यक्ष नवीना अङ्गीकुर्वन्ति। अत्र गौरवलाघवचिन्ता न कार्या। अनुभवः एव प्रमाणम्। वायुं स्पृशामीत्येवानुभवः, न तु वायुगतस्पर्शस्त्वगिन्द्रियवेद्यो भवतीति।

प्राचीनास्तु-वायोः त्वाचप्रत्यक्षाङ्गीकारे वायुगतसङ्ख्यायाः वायुपरिमाणस्य च त्वाचप्रत्यक्षापत्तिः, स्पर्शान्यद्रव्यसमवेतप्रत्यक्षं प्रति त्वक्संयुक्तस्पार्शनवद्द्रव्यसमवायस्य हेतुत्वात्। नहि वायुगता सङ्ख्या वायुपरिमाणं वा त्वाचप्रत्यक्षविषयो भवतीति नवीनमते दूषणं वदन्ति। वायुप्रत्यक्षानङ्गीकारे तु न तद्गतसंख्यापरिमाणादेः प्रत्यक्षापत्तिः। अतः वायोः प्रत्यक्षविषयत्वास्वीकार एव श्रेयान् इति प्राचीनमतम्। नवीनास्तु वायुगतसङ्ख्यापरिमाणादेः प्रत्यक्षे न कमपि दोषं पश्यन्ति। प्रभागतसङ्ख्यायाः परिमाणस्य च यथा चाक्षुषप्रत्यक्षं प्राचीना अङ्गीकुर्वन्ति, तथैव वायुगतसङ्ख्यापरिमाणादेः त्वाचप्रत्यक्षमपि भवतीति नवीनानामाशयः।

**त्वङ्मनःसंयोगस्य ज्ञानकारणत्वविचारः**

ज्ञानसमवायिकारणमात्मा। आत्ममनःसंयोगोऽसमवायी। एते द्वे कारणे प्रत्यक्षानुमित्युपमितिशाब्दरूपासु चतसृष्वपि प्रमासु तुल्ये। निमित्तकारणन्तु भिद्यते।

आत्मात्ममनःसंयोगो यथा सर्वविधमपि जन्यज्ञानं प्रति कारणे भवतः, तथा त्वङ्मनःसंयोगः अपि जन्यज्ञानसामान्यं प्रति हेतुरिति प्राचीना वदन्ति। त्वङ्मनःसंयोगस्य ज्ञानकारणत्वस्वीकारे प्रमाणन्तु सुषुप्तिकाले ज्ञानाजननम्। सुषुप्तिकाले त्वङ्मनःसंयोगः नास्ति। अणुरूपं मनः यदा पुरीतन्नामके नाडीविशेषे प्रविशति तदा सुषुप्तिः। यदा ततः निस्सरति तदा जाग्रत्।

सुषुप्त्यव्यवहितप्राक्क्षणे यदि ज्ञानोत्पत्तिः स्यात्, तर्हि तदुत्तरक्षणे तादृशज्ञानमादाय [1]आत्मनः प्रत्यक्षत्वापत्तिः। तथा च सुषुप्तिकाले ज्ञानोत्पत्तिप्रसङ्गः। सुषुप्तिकाले तु ज्ञानं न जायते। अतः त्वङ्मनःसंयोगस्य ज्ञानसामान्यं प्रति कारणत्वं स्वीक्रियते। सुषुप्तिकाले नाड्यां स्थितस्याणुरूपस्य मनसः त्वचा सह संयोगो नास्ति। अतः त्वङ्मनःसंयोगरूपकारणाभावाद् ज्ञानं नोत्पत्तुमर्हतीति वक्तुं शक्यते।

नवीनास्तु—सुषुप्त्यव्यवहितप्राक्काले ज्ञानोत्पत्तिर्न युक्तिसिद्धा। किञ्च विजातीयात्ममनःसयोगस्यैव ज्ञानोत्पत्तिं प्रति हेतुत्वम्। वैजात्यञ्च परात्ममनःसंयोग-पुरीतत्त्वयवच्छिन्नात्ममनःसंयोगव्यावृत्तम्। अतः त्वङ्मनःसयोगस्य ज्ञानसामान्यकारणत्वाङ्गीकारो नावश्यक इति वदन्ति।

**षड्विधं प्रत्यक्षम्**

चक्षुः, त्वक्, घ्राणं, रसना, श्रोत्रं, मनश्चेतीन्द्रियाणि षडि-

---

1 'योग्यगुणसम्बन्धेनैवात्मनः प्रत्यक्षत्वस्वीकारात्।' दि.
"धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः" का. मु. पृष्ठ१ १७१

त्युक्तम्। तत्र चक्षुःसन्निकर्षाद् जायमानं प्रत्यक्षं चाक्षुषप्रत्यक्षम्। त्वक्सन्निकर्षाद् जायमानं त्वाचप्रत्यक्षम्। घ्राणेन्द्रियसन्निकर्षाद् जायमानं घ्राणजप्रत्यक्षम्। रसनेन्द्रियसन्निकर्षाद् जायमानं प्रत्यक्षं रासनप्रत्यक्षम्। श्रोत्रेन्द्रियसन्निकर्षाद् जायमानं प्रत्यक्षं श्रौत्रम्। मनसा जायमानन्तु मानसम्। एवं करणभेदानुसारेण तज्जन्यानां प्रत्यक्षाणामपि षड्विधत्वम्।

षड्विधमपि प्रत्यक्षं निर्विकल्पकसविकल्पकभेदेन द्विविधम्। चक्षुरादीनामिन्द्रियाणां विषयैः घटादिभिः सह सन्निकर्षानन्तरं तदव्यवहितोत्तरक्षणे निर्विषयकमेव ज्ञानं जायते। तदेव निर्विकल्पकम्। निर्विकल्पकानन्तरं सविकल्पकज्ञान जायते। सविकल्पकज्ञाने विशेष्यता, प्रकारता, संसर्गता चेति त्रिविधा अपि विषयताः वर्तन्ते। निर्विकल्पके एताः तिस्रः अपि विषयताः न सन्ति। अत्र तुरीया विषयता वर्तते इति कल्प्यते।

**निर्विकल्पकस्वीकारे युक्तिः, निर्विकल्पकस्वरूपञ्च**

निर्विकल्पकस्य वैशिष्टयानवगाहित्वात् तस्य प्रत्यक्षत्वं न सम्भवति। परन्तु अनुमेयत्वमेव[1]। विशिष्टवैशिष्टयज्ञाने विशेषणतावच्छेदकप्रकारकं ज्ञानं कारणम्। सविकल्पकज्ञानं विशिष्टवैशिष्टयावगाहि भवति। निर्विकल्पकज्ञानं विशेषणज्ञानविधया सविकल्पकज्ञानं प्रति कारणम्। निर्विकल्पकज्ञाने सन्निकर्षविशेषेण घटघटत्वादीनां समवायादीनाञ्च भानं सम्भवत्येव। परन्तु घटघटत्वादीनां संसर्गतया समवायादीनां भानं न सम्भवत्येव। घटघटत्वादीनां संसर्गतया समवायस्य भानन्तु सविकल्पके। निर्विकल्पकज्ञानन्तु निराकारम्।

**सविकल्पकज्ञानम्**

सविकल्पकज्ञानन्तु 'घटोऽय'मित्याद्याकारकम्। अत्र ज्ञाने घटस्य विशेष्यता घटत्वस्य प्रकारता समवायस्य संसर्गता च।

---

1 'ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते।' का. (कारिका ५८ पूर्वार्धम्)

सविकल्पकज्ञानं विशिष्टज्ञानं भवतीत्यनुभवसिद्धम्। विशिष्टज्ञानं विशेषणज्ञानं विना नोदेति। अतः विशिष्टज्ञानात् पूर्वं विशेषण–ज्ञानं भवितव्यम्। तदेव निर्विकल्पकम्। निर्विकल्पकानन्तरं सविकल्पकज्ञानं जायते।

**षड्विधः इन्द्रियार्थसन्निकर्षः**

इन्द्रियाणामर्थैः सह सन्निकर्षः षड्विधः[2] भवति। संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति।

घ्राणेन्द्रियस्य रूपादिषु मध्ये गन्धस्यैवाभिव्यञ्जकत्वम्, अतः घ्राणेन्द्रियं पार्थिवम्। रसनेन्द्रियस्य रूपादिषु मध्ये रसस्यैवाभि-व्यञ्जकत्वाद्, रसनेन्द्रियं जलीयम्। चक्षुरिन्द्रियस्य रूपव्यञ्जकत्वात् तैजसत्वम्। त्वगिन्द्रियस्य स्पर्शाभिव्यञ्जकत्वाद् वायवीयत्वम्। श्रोत्रस्य कर्णविवरवृत्याकाशत्वात् आकाशत्वमेव।

इन्द्रियार्थसन्निकर्षः षड्विधः। संयोगः, संयुक्तसमवायः संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः विशेषणविशेष्य-भावश्चेति।

द्रव्याणां प्रत्यक्षे संयोगः सन्निकर्षः। द्रव्यैः सह द्रव्याणां (चक्षुरादीनामिन्द्रियाणं द्रव्यत्वमित्युक्तं) संयोगस्यैव सम्बन्धत्वात्। द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षं संयुक्तसमवायेन जायते। इन्द्रियसंयुक्ते द्रव्ये गुणकर्मसामान्यानां समवायात्। द्रव्यसमवेतेषु गुणकर्मसु समवेतानां जातीनां प्रत्यक्षं संयुक्तसमवेतसमवायेन सन्निकर्षेण जायते। शब्दप्रत्यक्षे समवायः सन्निकर्षः। शब्दत्व–प्रत्यक्षं समवेतसमवायेन। समवायस्य अभावस्य च प्रत्यक्षं विशे-षणविशेष्यभावसन्निकर्षेण भवति।

---

2 विषयेन्द्रियसम्बन्धो व्यापारः सोपि षड्विधः। का. (कारिका ५८ पूर्वार्धम्)

वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणसन्निकर्षः। द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः सन्निकर्षः द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः सन्निकर्षः कारणमिति विशिष्यैव कार्यकारणभावः। तत्रापि चक्षुःसंयोगे आलोकसंयोगावच्छिन्नत्वं, महत्वावच्छिन्नत्वं, उद्भूतरूपावच्छिन्नत्वञ्च विशेषणं देयम्। तथा चालोकसंयोगावच्छिन्नमहत्वावच्छिन्नोद्भूतरूपावच्छिन्नचक्षुःसंयोगः द्रव्यचाक्षुषे हेतुः। तादृशचक्षुःसंयुक्तसमवायः द्रव्यसमवेतचाक्षुषे हेतुः। तादृशचक्षुःसंयुक्तसमवेतसमवायः द्रव्यसमवेतसमवेतचाक्षुषं प्रति हेतुः। एवं द्रव्यस्पार्शनं प्रति त्वक्संयोगः कारणम्। महत्वावछिन्नत्वं उद्भूतस्पर्शावच्छिन्नत्वञ्च त्वक्संयोगे विशेषणं देयम्। तथाच द्रव्यस्पार्शनं प्रति महत्वावच्छिन्नोद्भूतस्पर्शावच्छिन्नत्वक्संयोगः कारणम्। द्रव्यसमवेतस्पार्शनं प्रति तादृशत्वक्संयुक्तसमवायः कारणम्। द्रव्यसमवेतसमवेतस्पार्शनं प्रति तादृश त्वक्संयुक्तसमवेतसमवायः कारणम्। गन्धप्रत्यक्षे महत्वावच्छिन्नघ्राणसयुक्तसमवायः, गन्धसमवेतगन्धत्वप्रत्यक्षे महत्वावच्छिन्नघ्राणसंयुक्तसमवेतसमवायः च कारणम्। एवं रसप्रत्यक्षे महत्वावच्छिन्नरसनासंयुक्तसमवायः, रससमवेतरसत्वप्रत्यक्षे महत्वावच्छिन्नरसनासंयुक्तसमवेतसमवायः च कारणम्। शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः कारणम्। शब्दसमवेतशब्दत्वप्रत्यक्षे श्रोत्रावच्छिन्नसमवेत समवायः कारणम्। आत्मप्रत्यक्षे मनःसंयोगः कारणम्। आत्मसमवेतप्रत्यक्षे मनःसंयुक्तसमवायः। आत्मसमवेतसमवेतप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम्। समवायप्रत्यक्षे अभावप्रत्यक्षे च इन्द्रियसम्बद्धविशेषणता हेतुः।

वैशेषिकमते समवायस्य प्रत्यक्षत्वं नास्ति। सम्बन्धप्रत्यक्षं प्रति यावत्संबन्धिप्रत्यक्षं हेतुः। समवायस्यैकतया एकदा भाविभूतसकलाश्रयव्यक्तीनां प्रत्यक्षं न सम्भवति। अत एव तैः समवायस्य प्रत्यक्षत्व नाङ्गीकृतम्।

न्यायमते तु सम्बन्धप्रत्यक्षं प्रति यावत्सम्बन्धिप्रत्यक्षस्य हेतुत्वं नास्ति। अनुगतस्य सम्बन्धस्य निर्वक्तुमशक्यत्वात्। परन्तु संयोगप्रत्यक्षं प्रति यावत्सम्बन्धिप्रत्यक्षस्य हेतुत्वं वर्तते। अत एव समवायः एतेषां मते प्रत्यक्षविषयः। अत्र सन्निकर्षः इन्द्रियसम्बद्धविशेषणता।

अभावप्रत्यक्षेऽपि इन्द्रियसम्बद्धविशेषणता हेतुः। विशेषणता-सन्निकर्षः नानाविधः। भूतलादौ द्रव्ये घटाभावप्रत्यक्षं संयुक्त-विशेषणतया गृह्यते। रूपादौ गुणे गन्धाद्यभावः संयुक्तसमवेत-विशेषणतया गृह्यते रूपत्वादौ सामान्ये गन्धाद्यभावः संयुक्तसम-वेतसमवेतविशेषणतया गृह्यते। शब्दाभावः श्रोत्रावच्छिन्नविशेषण-तया, कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषण-तया च गृह्यते। कत्वाद्यवच्छिन्नाभावे गन्धाभावः श्रोत्रावच्छिन्न विशेषणतया, घटाभावादौ पटाभावः संयुक्तविशेषणविशेषणतया च गृह्यते। एते सर्वे विशेषणतासन्निकर्षाः विशेषणतात्वेन धर्मेणैक इति बुद्ध्या षष्ठः सन्निकर्षः विशेषणतासन्निकर्ष इत्युक्तम्। अन्यथा षोढा सन्निकर्ष इति प्राचीनानामुक्तिः व्याहन्येत।

**सन्निकर्षमधिकृत्य सौगतमतम्**

सौगतानां मते ज्ञानातिरिक्तस्य बाह्यविषयस्यास्वीकारात्, सन्निकर्षः न सम्भवति। तेषाम्मते ज्ञानस्याकारो विषयः। अतः विषयस्य ज्ञानस्वरूपात्मकत्वम्। अतश्च सविकल्पकं ज्ञानं न प्रमा। स्वप्नज्ञानवत् तस्य भ्रमत्वम्।

**तत्रैव भाट्टमतम्**

भाट्टानां मते इन्द्रियार्थसन्निकर्षः त्रिविधः[1] संयोगः, संयुक्तसम-वायः, संयुक्तसमवेतसमवायश्चेति। द्रव्यप्रत्यक्षे संयोगः सन्निकर्षः, द्रव्यसमवेतप्रत्यक्षे संयुक्तसमवायः, द्रव्यसवेतसमवेतप्रत्यक्षे संयुक्तसम-वेतसमवायः च सन्निकर्षः। एषाम्मते शब्दः द्रव्यं भवति। श्रो-त्रेन्द्रियस्य च दिक्स्वरूपत्वम्।[2] द्रव्ययोः सम्बन्धः संयोग एवेति शब्दस्य श्रोत्रस्य च सन्निकर्षः संयोग एव। शब्दत्वप्रत्यक्षं संयुक्तसमवायेन। अभावप्रत्यक्षं योग्यानुपलब्ध्या भवति। अतः त्रिविधस्यैव सन्निकर्षस्यावश्यकत्वमिति तेषामभिप्रायः।

---

1 भा. चि. पृष्ठं २६

2 अधिगुप्रैषान्तर्गतदिशः श्रोत्र 'मिति लिङ्गाद्दिगात्मकत्वं युक्तम्।'
भा. चि. पृष्ठं १५

'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्' इति प्रत्यक्षलक्षणं जैमिनिनोक्तम्। 'सर्वज्ञात्ममुनिस्तु स्वग्रन्थे अर्थेन्द्रिय-संप्रयोगात् सप्रयुक्तेऽर्थे विज्ञानं प्रत्यक्षम्' इति प्रत्यक्षलक्षणं वदति। सः तस्मिन्नवसरे, 'इदमिन्द्रियमस्यार्थस्य योग्यम्' "अयमर्थः अस्येन्द्रियस्य योग्य' इतीन्द्रियस्यार्थस्य च परस्परं योग्यतालक्षणः सम्बन्धः वर्तते। स एव रूपादिविज्ञानमुपपादयिष्यति। अतः षड्विध-सन्निकर्षस्यावश्यकता[1] नास्तीत्यभिप्रयन्ति।

'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति जैमिनि-सूत्रोक्तं प्रत्यक्षलक्षणं भारद्वाजोद्योतकरैः न्यायवार्तिके "एतदपि[2] संशयाद्युत्पत्तिनिमित्तकत्वाद् अलक्षण"मिति कथनेन त्यक्तम्।

नैयायिकमते शब्दो गुणः[3]। न द्रव्यम्। गुणश्च न निराश्रयस्तिष्ठति। शब्दस्याश्रय आकाशः। श्रोत्रावच्छिन्नाकाश एव श्रोत्रेन्द्रियम्। गुणस्यगुणिनः च मिथः सम्बन्धः समवायः। अतः शब्दप्रत्यक्षं प्रति समवायात्मकसन्निकर्ष, शब्दप्रत्यक्ष प्रति समवेत-समवायात्मकसन्निकर्षश्च हेतुतया स्वीकरणीयम्। अभावप्रत्यक्षे विशेषणविशेष्यभावात्मकसन्निकर्षः हेतुः। अनुपलब्धेः सहकारि-कारणत्वमेव। न प्रमाणान्तरत्वम्। अतः षड्विधः सन्निकर्षः आवश्यकः।

**वेदान्तिमतम्**

वेदान्तिमते ब्रह्म सत्यं जगन्मिथ्या। परन्तु ब्रह्मसाक्षात्का-रानन्तरमेव जगन्मिथ्यात्वज्ञानमुदेति। अतःपर्यन्तं जगतः सत्ता वर्तते। तदेव व्यावहारिकसत्ता। संसारदशायां घटपटादीनां वस्तूनां ज्ञानं जायते। अनधिगताबाधितार्थविषयकं ज्ञानं प्रमा। प्रमाकरणं प्रमाणम्। तानि च प्रमाणानि षट् — प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः अर्थापत्तिः, अनुपलब्धिश्चेति। तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्।

---

1 प्र. ल. पृष्ठम् ८-९ 2 न्या. वा. पृष्ठम्-४५

3 'शब्दो गुणः चक्षुर्ग्रहणायोग्य - बहिरिन्द्रियग्राह्यजातिमत्वात् न्या. सि. मु. पृष्ठम् १४२

प्रत्यक्षप्रमा च चैतन्यमेव। चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्तिः इन्द्रियसन्निकर्षादिना जायत इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते, ज्ञानावच्छेदकत्वाच्च ज्ञानत्वोपचारः।

अन्तःकरणं मनः। तच्च सावयवम्[1]। वृत्तिरूपज्ञानञ्च मनसः धर्मः[2]। कामादेरपि मनोधर्मत्वम्। अयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् यथा 'अयो दहति' इति व्यवहारः, तथा आत्मनः ज्ञानाश्रयत्वाभावेपि ज्ञानाश्रयमनसः तादात्म्याध्यासाद् 'अहमिच्छामि', 'अहं जानामि' 'अहं बिभेमी'त्यादिव्यवहारः।

अन्तःकरणं नेन्द्रियम्[3]। विषयचैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यञ्चेति चैतन्यं त्रिविधम्। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्। अन्तःकरणवृत्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्। अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्। अत्र प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदः प्रत्यक्षत्वप्रयोजकः। यथा तडागोदकं छिद्रान्निर्गत्य कुल्यादिद्वारा केदारान् प्रविश्य तथैव चतुष्कोणाद्याकारं भवति, तथा तैजसमन्तकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेश गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। 'अयं घट' इत्यादिप्रत्यक्षस्थले च घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात् तदुभयावच्छिन्नं चैतन्यमेकमेव। तथा 'चायं घट' इति घटप्रत्यक्षस्थले घटाकारवृत्ते घटसंयोगितया घटावच्छिन्नचैतन्यस्य तद्वृत्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वम्।

'पर्वतो वह्निमान्' इत्यादिज्ञाने वह्न्यंशे परोक्षं पर्वतांशेऽपरोक्षम्। पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तकरणवृत्यवच्छिन्नचैतन्याभेदात्; वह्न्यंशे तु अन्तःकरणवृत्तिनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य

---

1 मनसः सादित्वञ्च 'तन्मनोऽसृजत' इत्यादि श्रुतेः।

2 'कामः सङ्कल्पोविचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव' इति श्रुतिः। धीशब्देन वृत्तिरूपं ज्ञानमभिधीयते।

3 'इन्द्रियेभ्यः परा ह्यार्थाः, अर्थेभ्यश्च परं मनः' इत्यादिश्रुत्यां मनसः अनिन्द्रियत्वावगमः।

प्रमाणचैतन्यस्य च परस्परं भेदात्। एकत्र ज्ञाने परोक्षत्वापरोक्ष-त्वयोरभ्युपगमे तयोः जातित्वं न स्यादिति दोषारोपोऽकिञ्चित्करः। समवायासिद्ध्या, ब्रह्मभिन्ननिखिलप्रपञ्चस्यानित्यतया च नित्यत्वसम-वेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्च।

संयोगः, संयुक्ततादात्म्यं, संयुक्ताभिन्नतादात्म्यं, तादात्म्यं, अभिन्नतादात्म्यम् -- एते पञ्च सन्निकर्षाः।

समवायात्मकं सम्बन्धं वैदान्तिका नाभ्युपगच्छन्ति। भाट्टाना-मिवैषाम्मतेऽपि अभावज्ञानं योग्यानुपलब्धिरूपप्रमाणान्तरेण। अतः नैयायिकैः स्वीकृतस्य विशेष्यविशेषणभावाख्यस्य षष्ठस्य सन्निकर्षस्य नावश्यकता।

एतन्मते सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षं द्विविधम्। सविकल्पकं वैशिष्ट्यावगाहि ज्ञानम्। यथा 'घटमहं जानामी'-त्यादिज्ञानम्। निर्विकल्पकं हि संसर्गानवगाहिज्ञानम्। यथा 'सोऽयं देवदत्तः' 'तत्त्वमसि' इत्यादिज्ञानम्।

'सोऽयं देवदत्तः' 'तत्त्वमसि इत्यादिवाक्यजन्यं ज्ञानं शाब्दमेव, न प्रत्यक्षं इन्द्रियाजन्यत्वाद् इति शङ्का न कार्या। एषाम्मते प्रत्यक्षे इन्द्रियजन्यत्वं न तन्त्रं, किन्तु योग्यवर्तमानविषयकत्वे सति प्रमाण-चैतन्यस्य विषयचैतन्याभिन्नत्वम्। वाक्यजन्यज्ञानस्य पदार्थसंसर्गा-वगाहितया 'सोऽयं देवदत्त' इत्यादि वाक्यजन्यं ज्ञानं संसर्गानवगाहि-ज्ञानस्य निर्विकल्पकस्य कथमुदाहरणमित्यशङ्कात्याश न कार्या। वेदान्तिमते वाक्यजन्यज्ञानविषयत्वे पदार्थसंसर्गत्वं न तन्त्रं, किन्तु तात्पर्यविषयत्वम्। 'तत्त्वमसि' इत्यादौ विशुद्धं ब्रह्म तात्पर्य-विषयः न संसर्गः।

इन्द्रियजन्यं इन्द्रियाजन्यमित्यन्यप्रकारेणापि प्रत्यक्षमेषाम्मते द्विधा विभक्तुं शक्यते। सुखादिज्ञानमिन्द्रियाजन्यम्। मनसः इन्द्रियत्वानभ्युपगमात्। चक्षुस्त्वक्घ्राणरसनश्रोत्रेन्द्रियेषु घ्राण-रसनत्वगिन्द्रियाणि स्वस्थानस्थितान्येव गन्धरसस्पर्शोपलम्भान् जन-यन्ति। चक्षुः श्रोत्रे तु विषयदेशं गत्वा स्वविषयौ गृह्णीतः।

श्रोत्रस्यापि चक्षुरादिवद् भेर्यादिदेशगमनसम्भवात्। अत एव 'भेरीशब्दो मया श्रुत' इत्यनुभवोऽप्युपपद्यते। वीचीतरङ्गन्यायेन कर्णशष्कुलीप्रदेशेऽनन्तशब्दोत्पत्तिकल्पनायां गौरवम्॥

## नैयायिकमतरीत्या वेदान्तिमतखण्डनम्

अन्तःकरणं मनः सावयवमिति कथनमयुक्तम्। तस्याणुरूपत्वात्। युगपज्ज्ञानानुत्पत्तिः मनस अणुत्वे लिङ्गम्। चाक्षुषादीनां ज्ञानानामेककालोत्पत्तिः नास्तीत्यनुभवसिद्धम्। तत्र नानेन्द्रियाणां सत्यपि विषयसन्निधाने यत्सम्बन्धादेकेनेन्द्रियेण ज्ञानमुत्पद्यते, यत्सम्बन्धाभावात् परैरिन्द्रियैः ज्ञानं नोत्पद्यते तत् मनस अणुत्वे एवोपपद्यते।

मनसः विभुत्वमपि न सम्भवति। विभुत्वं नाम सर्वमूर्तद्रव्यसंयोगित्वम् मनसः विभुत्वे इन्द्रियमनःसंयोगस्य सर्वदा अस्तित्वं वक्तव्यम्। आत्मनः विभुत्वाद् आत्ममनःसंयोगः सर्वदा वर्तते। मनसः अपि विभुत्वे इन्द्रियमनःसंयोगोऽपि सर्वदा वर्तते। तथा च नानेन्द्रियाणां विषयसन्निधाने नानेन्द्रियैः एकदा ज्ञानोत्पत्त्यापत्तिः। किञ्चात्ममनःसंयोगः कथं जायत इति वक्तुमशक्यम्। संयोगः क्रियाजन्यः भवति। आत्मनः विभुत्वात् तस्मिन् कर्म न सम्भवति मनस अपि विभुत्वे तस्मिन्नपि क्रिया न स्यात्।

नानेन्द्रियाणां विषयसन्निधाने सत्यपि, अदृष्टविशेषरूपोधकविलम्बाद् युगपज्ज्ञानोत्पत्तिः न सम्भवति इति वादो नादर्तुं शक्यते। दृष्टसामग्रीसत्त्वेऽपि अदृष्टविलम्बात् कार्यविलम्बाङ्गीकारो नोचितः। अदृष्टविलम्बस्य कार्यविलम्बाङ्गीकारे तु चाक्षुषं प्रत्यदृष्टविशेषः कारणं, चाक्षुषाभावः अदृष्टविशेषाभावप्रयुक्त इत्यपि वक्तुं शक्यतया कारणसामग्रीविलोपप्रसङ्गः।

दीर्घशष्कुलीभक्षणादौ, नानावधानभाजाञ्च युगपद् नानेन्द्रियजन्यज्ञानोत्पत्तिः सम्भवत्येवेत्याशङ्का अस्थानस्था। तत्र यौगपद्यप्रत्ययो भ्रमः। मनसः अतिशयितवेगवशाद् वस्तुतः क्रमिकानामपि

यौगपद्यप्रतीतिः। वेगयुक्तेन मनसा नानेन्द्रियसम्बन्धाद् नाना ज्ञानोत्पत्तिः।

मनसः सङ्कोचे एकेन्द्रियमात्रसम्बन्धाद् एकमेव ज्ञानं, विकासे तु नानेन्द्रियैर्मनसः सम्बन्धाद् युगपन्नानाज्ञानानामुत्पत्तिरित्यपि न शक्यं वक्तुम्। नानावयवतन्नाशादिकल्पने गौरवात्। अतः मनस अणुरूपत्वमेव युक्तम्।

तादृशमणु मनश्चान्तरेन्द्रियम्।

समवायसम्बन्धश्चावश्यं स्वीकरणीयः। अवयवावयविनोः गुण-गुणिनोः, क्रियाक्रियावतोः, जातिव्यक्त्योः, विशेषनित्यद्रव्ययोश्च सम्बन्धः समवायः। समवायस्यास्वीकारे 'यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारण'मिति समवायिकारणव्यवस्था न स्यात्। अतः समवायसम्बन्धः स्वीकर्तव्यः।

'पर्वतो वह्निमान्' इत्यादौ पर्वतांशे प्रत्यक्षं, वह्न्यंशे परोक्षमिति परस्परविरुद्धयोः प्रत्यक्षत्वपरोक्षत्वयोः एकस्मिन् ज्ञाने स्वीकारो न युज्यते। साङ्कर्यरूपजातिबाधकसद्भावात् प्रत्यक्षत्वस्य परोक्षत्वस्य च जातित्वं न सिद्ध्येत्।

**अलौकिकसन्निकर्षाः**

न्यायमते सविकल्पकप्रत्यक्षं लौकिकमलौकिकञ्चेति द्विविधम्। लौकिकसन्निकर्षेण जायमानं प्रत्यक्षं लौकिकप्रत्यक्षम्। संयोगसंयुक्त-समवायादयः षट् लौकिकसन्निकर्षाः। ते पूर्वमुक्ताः अलौकिकसन्निकर्षेण जायमानंप्रत्य क्षमलौकिकप्रत्यक्षम्। अलौकिकसन्निकर्षश्च सामा-न्यलक्षणा, ज्ञानलक्षणा, योगजधर्मश्चेति त्रिविधः।

**सामान्यलक्षणा**

'अयं धूम' इति चाक्षुषप्रत्यक्षानन्तरं 'धूमा' इति सकल-धूमविषयकं ज्ञानं जायते। पुरोवर्तिधूमे एव चक्षुःसन्निकर्षः वर्तते। अतीतेष्वनागतेषु व्यवहितेषु च धूमेषु चक्षुःसन्निकर्षो नास्ति। तथापि सकलधूमविषयकं प्रत्यक्षं जातम्। प्रत्यक्षं सन्निकर्षं विना

नोत्पत्तुमर्हति। अत्र सकलधूमेषु धूमत्वरूपसामान्यमेव प्रत्यासत्तिः। अत अत्र सामान्यलक्षणाप्रत्यासत्या सकलधूमविषयकं प्रत्यक्षम्।

प्राचीना नवीनाश्च नैयायिका सामान्यलक्षणाप्रत्यासत्तिमङ्गी-कुर्वन्ति। परन्तु अत्र ज्ञायमानं सामान्यं प्रत्यासत्तिरिति प्राचीना वदन्ति। सामान्यज्ञानं प्रत्यासत्तिरिति तु नवीनाः।

ज्ञायमानं सामान्यं प्रत्यासत्तिरिति मते इन्द्रियसम्बद्धविशेष्यक-ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः। 'अयं घट' इति प्रत्यक्षज्ञाने घटत्वं प्रकारः। घटः विशेष्यम्। चक्षुरिन्द्रियेण सम्बद्धः घटः। सः 'अयं घट' इति ज्ञाने विशेष्यम्। तत्र ज्ञाने घटत्वं प्रकारः। तद् घटत्वमेवात्र प्रत्यासत्तिः।

अत्र सामान्यमिति पदे नन्यायवैशेषिकदर्शनेषु प्रसिद्धं जातिरिति पदेनापि व्यवह्रियमाणं चतुर्थं पदार्थं नोद्दिशति। समानानां भावः सामान्यमिति व्युत्पत्या घटपटादयोऽनित्या अपि सामान्यपदेनात्रो-द्दिष्टाः। यत्रैको घटः संयोगेन भूतले, समवायेन कपाले वा ज्ञातः, तत्र तदनन्तरं सर्वेषामेव तद्घटवतां ज्ञानं जायते। अत्र घट एव सामान्यम्। तथा च इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं सामान्यं क्वचिद् नित्यं धूमत्वादि क्वचिच्चानित्यं घटादि।

ज्ञायमानं सामान्यं प्रत्यासत्तिरिति वदतां प्राचाम्मते काचना-नुपपत्तिः वर्तते। तदित्थम् एको घटः संयोगेन भूतले ज्ञातः। तद-नन्तरं सर्वेषां तद्घटवतां ज्ञानम्। ततः तद्घटो नष्टः। घटे नष्टेऽपि तद्घटवतः स्मरणे जाते सर्वेषां तद्घटवतां ज्ञानमनुभव-सिद्धम्। किन्तु ज्ञायमानं सामान्यं प्रत्यासत्तिरिति मते ज्ञानवि-षयस्य घटरूपसामान्यन्य नष्टत्वात् तेन सर्वेषां तद्घटवतां ज्ञानं न स्यात्। अतः नवीनाः सामान्यज्ञानं प्रत्यासत्तिरिति स्वीकुर्वन्ति। सामान्यज्ञानस्य प्रत्यासत्तित्वे सामान्यस्य नष्टत्वेऽपि सामान्यज्ञानस्य सत्त्वात् नानुपपत्तिः।

सामान्यलक्षणारूपालौकिकसन्निकर्षेण अलौकिकप्रत्यक्षे जायमाने, तत्पूर्वं नियमेन यत्किञ्चिद्धर्मिणि लौकिकसन्निकर्षद्वारा तत्सामान्यस्य लौकिकप्रत्यक्षं भवितव्यम्।

[1]प्राचीनमते' अयं घट' इति सविकल्पकप्रत्यक्षानन्तरमेव धूमा इत्येवं रूपं सकलधूमविषयकमलौकिकप्रत्यक्षम्। नवीनमते तु निर्विकल्पकानन्तरं 'अयं घट' इति सविकल्पककाल एव सन्निकृष्टघटांशे लौकिकमन्यघटांशेऽलौकिकं ज्ञानं जायत इत्यङ्गीक्रियते।

**ज्ञानलक्षणा**

प्रथमतः चन्दनखण्डस्य दर्शने, चक्षुरिन्द्रियेण तस्य चन्दनखण्डस्य प्रत्यक्षं जायते, घ्राणेन्द्रियेण चन्दननिष्ठसौरभस्य च प्रत्यक्षं जायते। पुनः कदाचिद् दूरे यदा चन्दनखण्डो दृश्यते, तदा 'सुरभि चन्दनखण्ड'मिति प्रत्यक्षं जायते। अत्र सौरभस्य भानं चक्षुरिन्द्रियेण न सम्भवति। दूरे दर्शनाद् घ्राणेन्द्रियसन्निकर्षो नास्ति। प्रत्यक्षं जातं, लौकिकसन्निकर्षश्च नास्तीति कश्चनालौकिकसन्निकर्षः कल्प्यः। वस्तुतः तत्र सौरभस्य स्मरणमेव स्मरणञ्च ज्ञानमेव। अत एवात्र प्रत्यासत्तेः ज्ञानलक्षणेति नाम। नचायं सामान्यलक्षणया चरितार्थः, यतस्सामान्यलक्षणा हि आश्रयस्य प्रत्यक्षं जनयति, ज्ञानलक्षणा तु यस्य ज्ञानं जायते, तस्यैव प्रत्यासत्तिः।

**योगजधर्मः**

युक्तयुञ्जानभेदाद् योगजधर्मरूपालौकिकसन्निकर्षस्य द्वैविध्यं वर्तते। युक्तयुञ्जानरूपयोगिद्वैविध्याद् धर्मस्यापि द्वैविध्यम्। युक्तस्य तावद् योगजधर्मसहायेन आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति, द्वितीयस्य चिन्ताविशेषोऽपि सहकारी।

एवं त्रिविधादलौकिकसन्निकर्षाद् अलौकिकप्रत्यक्षं जायत इति न्यायसिद्धान्तः। [2]भाट्टमीमांसकाः सामान्यलक्षणा ज्ञानलक्षणा इति द्वावलौकिकसन्निकर्षौ स्वीक्रियन्ते। वैदान्तिका ज्ञानलक्षणाँ नाङ्गीकुर्वन्ति। तेषां मते ज्ञानलक्षणाङ्गीकारे, तेनैव पर्वतादौ धूम-

---

1 न्या. द. वि. पृष्ठम् १३०

2 भा. चि. "इदञ्चावश्यकम्। अन्यथा व्यवहारविषयघटे शक्तिग्रहे सर्वव्यक्तीनामप्रत्यक्षतया सर्वत्र शक्तिग्रहो न स्यात्।" (पृष्ठम् २१)

दर्शने वह्निज्ञानस्यापि सम्भवेन अनुमित्युच्छेदापत्तिः। अतः तैः ज्ञानलक्षणा नाङ्गीक्रियते।

अलौकिकसन्निकर्षाणां स्वीकार आवश्यको वा नवेति चिन्तेदानीं सङ्गता। तत्र सामान्यलक्षणात्मकालौकिकसन्निकर्षस्वीकारस्यावश्यकता मणिकृता प्रत्यपादि। तामेव युक्तिं श्रीविश्वनाथपञ्चाननो मुक्तावल्यां निजनिर्मितायां स्पष्टङ्करोति। तदित्थम् — महानसे वह्निधूमयोः साहचर्यदर्शनानन्तरं 'धूमो वह्निव्याप्यो न वे'ति संशयो जायते। तादृशस्य संशयस्योत्पत्तिः कथमुपपद्यते। प्रत्यक्षदृष्टे धूमे संशयो नोपपद्यते। अन्येषां धूमानां तत्राभावाद् तेषामपि ज्ञानं न सम्भवति। अतः धूमदर्शनानन्तरं, सर्वेषां धूमानां प्रत्यक्षाभावे तादृशसंशयस्योत्पत्तिः न स्यात्। संशयस्तूत्पद्यते। अतः सर्वेषां धूमानां प्रत्यक्षं जायत इत्यङ्गीकर्तव्यम्। तच्च प्रत्यक्षमलौकिकमेव। तस्मिन्नलौकिकप्रत्यक्षे धूमत्वात्मकसामान्यमेवालौकिकसन्निकर्षः।

एवमेव घटादौ विषये 'अयं घटपदवाच्य' इति शक्तिग्रहो जायते। शक्तिग्रहश्चैकस्मिन्नेव। एकस्यामेव गोघटादिव्यक्तौ शक्तौ गृहीतेऽपि अपरासु गोघटदिव्यक्तिष्वपि शक्तिज्ञानं जायते। तच्च सकलानां गोघटादिव्यक्तीनां ज्ञानं गोत्वघटत्वाद्यात्मकसामान्यस्वरूपां, सामान्यज्ञानस्वरूपां वा सामान्यलक्षणाप्रत्यासत्तिं विना नोपपद्यते। अतोऽपि सामान्यलक्षणाप्रत्यासत्तिस्वीकार आवश्यकः।

एवं ज्ञानलक्षणाया स्वीकरोऽप्यवश्यकः। शुक्ता'विदं रजत'मिति, रज्जा'वयं सर्प' इति च भ्रमात्मकं ज्ञानं जायत इति सर्वेषामनुभवसिद्धम्। तत्र चक्षुरिन्द्रियस्य शुक्त्यादिनैव लौकिकसन्निकर्षः। न रजतादिना। ज्ञाने रजतत्वं भासते च। अतः कश्चन सन्निकर्षः कल्प्यः। नैयायिकैरत एव ज्ञानलक्षणात्मकः अलौकिकसन्निकर्षः कल्प्यते। शुक्ता'विदं रजत'मित्यादिभ्रमात्मके ज्ञाने रजतत्वभानं ज्ञानलक्षणया।

एवं प्रत्यभिज्ञायाम्, अनुव्यवसाये, अभावप्रत्यक्षे च ज्ञानलक्षणासन्निकर्षः स्वीकरणीयः। 'सोऽयं देवदत्त' इत्यादिप्रत्यभिज्ञायां 'स' इति तच्छब्देन तत्ता 'अय'मितीदंशब्देनेदन्ता च देवदत्ते विशेषणतया

भासते। तत्र तत्तारूपं विशेषणन्तु देवदत्तस्य देशान्तरस्थत्वं कालान्तरस्थत्वं च ज्ञापयति। तद् देशान्तरस्थत्वं कालान्तरस्थत्वञ्च लौकिकसन्निकर्षेण चक्षुषा सह न सम्बध्यते। तस्याः देशान्तरस्थत्वरूपायाः कालान्तरस्थत्वरूपायाश्च तत्तायाः देवदत्तस्य विशेषणरूपायाः चक्षुषा सह सन्निकर्षं साधयितुं स्मृतिरूपो ज्ञानलक्षणसन्निकर्षोऽवश्यं स्वीकरणीयः।

'घटमहं जानामी'त्याद्यनुव्यवसाये यथा'यं घट' इत्यादिरूपव्यवसायज्ञानं विषयो भवति, तथा व्यवसायज्ञानविषयभूतं घटादिकमपि। घटादिविषयेण सह तु मनसो लौकिकसन्निकर्षो न सम्भवतीति अलौकिकसन्निकर्ष एवात्र स्वीकरणीयः। तेन चालौकिकसन्निकर्षेण मनः बहिरिन्द्रियनिरपेक्षं सत् घटादिबाह्यपदार्थेन सन्निकृष्यते। अयमलौकिकसन्निकर्षः ज्ञानलक्षणसन्निकर्षः।

'भूतले घटो नास्ति' इत्यादावभावप्रत्यक्षेऽपि ज्ञानलक्षणसन्निकर्षः स्वीकरणीयः। इन्द्रियासन्निकृष्टः पदार्थश्च प्रत्यक्षस्य विषयो भवितुं नार्हति। प्रकृते तु 'भूतले घटाभाव' इत्यादावभावप्रत्यक्षे प्रतियोगिनो घटस्य भानं भवतीति चक्षुषा सह तस्य सन्निकर्षः स्वीकरणीयः। प्रतियोगिनो घटादेः स्मरणात्मकं ज्ञानमेवात्र सन्निकर्षः।

योगजसन्निकर्षश्च अयोगिनां साधारणजनानां न सम्भवतीति तस्य सन्निकर्षस्यालौकिकत्वम्। स च योगाभ्यासजनितः श्रुतिपुराणादिषु प्रसिद्धः।

**अथ अनुमानम्**

"अथ तत्पूर्वकं त्रिविध[1]मनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टञ्च" इति सूत्रेण गौतमः तत्पूर्वकत्वमनुमानस्य लक्षणं वदति। तत्पूर्वकत्वमित्यत्र तच्छब्दः प्रत्यक्षं परामृशति। प्रत्यक्षपूर्वकत्वमनुमानस्य लक्षणं वदति। अत्रानुमानपदस्यानुमितिरित्यर्थः। धूमेन हेतुना वह्नेरनु-

1 न्या. सू. १. १. ५

मितिर्भवति। पक्षे पर्वते वह्न्यनुमितेः पूर्वं तत्र धूमस्य दर्शनमत्यन्तापेक्षितम्। तच्च दर्शनं त्रिकृत्वः भवति। प्रथमं तावत् महानसादौ वह्निधूमयोः दर्शनम्। बहुकृत्वः वह्निधूमयोः साहचर्यदर्शनाद् यत्र यत्र धूमस्तत्र तत्राग्निरिति व्याप्तिं गृह्णाति। तदनन्तरं पर्वतसमीपं गतः पर्वते धूमं पश्यति। एतच्च द्वितीयदर्शनम्। ततः व्याप्तिं स्मरति 'यत्र यत्र धूमस्तत्र तत्राग्नि'रिति। तदनन्तरं वह्निव्याप्तिविशिष्टः धूमः अत्र पर्वते इति पुनः धूमदर्शनम्। तदनन्तरं 'पर्वतो वह्निमान्' इत्यनुमितिः जायते। तथा च तत्पूर्वकत्वात्मकलक्षणं अनुमितेरुपपद्यते।

'व्यापारस्तु[1] परामर्शः करणं व्याप्तिधीर्भवेद्' इत्युक्तदिशा व्याप्तिज्ञानस्यानुमितिकरणत्वं श्रीविश्वनाथपञ्चाननमते। तथा च व्याप्तिज्ञानमनुमानम्। व्याप्तिज्ञानञ्च स्मरणरूपम्। यदा व्याप्त्यनुभवजन्यः संस्कारो धूमदर्शनेनोद्बुद्धः भवति तदा व्याप्तिस्मरणं जायते। व्याप्तिस्मरणानन्तरं व्याप्तिबिशिष्टस्य होतोः पक्षधर्मताज्ञानम्। अयमेव लिङ्गपरामर्श इत्युच्यते। लिङ्गपरामर्शानन्तरमनुमितिः। अत्र लिङ्गपरामर्शस्य व्याप्तिज्ञानजन्यत्वाद्, व्याप्तिज्ञानजन्यानुमितिजनकत्वाच्च व्यापारत्वम्।

तर्कसंग्रहे[2] अन्नंभट्टाः लिङ्गपरामर्शस्य अनुमितिकरणत्वं वदति। अत एषाम्मते लिङ्गपरामर्शोऽनुमानम्। तर्कभाषाकारा[3] अपि लिङ्गपरामर्शोऽनुमानमिति वदन्ति।

मुक्तावलीप्रकाशे[4] महादेवभट्टाः 'अत्र नव्या' इत्युपक्रम्य" "व्याप्तिज्ञानस्य परामर्शव्यापकतया अनुमितिं प्रति हेतुत्वमेव नास्ति, कुतः करणत्वम्? अन्यथा कपालादेर्घटं प्रति द्रव्यत्वेन हेतुतापत्तिः, तस्मादनुमितिं प्रति मनस्त्वेनैव करणत्वमित्याहुः" इति वदन्ति। प्रत्यक्षपरिच्छेदेऽपि[5] अनुमितिमुपमितिञ्च प्रति मनस्त्वेन करणत्वमस्तु इति मतं तेनोक्तम्।

---

1 का. मु. पृष्ठम् २०९ — २१०

2 त. सं. पृष्ठम् ५३ 3 त. भा. पृष्ठम् ३९

4 दि. अथवा प्र. पृष्ठम् २११ 5 दि. पृष्ठम् १७८

एवञ्चानुमितिकरणमनुमानमित्यनुमानलक्षणम् । अनुमानञ्च व्यापारवत्कारणं करणमिति पक्षे व्याप्तिज्ञानम् । मुक्तावलीकारः श्रीविश्वनाथपञ्चाननः व्याप्तिज्ञानं करणमिति पक्षं स्वीकरोति । फलायोगव्यवच्छिन्नं कारणं करणमिति पक्षे परामर्शोत्तरं, तदव्यवहितोत्तरक्षण एवानुमितिर्जायत इति परमर्शः अनुमितिकरणम् । तथा च परामर्शोऽनुमानम् । तर्कसंग्रहकारः[1] अन्नंभट्टः परामर्शं अनुमानमित्यङ्गीकरोति । तर्कभाषाकारः केशवमिश्रः, न्यायवार्तिककारः[2] भारद्वाजोद्योतकरश्च परामर्शस्यानुमानत्वमङ्गीकुरुतः ।

अनुमितिरित्यस्य अनु पश्चात् मितिः ज्ञानमित्यर्थः । प्रत्यक्षप्रमाणेन कस्यचित् पदार्थस्य ज्ञानाद् अनन्तरं तत्सम्बन्धिनः पदार्थान्तरस्य ज्ञानमनुमितिः । यथा पर्वते धूमप्रत्यक्षानन्तरं तस्मिन्नेव पर्वते तद्धूमसम्बन्धी तद्धूमव्यापको वह्निरस्तीति ज्ञानं लभ्यते सा अनुमितिः ।

**परामर्शः**

अनुमितेरव्यवहितपूर्ववर्ति कारणं भवति परामर्शः । स एव लिङ्गपरामर्श इत्युच्यते । व्याप्तिविशिष्टः हेतुः लिङ्गम् । व्याप्तिविशिष्टस्य हेतोः पक्षवृत्तित्वज्ञानं परामर्शः । व्याप्तिश्च हेतुसाध्ययोः संम्बन्धः । येन पक्षे साध्यं साधयति स हेतुः । हेतुना यत् पक्षे साधयति तत् साध्यम् । हेतुना साध्यं यत्र साधयति स पक्षः ।

पर्वते धूमं दृष्ट्वा 'अत्र वह्निरस्ती'त्यनुमीयते । एषा चानुमितिः यत्र यत्र धूमस्तत्र तत्र वह्निरिति धूमवह्न्योः परस्परसाहचर्यग्रहं विना नोपपद्यते । स च साहचर्यग्रहः महानसचत्वरयज्ञशालादौ बहुकृत्वः वह्निधूमयोः सहचारदर्शनेन केवलसहचारदर्शनन्तु न व्याप्तिग्राहकम् । परन्तु व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्यैव व्याप्तिग्राहकत्वम् ।

---

1 त. सं. पृष्ठम् ५३ "स्वार्थानुमितिपरार्थानुमित्योः लिङ्गपरामर्श एव करणम् । तस्माल्लिङ्गपरामर्शोऽनुमानम् ।"

2 "प्रधानोपसर्जनताविवक्षायां लिङ्गपरामर्श इति न्याय्यम् ।" न्या. वा. पृष्ठम् ४७

धूमवह्न्योः परस्परसाहचर्यं गृहीतवान् कश्चित् पर्वतसमीपं गत्वा तत्र धूमं पश्यति। पर्वते पक्षे हेतोः धूमस्य ज्ञानं चाक्षुषात्मकं तस्य जायते। एतदेव पक्षधर्मताज्ञानम्। तदनन्तरं यत्र यत्र धूमस्तत्र तत्राग्निरिति व्याप्तिं स्मरति। ततः वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं जायते। अयमेव लिङ्गपरामर्शः। प्रथमं धूमदर्शने पक्षधर्मताज्ञानमात्रं जायते। ततः व्याप्तिस्मरणानन्तरं व्याप्तिवैशिष्ट्यं हेतौ ज्ञात्वा तादृशहेतुः पक्षे वर्तत इति ज्ञायते। अतः परामर्शः विशिष्टवैशिष्ट्यावगाही भवति। एतस्य विशिष्टवैशिष्ट्यावगाहिज्ञानस्य अनुमितिं प्रति हेतुत्वमवश्यमभ्युपगन्तव्यम्। 'यत्र यत्र धूमस्तत्र तत्राग्नि'रिति व्याप्तिज्ञानेन सामान्यतः धूमवर्तिदेशे वह्निः भवतीत्येव ज्ञानं भवितुं शक्यम्। अतो'ऽत्र वह्निरस्ति' अथवा'यं वह्निमान्' इत्यनुमित्युद्भवार्थं वह्निव्याप्तिविशिष्टस्य धूमस्य पर्वतादिवृत्तित्वज्ञानमावश्यकम्। एतद् विशिष्टवैशिष्ट्यज्ञानमेव लिङ्गपरामर्शः। स एवानुमितिं प्रति चरमं कारणम्।

**व्याप्तिः**

साहचर्यनियमो[1] व्याप्तिः। साहचर्यस्य नियमः साहचर्यनियमः। सह[2] चरत इति सहचरौ समानाधिकरणौ, एकाधिकरणवृत्ती, तयोर्भावः साहचर्यं, सामानाधिकरण्यम्। तथा च हेतु[3]समानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः। हेतुः धूमादिः। हेत्वधिकरणं महानसः। तद्वृत्तिः योऽत्यन्ताभावः घटाभावः, तत्प्रतियोगी घटः, तदप्रतियोगी वह्निः। तादृशस्य वह्नेः सामानाधिकरण्यं धूमस्येति धूमः व्याप्तिविशिष्टः। व्याप्तिः हेतोः धर्मः।

मुक्तावल्यां श्रीविश्वनाथपञ्चाननो, 'व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृत' इति कारिकावल्युक्तदिशा साध्यवदन्यावृत्तित्वं व्याप्तिरिति व्याप्तिलक्षणं प्रथमं वदति। ततः केवलान्वयि-

---

1 त. सं. पृष्ठम् ४६

2 तत्रैव। जगन्नाथशास्त्रिकृते तर्कसंग्रहव्याख्यायां निरुक्तौ।

3 त. दी. पृष्ठम् २५७ — २५८

साध्यकस्थले साध्यवदन्यस्याप्रसिद्धत्वाद्, 'सत्तावान् जाते' रित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसम्बन्धेन समवायेन वृत्तेरप्रसिद्धत्वात् च साध्यवदन्यावृत्तित्वं व्याप्तिरिति व्याप्तिलक्षणं न निर्दुष्टमिति हेतोः, 'अथवा[1] हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते' इति हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरिति व्याप्तिलक्षणं परिष्करोति। दीपिकाकृतापि तदेव लक्षणं स्वीकृतम्।

अन्वयव्याप्तिः व्यतिरेकव्याप्तिरिति व्याप्तेर्द्वैविध्यम्। हेतुसाध्ययोः व्याप्तिः अन्वयव्याप्तिः। यथा यत्र यत्र धूमस्तत्राग्निरिति। साध्याभावहेत्वभावयोः व्याप्तिः व्यतिरेकव्याप्तिः यथा यत्र यत्र वह्न्यभावः, तत्र तत्र धूमाभाव इति।

व्याप्तिः हेतोः धर्म इत्युक्तम्। व्याप्तिभेदाद् हेतोरपि भेदः। अन्वयमात्रव्याप्तिको हेतुः केवलान्वयी। व्यतिरेकमात्रव्याप्तिको हेतुः केवलव्यतिरेकी। केचन हेतवः अन्वयव्याप्तियुक्ताः व्यतिरेकव्याप्तियुक्ताश्च भवन्ति। तेऽन्वयव्यतिरेकिणः। एवं हेतोः[2] त्रैविध्यम्।

'घटोऽभिधेयः प्रमेयत्वाद्' इत्यत्र प्रमेयत्वं केवलान्वयी। अत्र यत्र यत्र प्रमेयत्वं तत्र तत्राभिधेयत्वमिति अन्वयव्याप्तिरेव वर्तते। यत्र यत्राभिधेयत्वाभावः तत्र तत्र प्रमेयत्वाभाव इति वक्तुं न शक्यते, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।

अत्र व्यतिरेकदृष्टान्तो नास्ति।

'जीवच्छरीरं सात्मकं, प्राणादिमत्त्वाद्' इत्यत्र प्राणादिमत्त्वात्मकहेतुः केवलव्यतिरेकी। यद् सात्मकं न भवति, न तत् प्राणादिमत् यथा घट इति व्यतिरेकव्याप्तिरेवात्र वर्तते। यत्र यत्र प्राणादिमत्त्वं, तत्र तत्र सात्मकत्वमित्यन्वयव्याप्तिर्न दृष्टान्ताभावात्।

---

1 का. मु. पृष्ठम् २२० कारिका ६१

2 त. सं. ५३

वह्नौ साध्ये धूमरूपो हेतुरन्वयव्यतिरेकी। यत्र यत्र धूमस्तत्र तत्र वह्निरित्यन्वयव्याप्तिः ; अत्र महानसो दृष्टान्तः। यत्र यत्र वह्न्यभावः तत्र तत्र धूमाभाव इवि व्यतिरेकव्याप्तिः; अत्र महाह्रदो दृष्टान्तः।

व्याप्तिविशिष्टहेतुः लिङ्गम्। लिङ्गस्य त्रैविध्याद् अनुमानस्यापि त्रैविध्यम्। तथा च केवलान्वयि, केवलव्यतिरेकि, अन्वयव्यतिरेकि चेत्यनुमानं त्रिविधम्।

यत्रानुमाने केवलान्वयी हेतुः, तद् अनुमानं केवलान्वयि। यत्र च केवलव्यतिरेकी हेतुः तदनुमानं केवलव्यतिरेकि। यत्र च हेतुरन्वयव्यतिरेकी तदनुमानमन्वयव्यतिरेकि। लिङ्गत्रैविध्याद्नुमानत्रैविध्यम्।

अन्वयव्यतिरेकिणि हेतौ पक्षसत्त्वं, सपक्षसत्त्वं, विपक्षासत्त्वम्, अबाधितत्वम्, असत्प्रतिपक्षितत्वमिति पञ्च धर्माः स्युः। केवलान्वयिनि विपक्षासत्त्वादृते चत्वारो धर्माः स्युः। केवलव्यतिरेकिणि तु सपक्षसत्वादृते चत्वारो धर्माः स्युः।

प्रयोजनदृष्ट्या त्वनुमानं द्विविधम् स्वार्थं, परार्थञ्चेति। तत्र स्वार्थं स्वानुमितिहेतुः। स्वस्यार्थः प्रयोजनं साध्यसंशयनिवृत्तिरूपं यस्मादिति व्युत्पत्या स्वीयसंशयनिवृत्तिप्रयोजनकमनुमानं स्वार्थम्। कश्चन पुरुषः महानसादौ बहुशः सहचारदर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तत्र धूमं पश्यन् व्याप्तिं स्मरति 'यत्र यत्र धूमस्तत्र तत्राग्नि'रिति। ततः व्याप्तिविशिष्टस्य धूमस्य पक्षधर्मत्वग्रहात्मकं 'वह्निव्याप्यधूमवानय' मिति विशिष्टवैशिष्ट्यावगाहिज्ञानं लिङ्गपरामर्शाभिधानं जायते। तदनन्तरं 'पर्वतो वह्निमानित्यनुमितिर्जायते। एतद् स्वार्थानुमानम्।

यत्तु स्वयं धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते तद् परार्थानुमानम्। प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। तत्र साध्यवत्तया पक्षवचनं 'प्रतिज्ञा'। यथा 'पर्वतो वह्निमान्' इति वाक्यम्। लिङ्गप्रतिपादकं पञ्चम्यन्तं वाक्यं

'हेतुः'। यथा 'धूमवत्त्वाद्' इति वाक्यम्। व्याप्तिप्रतिपादकं वाक्य'मुदाहरणम्'। सा च व्याप्तिः केवलान्वयिनि अन्वय-व्याप्तिः केवलव्यतिरेकिणि व्यतिरेकव्याप्तिश्च। अन्वयव्यतिरे-किणि तूभयविधस्यापि व्याप्तेः सम्भवेऽपि, ऋजुत्वादन्वयव्याप्तिरेव सर्वैः प्रयुज्यते। यत्र यत्र धूमस्तत्राग्निः, यथा महानस' इत्युदाहरणवाक्यम्। व्याप्तिविशिष्टलिङ्गप्रतिपादकं वाक्यमुपनयः। यथा 'तथा चाय'मिति। 'तथा वह्निव्याप्यधूमवानयं पर्वत' इत्यर्थः। उदाहरणवाक्येन यद्यन्वयव्याप्तिर्बुध्यते तर्ह्युपनयवाक्येन पक्षे साध्येन सहान्वयव्याप्तिविशिष्टस्य हेतोर्बोधो भवति; उदाहरणवा-क्येन यदि व्यतिरेकव्याप्तिर्बुध्यते तर्हि उपनयवाक्येन पक्षे व्यति-रेकव्याप्तिविशिष्टस्य हेतोर्बोधो भवति। हेतुसाध्यवत्तया पक्षप्रतिपादकं वाक्यं निगमनम्। यथा 'तस्मात्तथे'ति वाक्यम्। तस्मात् पर्वतो वह्निमानित्यर्थः। एवमवयववाक्यैरवान्तरवाक्यार्थज्ञाने जनिते, महावाक्यार्थज्ञानात्[1] परः साध्यं बोधति। एवञ्च परानुमिति-प्रयोजकत्वाद् इदं परार्थानुमानम्। पञ्चावयववाक्यस्य न्यायमिति नाम। तथा च न्यायप्रयोज्यानुमानं परार्थानुमानम्।

### हेत्वाभासाः

हेतूनामाभासाः हेत्वाभासाः, हेतुवदाभासन्ते इति हेत्वाभासा इत्युभयविधमपि हेत्वाभासपदस्य व्युत्पत्तिः दृश्यते। तत्र प्रथम-व्युत्पत्तिस्वीकारपक्षे हेत्वाभासपदस्य हेतुदोषा इत्यर्थः। द्वितीय-व्युत्पत्तिस्वीकारपक्षे तु दुष्टहेतव इत्यर्थः। हेतुदोषाः व्यभिचारः, विरोधः, सत्प्रतिपक्षितत्वम् असिद्धिः बाधश्च। व्यभिचारात्मक--दोषयुक्तः सव्यभिचारः। असावनैकान्तिकेतिनाम्नापि व्यवह्रियते। विरोधाख्यदोषयुक्तः विरुद्धः। असौ साध्याभावस्यैव व्याप्यो भवति, न तु साध्यस्य। सत्प्रतिपक्षितत्वरूपदोषयुक्तः सत्प्रतिपक्षः। अस्य साध्याभावसाधकं हेत्वन्तरं विद्यते। प्रकरणसम इति

---

1 "धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वतो धूमव्यापकवह्निमन्महानस-सदृशो वह्निव्याप्यधूमवत्त्वहेतुकवह्निमदभिन्न" इति महावाक्यार्थज्ञानाकारम् भा. चि पृष्ठम् ३२

नाम्नाप्ययं व्यवह्रियते। असिद्धिरूपदोषयुक्त: असिद्ध:। बाधात्मक-दोषयुक्तो बाधित:। स एव कालात्ययापदिष्ट इत्यप्युच्यते। तत्र सव्यभिचार: साधारणासाधारणानुपसंहारिभेदात्त्रिविध:। असिद्धोऽप्याश्रयासिद्धस्वरूपासिद्धव्याप्यत्वासिद्धभेदात्त्रिविध:। एवञ्चाहत्य नव हेत्वाभासा:।

सद्धेतो: पञ्च धर्मा: सन्तीत्युक्तम्। तत्रान्वयिव्यतिरेकिहेतोरेव पञ्चरूपोपपन्नत्वम्। केवलान्वयिनि हेतौ विपक्षासत्त्वं विहाय चत्वारो धर्मा: विद्यन्ते। केवलव्यतिरेकिणि हेतौ सपक्षसत्वं विहाय चत्वारो धर्मा: विद्यन्ते। एतै: पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वासत्प्रतिपक्षित-त्वाबाधितत्वरूपै: धर्मै: कश्चन सद्धेतुर्भवति। एषु धर्मेषु कस्याप्यभावे स हेत्वाभास: भवेत्। तत्र विपक्षासत्त्वस्याभावे सव्यभिचार:। सपक्षसत्वस्याभावे विरुद्ध:। पक्षसत्त्वस्याभावेऽसिद्ध:। असत्प्रतिपक्षि-तत्वस्याभावे सत्प्रतिपक्ष:, प्रतिपक्षितो वा। अबाधितत्त्वस्याभावे कालात्ययापदिष्ट: कालातीतो बाधितो वा। इत्थं हेतो: पञ्चरूपोप-पन्नत्वरूपलक्षणाभावे पञ्चविधा हेत्वाभासा:।

तत्र हेत्वाभासपदस्य दुष्टहेतुत्वपक्षे 'यद्विषयकत्वेन ज्ञानस्यानु-मितिप्रतिबन्धकत्वं तद्वत्त्व हेत्वाभासत्वम्' इति हेत्वाभासलक्षणम्। अनुमितिप्रतिबन्धकत्वमित्यस्य अनुमितितत्करणान्यतरप्रतिबन्धकत्व-मित्यर्थ:। हेत्वाभासपदस्य हेतुदोषत्वपक्षे तु 'यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्व'मिति हेत्वाभासलक्षणम्। अत्राप्यनु-मितिविरोधित्वमित्यस्यानुमितितत्करणान्यतरविरोधित्वमित्यर्थो वक्त-व्य:। तत्र सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधितेषु मध्ये, बाधित-सत्पतिपक्षौ साक्षादनुमितिप्रतिबन्धकौ, तत्रापि बाधित: साध्याभाव-वत्तानिश्चयेन, सत्प्रतिपक्ष: साध्याभावव्याप्यवत्तानिश्चयेन चानुमिति-प्रतिबन्धकौ। सव्यभिचारविरुद्धासिद्धा: परामर्शप्रतिबन्धका:। तत्र पुनस्सव्यभिचारविरुद्धौ व्याप्तिज्ञानप्रतिबन्धेन परामर्शप्रतिबन्धकौ। असिद्धश्च पक्षधर्मताज्ञानप्रतिबन्धद्वारा परामर्शप्रतिबन्धक:।

**बौद्धमतम्**

बौद्धास्तावद् अनुमानं स्वार्थं परार्थञ्चेति द्विविधमित्यङ्गी-कुर्वन्ति। तत्र स्वार्थानुमानस्य परार्थानुमानस्य च पृथक् लक्षणं

निर्दिशन्ति । स्वार्थानुमानस्य लक्षणं न्यायबिन्दावेवं निर्दिष्टम्—"तत्र स्वार्थं त्रिरूपाल्लिङ्गाद्यदनुमेये ज्ञानं तदनुमानम् ।" इति । त्रिरूपाल्लिङ्गाद् यदुत्पन्नमनुमेयालम्बनं ज्ञानं तत्स्वार्थानुमानमिति धर्मोत्तराचार्यः ।[1]

'त्रिरूपलिङ्गाख्यानं परार्थानुमानम्' इति परार्थानुमानस्य लक्षणम् । साधर्म्यवत् वैधर्म्यवच्चेति परार्थानुमानं द्विविधम् । अनयोः प्रयोगभेदाद् अन्यत्र न कश्चन भेदः ।

लिङ्गस्य त्रैरूप्यं पुनः लिङ्गस्यानुमेये सत्त्वं, सपक्षे एव सत्त्वं, असपक्षे चासत्त्वम् । लिङ्गानि च त्रीण्येव, अनुपलब्धिः स्वभावकार्ये चेति ।

तत्र त्रयाणां रूपाणामेकस्यापि रूपस्यानुक्तौ साधनाभासः, उक्तावप्यासिद्धौ सन्देहे वा ।

**मीमांसकमतम् ॥**

"ज्ञातसम्बन्धस्यैकदेशदर्शनाद्देशान्तरेऽसन्निकृष्टे बुद्धिः" इति शाबरभाष्ये अनुमानलक्षणमुक्तम् । सामान्यरूपेण[2] ज्ञातव्याप्तिकस्य व्यक्तिविशेषदर्शनजन्यं सन्दिग्धसाध्यवदधिकरणकमसन्निकृष्टसाध्यविषयकं निश्चयरूपम् ज्ञानमनुमितिरित्यर्थः ।

एते[3] विशिष्टपरामर्शस्य हेतुत्वं न स्वीकुर्वन्ति । 'वह्निव्याप्यो धूमः' 'धूमवान् पर्वत' इति ज्ञानद्वयादेवानुमितिरित्येषाम्मतम् । ते विशिष्टपरामर्शस्य हेतुत्वं वदतां नैयायिकानाम्मते 'व्याप्त्यंशे[4] निश्चयत्व निवेश्य धूमांशेऽपि निश्चयत्वं निवेशनीयम् । तथा च निश्चयत्वस्य तदभावाप्रकारकत्वरूप बहुतरपदार्थघटितत्वेन तेषां परस्परविशेषण-विशेष्य भावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यम् । ज्ञानद्वय-

1 न्या. बि. पृष्ठं २१ 2 भा. चि. पृष्ठं २३

3 भा. चि. पृष्ठं ३० 4 भा. चि. पृठष ३०

वादिनये तु ज्ञानस्य भिन्नतया निश्चयत्वप्रवेशेऽपि न मिथो विनिगमनाविरहस्तत्र लाघवमित्याहुः।'

नैयायिकास्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वस्वीकारे व्याप्यतावच्छेदकाज्ञानेऽपि वह्निव्याप्यवानिति ज्ञानादनुमित्यापत्तिः। अतः, लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वम्। किञ्च 'धूमवान् पर्वत' इति ज्ञानादनुमित्यापत्तिः' व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्य सत्वात्। गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वस्वीकारात् चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानाद् अनुमित्यापत्तिः। तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते, तदा अनन्तकार्यकारणभावः। नैयायिकमते समवायेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायेनानुमितिं प्रति कारणमिति नानन्तकार्यकारणभावः। व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानञ्च स्वतन्त्रं कारणमिति स्वीक्रियते चेद् कार्यकारणभावद्वयकल्पनाप्रयुक्तं गौरवं, 'वह्निव्याप्यो धूमः', आलोकवांश्च पर्वत इति ज्ञानद्वयादनुमित्यापत्तिश्च। अतः यत्र ज्ञानद्वयादनुमितिः, तत्रापि विशिष्टपरामर्शस्यैव हेतुत्वं कल्पनीयं, फलमुखगौरवस्यादोषत्वाद् इति वदन्ति।

**भाट्टमीमांसकमतम्।** (अनुमान विभागे)

भाट्टमीमांसकानां मतेऽपि अनुमानं स्वार्थ परार्थभेदेन द्विविधम्। 'परामर्शेन[1] स्वस्यैव साध्यज्ञानजनकं स्वार्थम्। प्रतिज्ञाद्यवयवप्रयोगेण परस्य साध्यज्ञानजनकं परार्थम्।'

परन्तु प्रतिज्ञादयः पञ्चावयवाः तैः न स्वीक्रियन्ते। तेषाम्मते त्रय एवावयवाः। प्रतिज्ञाहेतूदाहरणैरेव[2] धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वतो वह्निव्याप्यधूमवन्महानससदृश इति वाक्यार्थज्ञानाद् अनुमितिजननाद् उपनयनिगमने व्यर्थे।' ...'यद्वोदाह[3]रणप्रभृतिभिरेव साध्यसिद्धेः प्रतिज्ञाहेत्वोर्न किञ्चिद् प्रयोजनमिति दिक्।'

---

1 भा. चि. पृष्ठम् ३० 2 भा. चि. पृष्ठम् ३१

3 भा. चि. पृष्ठम् ३१

तथा चैतेषाम्मते 'प्रतिज्ञाहेतूदाहरणानि' इति, 'उदाहरणोपनयनिगमनानि' इति वा त्रय एवावयवाः सन्ति। यदि प्रथमद्वितीयौ गृह्येयाताम्, तदा चतुर्थपञ्चमानामावश्यकता नास्ति। चतुर्थपञ्चमानां स्वीकारे प्रथमद्वितीयौ नावश्यकौ। प्रथमद्वितीययोः चतुर्थपञ्चमयोश्च समानकार्यकारित्वमिति तेषामभिप्रायः।

**वेदान्तिमतम्।**

वेदान्तिनाम्मते व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्यत्वमनुमितेः लक्षणम्। अनुमितिकरणमनुमानम्। तच्च व्याप्तिज्ञानम्। तत्संस्कारोऽवान्तरव्यापारः। लिङ्गपरामर्शस्यानुमितिहेतुत्वं न तैः स्वीक्रियते। स्मृतिधारादर्शनाद् स्मृतेः संस्कारनाशकत्वं नास्तीत्यनुमातुं शक्यते। अतः व्याप्तिस्मरणाद् अनुमितिस्थलेऽपि तत्संस्कारस्यैव हेतुत्वम्। 'अयं धूमवान्' इति पक्षधर्मताज्ञाने 'धूमो वह्निव्याप्य' इत्यनुभवाहितसंस्कारोद्बोधे 'वह्निमानि'त्यनुमितिर्भवति। अत्रोद्बोधस्य सहकारिकारणत्वम्।

व्याप्तिज्ञानं वह्निविषयकज्ञानांश एव करणं, न तु पर्वतविषयकज्ञानांश इति 'पर्वतोवह्निमा'निति ज्ञानस्य वह्न्यंश एवानुमितित्वं, न पर्वतांशे, तदंशे प्रत्यक्षमेव।

व्यभिचारादर्शने सति सहचारदर्शनेन व्याप्तिर्गृह्यते।

अनुमानमन्वयिरूपमेकमेव। अनुमानस्य केवलान्वयिरूपत्वं, व्यतिरेकिरूपत्वं वा नास्ति। सर्वस्यापि धर्मस्य वेदान्तिमते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन अत्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वासिद्धेः। व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वाद् अनुमानस्य न व्यतिरेकिरूपत्वम्।

स्वार्थपरार्थभेदेनानुमानं द्विविधम्। स्वार्थं स्वानुमितिहेतुः। परार्थन्तु न्यायसाध्यम्। न्यायो नामावयवसमुदायः। अवयवाश्च त्रय एव। प्रतिज्ञाहेतूदाहरणरूपा, उदाहरणोपनयनिगमनरूपा वा। न तु पञ्चावयवाः। त्रिभिरवयवैरेव व्याप्तिपक्षधर्मतयोरुपदर्शनसम्भवेन अधिकावयवद्वयस्य व्यर्थत्वाद्।

**अथोपमानम्** ॥ (नैयायिकमतम्)

उपमितिकरणत्वमुपमानत्वम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः । ग्रामीणः कुतश्चिदारण्यकपुरुषाद् 'गोसदृशो गवय' इति श्रुत्वा वनं गतः गोसदृशं पिण्डं पश्यन् अतिदेशवाक्यार्थं स्मरति 'गोसदृशो गवय' इति । तदनन्तरं गवयो गवयपदवाच्य इत्युपमितिरुत्पद्यते । अत्रोपमितौ गोसादृश्यदर्शनं करणम् । उपमितिकरणस्योपमानत्वाद् गोसादृश्यदर्शनमुपमानम् । अतिदेशवाक्यार्थस्मरणं व्यापारः । गोसादृश्यदर्शनस्योद्बोधकविधया स्मरणजनकत्वम् । अतः अतिदेशवाक्यार्थस्मरणं गोसादृश्यदर्शनजन्यम्, 'गवयो गवयपदवाच्य' इत्युपमितिं प्रति जनकञ्च भवति । गोसादृश्यदर्शनजन्यत्वे सति गोसादृश्यदर्शनजन्योपमितिजनकत्वाद् अतिदेशवाक्यार्थस्मरणस्य तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारलक्षणमुपपद्यते । व्यापारवत्कारणत्वाद् गोसादृश्यदर्शनस्य करणत्वञ्चोपपद्यते ।

[1]प्राचीनानां मते अतिदेशवाक्यार्थशाब्दबोधः करणम् । अतिदेशवाक्यार्थस्मरणं व्यापारः । गोसादृश्यदर्शनञ्च सहकारी । यत्र सादृश्यविशिष्टपिण्डदर्शनोत्तरं अतिदेशवाक्यार्थशब्दबोधः तत्र तदुत्तरक्षणे उपमितिं नाभ्युपगच्छति । शाब्दबोधोत्तरं पुनः सादृश्यविशिष्टपिण्डदर्शनं, ततोऽतिदेशवाक्यार्थस्मरणं, तदुत्तरमेवोपमितिः ।

केषाञ्चिन्मते, आरण्यको यदा ग्रामीणाय 'गोसदृशो गवयपदवाच्य' इत्युपदिशति, तदैव ग्रामीणस्य सदृशपदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वग्रहो जायते । एषैवोपमितिः । एषा शाब्दबोधात्मिकैव; न तु प्रमित्यन्तरम् ।

---

1 'यथागौरेवं गवय' इत्युपमाने प्रयुक्ते गवा समानधर्ममिन्द्रियसन्निकर्षादुपलभमानः 'अस्य गवयशब्दः संज्ञा इति संज्ञासंज्ञिसम्बन्धंप्रतिपद्यते इति । न्या: भा. (१. १. ६) पृष्ठम् २४१.

न्या. म. पृष्ठम् ३७४. "अत्र वृद्धनैयायिकास्तावदेवमुपमानस्वरूपमाचक्षतेः—संज्ञासंज्ञिसम्बन्धप्रतीतिफलं प्रसिद्धेतरयोः सारूप्यप्रतिपादकमतिदेशवाक्यमेवोपमानम् । ......तदेतद्वाक्यमप्रसिद्धस्य प्रसिद्धेन गवा सादृश्यमभिदधत्तद्वारकमप्रसिद्धस्य गवयसंज्ञाभिधेयत्वं ज्ञापयतीत्युपमानमुच्यते" ।

परन्त्वेतन्न युज्यते। अस्मिन् मते गोसादृश्यस्यैव गवयपदवाच्यत्यम्। गवयत्वावच्छेदेन गवयपदवाच्यत्वविषयिण्या उपमितेः गवयपदजन्यगवयत्वविशिष्टोपस्थितिं विना शाब्दबोधरूपत्वासम्भवाद्। गोसदृशपिण्डदर्शनसमये सादृश्यस्य गवयत्वस्य च प्रत्यक्षेणोपस्थितिस्तुल्या। परन्तु [1]गवयत्वजात्यपेक्षया गोसादृश्यस्य गौरवज्ञानेन तदवच्छेदेन गवयपदवाच्यत्वविषयिण्याः गवयपदाद् गवयत्वप्रकारकशाब्दबोधानुपपत्तेश्च, तत्प्रकारकशाब्दबोधे तदवच्छेदेन शक्तिग्रहस्य हेतुत्वाद्। अतः गोसदृशो गवयपदवाच्य इति वाक्यार्थबोधानन्तरं गोसदृशपिण्डदर्शने सञ्जाते अतिदेशवाक्यार्थस्मरणानन्तरं, 'गवयो गवयपदवाच्य' इति गवयत्वावच्छेदेन गवयपदवाच्यत्वग्रह आवश्यकः। एतदेवोपमानफलम्। अनेनौपमानेन शक्तिग्रहो जायते। एवं शक्तिग्रहानन्तरं, गवयपदश्रवणे गवयत्वावच्छेदेनैव पदार्थोपस्थितिः शाब्दबोधश्च जायते।

'गोसदृशो गवय' इत्यतिदेशवाक्यार्थज्ञानाद् जायमानत्वेनास्य 'आप्तोपदेशः शब्द' इत्युक्तदिशा शब्दप्रमाणान्तर्गतत्वं नाशङ्कनीयम्। 'यत्र[1] शब्दप्रत्ययादेव, तत्प्रणेतृपुरुषप्रत्ययादेव वा अर्थतथात्वमुपायान्तरानपेक्षमवगम्यते, स आगम एव, तत एव तदर्थप्रतीतेः। यत्र तु पुरुषः प्रतीत्युपायमपरमुपदिशति तत्र तत एवोपायात्तदर्थावधारणम्।'

यथा परार्थानुमाने 'पर्वतो वह्निमान् धूमवत्त्वाद्, महानसवद्' इन्युक्ते प्रतिपत्ता न केवलं पुरुषोपदेशविश्वासादेव पर्वते वह्निमत्तां प्रतिपद्यते, किन्तु वह्न्यवबोधकधूमाख्यलिङ्गसामर्थ्याद्, तथात्रापि नागरिकः न केवलमारण्यकवाक्यादेव तं प्राणिनं गवयशब्दवाच्यतया बुद्ध्यते, किन्तु पुरोवर्तिजन्तुविशेषस्य प्रसिद्धेन गवा सादृश्यं स्वयं साक्षात्करोति च। आरण्यकवाक्येन नागरिकस्य ज्ञानं जायते, परन्तु गवयावगतौ गोसादृश्यात्मकमुपायान्तरमसौ नागरिकायोपदिष्टवान्। अतः 'गवयो गवयपदवाच्य इत्युपमित्युत्पत्तौ न केवलं गोसदृशो गवय इति वाक्यार्थज्ञानं हेतुः, परन्तु गोसदृशपिण्डदर्शनमपि। अत इदं प्रमाणान्तरम्।

1 न्या. म. प्रथमसंपुटे पृष्ठम् ३७४-३७५

सर्वत्र संज्ञासंज्ञिसम्बन्धनिर्णयः प्रत्यक्षपूर्वकः। प्रत्यक्षप्रमितिपूर्वकत्वाद् अस्य प्रत्यक्षभिन्नत्वम्। एवं संज्ञासंज्ञिसम्बन्धज्ञानं, पक्षधर्मताज्ञानव्याप्तिज्ञानादीन् नापेक्षत इति तस्यानुमानभिन्नत्वमपि सिद्ध्यति।

एवं प्रत्यक्षानुमानशब्दभिन्नत्वाद् उपमानं प्रमाणान्तरमिति सिद्ध्यति।

बौद्धानां वैशेषिकाणाञ्च मते उपमानस्यातिरिक्तप्रमाणत्वं नास्ति।

**मीमांसकमतम्**

मीमांसकास्तूपमानमतिरिक्तं प्रमाणमङ्गीकुर्वन्ति। भाट्टचिन्तामणौ गागाभट्टाः उपमानलक्षणमित्थं निर्दिशति—"उपमानं[1] पूर्वदृष्टेऽर्थे स्मर्यमाणे दृश्यमानार्थसादृश्यज्ञानम्।"

"दृश्यमानगवयनिरूपित सादृश्यप्रकारक गोविशेष्यकप्रमा उपमितिः।"

एषाम्मते उपमानलक्षणे नैयायिकमताद् न कोऽपि भेदः। परन्तूपमितिस्वरूपवर्णनेऽस्ति भेदः। न्यायमते 'गवयो गवयपदवाच्य' इत्युपमितिः। मीमांसकमते गवयसादृश्यविशिष्टो गौ'रित्युपमितिः।

[2]नव्यमीमांसकास्तु नैयायिकमतमेवाङ्गीकुर्वन्ति। 'अयं गवयपदवाच्यः' 'गवयो गवयपदवाच्यः' इति वा संज्ञासंज्ञिसम्बन्धज्ञानं प्रमेत्याहुः।

**वेदान्तिमतम्**

वेदान्तिनोऽप्युपमितेः स्वरूपं 'गवयसदृशोगौ'रित्यङ्गीकुर्वन्ति। गवयनिष्ठगोसादृश्यज्ञानं करणम्।

---

1 भा. चि. पृष्ठं ४५

2 भा. चि. पृष्ठं ४६.

**अथ शब्दः** (नैयायिकमतम्)

'आप्तोपदेशः[1] शब्द' इति सूत्रकारो गौतमः शब्दप्रमाणस्य लक्षणं वदति। आप्तशब्दार्थस्तु अर्थस्य साक्षात्करणमाप्तिः। तया प्रवर्तत इत्याप्त इति भाष्यकारः[2]। आप्तस्योपदेशः आप्तोपदेशः। आप्तोपदेशत्वं शब्दप्रमाणत्वमिति फलितोऽर्थः। यथार्थवक्तृच्चरित-शब्दानां प्रमाणत्वमिति यावद्।

तर्कसंग्रहे[3] अन्नं भट्टोऽपि आप्तवाक्यं शब्द इति शब्दप्रमाण-लक्षणं वदति। आप्तोच्चरितत्वे सति वाक्यत्वं शब्दप्रमाणलक्षणमिति भावः।

प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणमिति तत्त्वचिन्ता-मणौ शब्दाख्ये तुरीये खण्डे श्री. गङ्गेशोपाध्यायाः।

प्राचीननैयायिकानां मते ज्ञायमानः शब्दः प्रमाणम्। तेषा-म्मतमनुसृत्यैवान्नंभट्टादिभिः शब्दप्रमाणलक्षणं निर्दिष्टम्। शब्दो-च्चारणाभावेऽपि शब्दज्ञानादेव मौनिश्लोकादौ शाब्दबोधोऽनुभवसिद्धः। अतः नवीननैयायिकाः पदज्ञानस्यैव शाब्दबोधकरणत्वमङ्गीकुर्वन्ति। अतः पदज्ञानं शब्दप्रमाणम्। पदजन्यपदार्थोपस्थितिः व्यापारः। पदजन्यत्वञ्च वृत्त्या बोध्यम्। वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः। तथा च पदात् शक्त्या लक्षणया वा पदजन्यपदार्थोपस्थितिः शाब्द-बोधे व्यापारः। फलं तु शाब्दबोधः। वाक्यार्थज्ञानमन्वयबोध इति च शाब्दबोधसमानार्थके पदे।

**शक्तिः**

'अस्माद् पदादयमर्थो बोद्धव्य', इति, 'इदं पदममुमर्थं बोधयतु' इतिवेश्वरेच्छा शक्तिरिति साम्प्रदायिकाः। नवीननैयायिकास्तु ईश्वरेच्छा न शक्तिः। किन्त्विच्छैव। अत आधुनिकसङ्केतितेऽपि शक्तिरस्त्येवेत्याहुः।

---

1 न्या. सू. १. १. ७ 2 न्या. भा. पृष्ठं २४

3 त. सं. पृष्ठं ६५

मीमांसकाः गवादिपदानां जातौ शक्तिमङ्गीकुर्वन्ति। नैयायिकाः जातिविशिष्टव्यक्तावेव शक्तिमङ्गीकुर्वन्ति। अन्यथा 'गामानये'त्यादिवाक्याद् गोत्वमानयेति बोधापत्तेः। समानप्रकारकोपस्थितित्वेनैव शक्तिज्ञानस्य पदार्थोपस्थितिं शाब्दबोधं प्रति च हेतुत्वाद्। 'व्यक्त्या[1]कृतिजातयस्तु पदार्थ' इति गौतमसूत्रमपि व्यक्त्याकृतिजातिषु त्रिष्वपि पदार्थत्वं वदति।

**लक्षणा**

लक्षणा शक्यसम्बन्धः। गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे लक्षणा। गङ्गापदस्य शक्यार्थः प्रवाहः। तेन शक्यार्थेन सह तीरस्य सामीप्यात्मकः सम्बन्धो वर्तते। तात्पर्यानुपपत्तिः लक्षणाबीजम्। भोजनकाले 'यष्टीः प्रवेशये'त्युक्तौ यष्टिपदस्य यष्टिधरेषु लक्षणा स्वीक्रियते। 'काकेभ्यो दधि रक्ष्यता'मित्यत्र काकपदस्य दध्युपघातकेषु लक्षणा। 'छत्रिणो यान्ति' इत्यत्रैकसार्थवाहित्वे लक्षणा।

नैयायिकाः वाक्ये लक्षणां नाङ्गीकुर्वन्ति। वाक्ये शक्तेरभावाद् लक्षणापि नास्तीति तेषामभिप्रायः। 'गभीरायां नद्यां घोष' इत्यत्र नदीपदस्य नदीतीरे लक्षणा। गभीरपदार्थः नदीपदार्थैकदेशे नद्यामन्वेति। 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेने'ति न्यायन्तु न स्वीक्रियते। तस्य न्यायस्याङ्गीकारे तु नदीपदस्य गभीरनदीतीरे लक्षणा। गभीरपदं तात्पर्यग्राहकम्। 'चित्रगिव'त्यादिबहुव्रीहिसमासेऽप्येवम्। एकदेशान्वयस्वीकारे गोपदस्य गोस्वामिनि लक्षणा। चित्रपदस्य गोपदार्थैकदेशे गवि अन्वयः। एकदेशान्वयस्यानङ्गीकारे तु गोपदस्य चित्रगोस्वामिनि लक्षणा। चित्रपदं तात्पर्यग्राहकम्।

तत्पुरुषे पूर्वपदे लक्षणा। राजपुरुष इत्यत्र राजपदस्य राजसम्बन्धिनि लक्षणा। तस्याभेदसम्बन्धेन पुरुषपदार्थेऽन्वयः। राजसम्बन्ध्याभिन्नः पुरुष इति बोधः। निपातातिरिक्तनामार्थयोः भेद सम्बन्धेनान्वयस्याव्युत्पन्नत्वाद् अत्र राजपदार्थस्य पुरुषपदार्थे अभेदातिरिक्तेन स्वस्वामिभावादिना नान्वयः। तथा सति 'राजा पुरुष'

---

1 न्या. सू. २. २. ६७

इत्यत्रापि तथा अन्वयः स्यात् । अत एव राजपदस्य राजसम्बन्धिनि लक्षणा स्वीक्रियते ।

इतरेतरयोगद्वन्द्वे, कर्मधारयसमासे च लक्षणा न स्वीक्रियते । समाहारद्वन्द्वे तु समाहारोऽपि प्रतीतिविषय इति मते 'अहिनकुल'-मित्यादौ परपदे अहिनकुलसमाहारे लक्षणा । नवीनानां मते समाहारसंज्ञा पारिभाषिकी । नास्या अन्वर्थत्वम् । यत्रैकत्वं नपुंसकत्वञ्च 'द्वन्द्वश्च [1]प्राणितूर्यसेनाङ्गानाम्' इति सूत्रेणोक्तं, तत्रैव समाहारसंज्ञा । अतः अत्र समाहारे न शक्तिः लक्षणा वा । 'उप-कुम्भम्' 'अर्धपिप्पली'त्यादौ परपदे तत्सम्बन्धिनि लक्षणा । पूर्वं पदार्थप्रधानतया चान्वयबोधः ।

**शाब्दबोधकारणानि**

[2]'आसत्तिर्योग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ।
कारणम्.........'

इत्यादिकारिकयासत्तिज्ञानम्, योग्यताज्ञानम्, आकाङ्क्षाज्ञानं, तात्पर्यज्ञानं – एतानि शाब्दबोधकारणानीत्युक्तानि । यस्यार्थस्य येनार्थेन सहान्वयस्तात्पर्यविषयः तदर्थप्रतिपादकयोः पदयोः सन्निधानज्ञान-मासत्तिज्ञानम् । एकपदार्थे अपरपदार्थस्य सम्बन्धः योग्यता । तस्या ज्ञानं शाब्दबोधे कारणम् । नवीननैयायिका योग्यताज्ञानं न शाब्दबोधकारणम् । बह्निना सिञ्चतीत्यादौ सेके वह्निकरणकत्वा-भावरूपा योग्यतानिश्चयेन प्रतिबन्धात् न शाब्दबोधः । तदभावनि-श्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्ध-कत्वात् शाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम् । योग्यताज्ञान-विलम्बान्न शाब्दबोधविलम्ब इत्याहुः ।

[3]'यत्पदेन विना यस्याननुभावकता भवेत् ।
आकाङ्क्षा......'

---

1 अष्टा. पा. सू. २. ४. २.
2 न्या. सि. मु. पृष्ठम् ३०२ (कारिका ८२)
3 का. मु. पृष्ठम् ३१२–३१५ (कारिका ८४)

इति कारिकाभागेन येन पदेन विना यस्यान्वयाननुभावकत्वं, तेन पदेन तस्य पदस्याकाङ्क्षा। मुक्तावल्यां श्रीविश्वनाथपञ्चाननः क्रियाकारकपदानां परस्परमाकाङ्क्षा, क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति प्रथममुक्त्वा, ततः प्रकृत्युत्तरप्रत्ययज्ञानमेवाकाङ्क्षाज्ञानमित्यभिप्रैति। तेन घटः 'कर्मत्वमानयनं कृति'रित्यादौ न शाब्दबोधः।

'........[1]वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्॥'

इति कारिकाभागेन तात्पर्यस्य लक्षणं कथितम्। वक्तुरिच्छा तात्पर्यम्। तस्य ज्ञानं तात्पर्यज्ञानम्। नानार्थकपदप्रयोगस्थले वक्तुः तात्पर्यज्ञानाभावे शाब्दबोधो न स्यात्। अतस्तत्र शाब्दबोधोत्पत्यर्थं स्वीकरणीयस्य तात्पर्यज्ञानस्य सामान्यतः शाब्दबोधं प्रति हेतुत्वमङ्गीकरणीयम्। प्रकरणादयः तात्पर्यग्राहकाः। तेषां प्रकरणादीनां शाब्दबोधं प्रति न हेतुत्वम्।

**अर्थापत्तिः**

भाट्टाः प्राभाकराश्चार्थापत्तिं प्रमाणान्तरं मन्यन्ते। परन्तूभयोः अर्थापत्तिस्वरूपे व्यत्यस्ताभिप्रायः। भाट्टप्राभाकरयोर्द्वयोरपि पञ्चमप्रमाणेऽर्थापत्यात्मके प्रमाणन्तु भाष्यपङ्क्तिः। भाष्यपङ्क्तिश्चेत्थम्—"अर्थापत्तिरपि दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यते इत्यर्थकल्पना। यथा जीवति देवदत्ते गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पना।" (शा. भा. ११०.)

तत्र भाट्टानां मते अर्थापत्तेः स्वरूपमित्थम् — 'प्रमाणान्तरेण प्रमितस्यार्थविशेषस्यार्थान्तरेण विना जायमानामनुपपत्तिं विभाव्य तदुपपत्यर्थं कस्यचनार्थस्य कल्पनमर्थापत्ति'रिति। देवदत्तस्य शतवर्षजीवित्वं तावद् ज्योतिषप्रमाणेन सिद्धम्। तस्य जननात्परं शतं वर्षाणि नातीतानि। स तु गृहे न दृश्यते। जीवतस्वस्य गृहासत्त्वं बहिःसत्त्वं विना नोपपद्यते। अतोऽत्र गणितेन प्रमाणेन प्रमितस्य शतवर्षजीवित्वस्य बहिःसत्त्वं विनोपपत्तिः न भवतीति शतवर्षजीवित्वोपपत्यर्थं बहिःसत्त्वं कल्पयति। एषा कल्पना अर्थापत्तिः।

---

1 का. मु. पृष्ठम् ३१५ (कारिका ८४)

अत्र गणितप्रमाणेन देवदत्तः गृहे वा अवस्थितः बहिर्वा वर्तत इति गृहीतम्। तदनन्तरं प्रमाणान्तरेणानुपलब्ध्यात्मकेन देवदत्तः गृहे नास्तीत्यग्राहि। समुच्चितञ्च तदुभयमन्योन्यव्याघाति सम्पन्नम्। व्याघातोऽयमत्र बहिर्भावकल्पनयात्र समाधीयते। प्रमाणद्वय-सिद्धयोरर्थयोर्द्वयोस्सञ्जातः प्रतिघात अर्थान्तरकल्पनेन समाधेय इति आलोच्यमानः कारणं भवति। तादृशप्रतिघातसमाधानाय क्रिय-माणार्थान्तरकल्पना अर्थापत्तिः।

प्राभाकराणां मतेऽर्थापत्तिस्वरूपन्त्वित्थम् — असत्यामर्थान्तर-कल्पनायां य अर्थान्तरमनुपपन्नं विधत्ते सा अर्थापत्तिः। एषाम्मतेऽनुप-पत्तिः सन्देह एव। 'देवदत्तः जीवन् गृहे नास्ति' इति गृहासत्त्वे दृष्टे श्रुते वा स जीवनमुपपन्नं कुर्वन् तस्य बहिर्भावं कल्पयति। बहिर्भावेऽकल्पिते तु, गृहासत्त्वे च निश्चिते 'अयं जीवति वा नवा' इति सन्देहो जायते। बहिर्भावे कल्पिते तु स सन्देहो नोत्पद्यते।

अन्यथानुपपत्तिवशाद् अर्थापत्तिरिति भाट्टमतं प्राभाकरैर्नाङ्गी-कृतम्। अन्यथानुपपत्तिवशाद् अर्थापतिरिति पक्षाश्रयणे कार्यात् कारणानुमानसमानयोगक्षेममिति प्राभाकराः भाट्टमते दोषं पश्यन्ति। "केय[1]मन्यथानुपपत्तिरिति नाम? यदि तावदस्या अनेन विना सद्भावो नोपपद्यत इति। तदेवं कार्यतः कारणानुमानमुपन्यस्तम्।"

**भाट्टमते अर्थापत्तिविभागः**

भाट्टमतेऽर्थापत्तिः दृष्टार्थापत्तिः श्रुतार्थापत्तिरिति द्विविधा। "अर्थापत्तिरपि दृष्टः श्रुतो वार्थो..." इत्यादिभाष्यपङ्क्तिस्थदृष्टशब्देन उपलब्धमात्रं प्रतीयते। अथापि दृष्टाद् भिन्नतया श्रुतपदस्य गृह्य-माणतया श्रुतातिरिक्तप्रमाणपञ्चकजन्यप्रमापरतया गोबलीवर्दन्यायेन दृष्टशब्दः व्याख्येयः। एवञ्च प्रमाणपञ्चकपूर्विका दृष्टार्थापत्तिः पञ्चधा भवति।

---

1 बृहती (११०) रघुनाथाचार्यकृतात् 'न्यायमीमांसादर्शनयोः प्रमाणवि चार' इति ग्रन्थादुद्धृतम्।

१ **प्रत्यक्षपूर्विका** — प्रत्यक्षप्रमाणेन दाहस्य वह्नावुपलम्भाद् वह्नौ दाहकशक्तिः अर्थापत्त्या सिद्ध्यति ।

२ **अनुमानपूर्विका** — देशान्तरप्राप्तिरूपकारणेन आदित्ये गतिमनुमाय तस्मिन् गमनशक्तेः कल्पना ।

३ **शब्दपूर्विका** — 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति श्रुते रात्रिभोजनस्य कल्पना ।

४ **उपमानपूर्विका** — गवयदर्शनेन 'गवयसदृशो गौ'रिति उपमानप्रमाणद्वारा गवि गवयसादृश्यमुपलब्धवतः पुरुषस्योपमान-ज्ञानविषयिणी ग्राह्यशक्तिरस्तीति कल्पना ।

५ **अनुपलब्धिपूर्विका** — जीवतो देवदत्तस्य गृहाभावदर्शनेन अदृष्टस्य बहिर्भावस्य कल्पना ।

'सिद्धान्तचन्द्रिका'यां रामकृष्णाख्येन तत्कर्त्रा अर्थापत्तिपूर्विका अर्थापत्तिः प्रद[1]र्शिता ।

**श्रुतार्थापत्तिः**

अपरिपूर्णस्य वाक्यस्यान्वयोपगमाय यत्र शब्दान्तरमध्याह्रियते, सा श्रुतार्थापत्तिः । 'द्वारं द्वार'मिति वाक्येऽन्वयबोधः न सम्भवति । तत्र द्वारपदार्थस्य शब्दगम्येनावरणादिना अर्थान्तरेणैव सहान्वयो भवति । श्रुतशब्देन आवरणस्यार्थस्योपलम्भो नास्ति । अतः अश्रुत-शब्दगम्यतया कश्चनावरणादिरर्थः कल्प्यः । शब्दादेवार्थस्यावगमनात् लाघवेन शब्दमेव कल्पयति । इयमेव शब्दकल्पना श्रुतार्थापत्तिः । दृष्टार्थापत्तावर्थः कल्प्यते, श्रुतार्थापत्तौ तु शब्दः कल्प्यत इति तयोर्भेदः ।

**अर्थापत्तिविभागे प्राभाकरमतम्**

प्राभाकराणां मते अर्थापत्तिरेकैव । 'दृष्टः श्रुतो वा'—इत्यादि-भाष्यपङ्क्तिः, 'दृष्टः[1]श्रुतो वेत्युपलब्धेर्वाचकम्' इति तैः व्याक्रियते ।

---

1 न्या. मी. द. प्र. पृष्ठम् २६१

1 बृहती ११५—न्या. मी. द. प्र– इत्यतः उद्धृतः । पृष्ठम् २६३

केवलं दृष्टशब्दमात्रेण न सर्वोपलब्धेः परिग्रहः सुलभ इति श्रुतसहितस्य दृष्टशब्दस्योपदेशः। दृष्टशब्देन सामान्यतः उपलब्धमात्रमभिधीयते। श्रुतशब्दसन्निधानेन गोबलीवर्दन्यायेन शब्दप्रमितव्यतिरिक्तमुपलब्धमुच्यते। अतः प्राभाकरमतानुरोधमर्थापत्तिरेकैव।

शब्दाध्याहारवादिनः भाट्टाः दृष्टार्थापत्तेर्विलक्षणतया श्रुतार्थापत्तिमभ्युपगच्छन्ति। तच्च शब्दाध्याहारवादपरिपुष्टार्थम्। प्राभाकरास्तु अर्थाध्याहारवादिनः। अतस्ते श्रुतार्थापत्तिरिति प्रत्येकं नाभ्युपगच्छन्ति।

अर्थापत्तेः प्रमाणान्तरत्वमभ्युपगम्यतां भाट्टानां मते एकेन प्रमाणेन देवदत्तस्य जीवित्वे ज्ञाते तस्य गृहे बहिर्वा सत्त्वं गृहीतम्। अन्येन प्रमाणेन गृहेऽसत्त्वं गृहीतम्। आभ्यां द्वाभ्यां प्रमाणाभ्यां ज्ञातमन्योन्यव्याघाति सम्पन्नम्। अतः बहिर्भावकल्पनया प्रमाणद्वयसिद्धयोरर्थयोः प्रतिघातः समाधेयः। सा च कल्पना अर्थापत्तिरित्युक्तम्। 'वस्तुतः प्रमाणद्वयविरोधो नास्ति। जीवनप्रमाणेन केवलजीवनं, देशसामान्यसम्बन्धो वा ज्ञायते। गृहाभावप्रमाणेन तदुभयमपि नैव स्पृष्टमिति कथं जीवनगृहाभावप्रमाणयोर्विरोधः? विरोधाभावे च, विरोधपरिहाराय स्वीकृताया अर्थापत्तेः नैवावश्यकत्वम्। तस्या अनुमाने एवान्तर्भावात्। देवदत्तो बहिःसत्तावान्, जीवित्वे सति गृहेऽसत्त्वाद्, यो जीवन् यत्र नास्ति, ततोऽन्यत्रास्ति, यथाहम्' इत्यनुमानप्रयोगप्रकारः। इति पूर्वपक्षः।

भाट्टास्तु अत्रानुमाने हेतुः स्वरूपासिद्ध इति वदन्ति। अपि च केवलव्यतिरेक्यनुमाने अर्थापत्तेरन्तर्भाव इति न युक्तम्। केवलव्यतिरेक्यनुमानस्य तैरनङ्गीकारात्। किञ्चानुमानादर्थापत्तेर्महान् भेदः। तथा हि - अनुमाने उपपादकस्य गम्यत्वम् अनुपपन्नस्य धूमादेर्गमकत्वञ्च स्वीक्रियते। अर्थापत्तौ तु तद्विरुद्धतयानुपपन्नस्य गम्यत्वम्, उपपादकस्य च गमकत्वम्। अनुमितिश्च व्याप्तिपक्षधर्मताज्ञानजन्या। अर्थापत्तिस्तु दिवाभोजनत्वाभावपीनत्वयोः सामानाधिकरण्यरूपानुपपत्तिज्ञानात् इत्यनुमानार्थापत्त्योः सामग्रीभेदो वर्तत एवेत्याहुः।

प्राभाकरास्त्वर्थापत्तेः प्रमाणान्तरत्वमेवं साधयन्ति — अर्थापत्तिर्नानुमितावन्तर्भवति। अनुमितिस्थले 'अनुमिनोमी'त्येवानुव्यवसायः। यद्यर्थापत्तेरनुमितावन्तर्भावः, तर्ह्यत्राप्य'नुमिनोमी'त्येवानुव्यवसायः स्यात्। किन्तु 'कल्पयामी'त्येवानुव्यवसायः अत्रानुभवसिद्धः।

अन्यच्च — अनुमानजनकं लिङ्गं सर्वदा निश्चितमेव भवति, नतु कदापि सन्दिग्धम्। अर्थापत्तेस्तु सन्दिग्धमिति न कथञ्चिदप्यर्थापत्तेरनुमानेऽन्तर्भावो वक्तुमुचित इति तस्याः पृथक् प्रमाणत्वम्। निश्चितो हि धूमो वह्नेर्गमकः। तस्यानुपपत्त्यापादकमर्थान्तरं न किञ्चिदस्ति। अत्र तु गृहाभावः विद्यमानताया एवानुपपत्तिं विधत्ते। अतः गृहाभावे गृहीते, बहिर्देशसम्बन्धाभावे विद्यमानताया एवानुपपत्तिः सम्भवतीति बहिर्देशसम्बन्धः कल्प्यते। एवञ्चार्थापत्तिः अनुमानात् सर्वथा भिन्नेति सिद्धं तस्याः पृथक् प्रमाणत्वम्।

**अर्थापत्तेः प्रमाणान्तरत्वनिरसनम्**

नैयायिकास्त्वर्थापत्तेः प्रमाणान्तरत्वं नाभ्युपगच्छन्ति। द्वितीयाध्यायस्य द्वितीये आह्निके द्वितीयसूत्रेण 'शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः' इत्यनेन सूत्रकारो गौतमः[1] अर्थापत्तेरनुमानान्तर्भात्रमुक्तवान्।

[2]भाष्यकारोऽपि—अर्थादापत्तिः अर्थापत्तिः। आपत्तिः = प्राप्तिः प्रसङ्गः। यत्राभिधीयमानेऽर्थे योऽन्योऽर्थः प्रसज्यत सोऽर्थापत्तिः, यथा— मेघेष्वसत्सु वृष्टिर्न भवतीति। किमत्र प्रसज्यते? सत्सु भवतीति।' इत्युपक्रम्य र्थापत्तेः प्रमाणत्वं सम्भवति, न तु प्रमाणान्तरत्वमिति वदति। प्रत्यक्षेणाप्रत्यक्षस्य सम्बद्धस्य प्रतिपत्तिरनुमानम्। तथाचार्थापत्तिसम्भवाभावाः। वाक्यार्थसम्प्रत्ययेनानभिहितस्यार्थस्य प्रत्यनीकभावाद् ग्रहणमर्थापत्तिरनुमानमेव' इति सूत्रकारोक्तं समर्थयति च।

---

1 वात्स्यायनभाष्यसंवलितं गौतमीयं न्यायदर्शनम् पृष्ठम् १६७

2 ,, ,, ,,

[1]वार्तिककारोऽप्येवं वदति — "अनुमानेऽर्थापत्तिसम्भवाभावानामन्तर्भावः समानलक्षणत्वात्। कथमर्थापत्तिरनुमानेन संगृह्यते। द्वयोरेकतरप्रतिषेधस्य द्वितीयाभ्यनुज्ञाविषयत्वात्। यत्र यत्र द्वयोर्वस्तुनोरेकतरद्वस्तु प्रतिषिध्यते तत्र तत्र द्वितीयाभ्यनुज्ञा दृष्टा। यथा दिवा न भुङ्क्ते इत्यभिधानात् रात्रौ भुङ्क्त इति गम्यते। .......................................तस्माद्द्वयोरेकतरप्रतिषेधे द्वितीयाभ्यनुज्ञानादनुमानमेवार्थापत्तिः। कतमदेवानुमानं सामान्यतोदृष्टम्।"

केशवमिश्रास्तर्कभाषायां[2] 'केवलव्यतिरेकानुमानेनैव रात्रिभोजनस्य प्रतीयमानत्वात् किमर्थमर्थापत्तिः कल्पनीया' इति वदन्ति।

"अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते।
व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः।"

इति [3]श्रीविश्वनाथपञ्चाननः। तर्कदीपिकाकारः[4] अन्नंभट्टोऽपि अर्थापत्तेरनुमानान्तर्भावमेव कथयति।

एवञ्चैतत् स्पष्टं यत् सर्वे नैयायिकाः अर्थापत्तिं प्रमाणान्तरं न मन्यन्ते। तस्याः अनुमानान्तर्भूतत्वमेव। अत अर्थापत्तेः प्रमाणत्वं न निषिध्यते, परन्तु प्रमाणान्तरत्वं निषिध्यते।

**अथानुपलब्धिः।**

भाट्टानां मतेऽनुपलब्धिः प्रमाणान्तरं भवति। अनुपलब्धिरुपलब्धेरभावः। अस्या एवाभावप्रमाणमित्यपि संज्ञा। भाष्यकारेण शबरस्वामिना अभावाख्यप्रमाणस्य लक्षणमेवमुक्तम् — [5]"अभावोऽपि प्रमाणाभावो नास्तीत्यर्थस्यासन्निकृष्टस्य" इति।

---

1 न्या. वा. पृष्ठम्. २७८-२७९

2 त. भा. पृष्ठम् ५०

3 न्या. सि. मु. पृष्ठं ५०३ (कारिका २४४)

4 त. दी. पृष्ठम् ३५५ 5 न्या. मी. द. प्र. पृष्ठम् ३०४

भाट्टमते षष्ठं प्रमाणं भवत्यभावः। प्रत्यक्षानुमानादिप्रमाण-पञ्चकप्रवृत्तिप्रतियोगिकः सः अभावः भवति। तथा च प्रवृत्तियोग्यानां प्रत्यक्षादीनां पञ्चानां प्रमाणानां यत्र वा न प्रवृत्तिः सा योग्यानुपलब्धिः।

लोके सद्रूपमसद्रूपञ्चेति वस्तु द्विविधम्। तत्र सद्रूपेण वर्तमानस्य घटपटादेः सत्ता प्रत्यक्षादिना प्रतीयते। एवं, 'नास्ती'ति प्रतीतिः अभावाख्यप्रमाणेन जायते। यथा भूतले घटो नास्तीति प्रतीतिः। अनुरूपेण प्रमाणेन प्रमेयं प्रतीयत इति लोकानुभवः। अत अभावरूपप्रमेयस्य तदनुरूपेण ग्रहणमेत्र वक्तव्यमिति तेषामभिप्रायः।

अनुपलम्भापरपर्यायम् अभावाख्यं प्रमाणं द्विविधम्— प्रमाणा-भावरूपं, स्मरणाभावरूपञ्च। घटपटादीनामभावः आद्येन प्रतीयते। 'अत्र मैत्रः प्रातर्नासीदि'ति सायङ्काले यद् ज्ञानं जायते तद् द्वितीयेन।

अनुपलब्धेः प्रमाणान्तरत्वास्वीकारे अभावस्य ज्ञानं न स्यादिति भाट्टानामभिप्रायः। अभावस्योपलब्धिस्तु वर्तते। अतस्तदर्थमनुप-लब्धिप्रमाणस्य स्वीकारः। न च प्रत्यक्षादिना अभावोपलब्धिः, इन्द्रियसन्निकर्षाभावेऽपि अभावोपलब्धेः। तथा हि — यश्च प्रातः गृहेऽवस्थितः, मध्याह्ने स एवं पृच्छ्यते, 'किं प्रातरस्मिन् गृहे कश्चित् श्यामः लोहिताक्षः दृष्टो भवते'ति। स च सद्य एव योग्यस्मरणानुदयात् प्रातःकालिकेन्द्रियव्यापारमन्तरैव तस्याभावमव-धारयति। अत एवं ज्ञातुं शक्यते यदिदं ज्ञानं नेन्द्रियकरणकम् इति।

अत्र विशेषणविशेष्यभावाख्यः सन्निकर्षः वर्तत इति, अभावो-पलब्धिः प्रत्यक्षेणैव जायत इति न वक्तव्यम्। तस्य सन्निकर्ष-त्वाभावात्। सन्निकर्षश्च सम्बन्धः। सम्बन्धश्च द्विनिष्ठः, सम्ब-न्धिभ्यां भिन्नश्च। अस्य तु सम्बन्धिद्वयनिष्ठत्वं, सम्बन्धिभिन्नत्वञ्च नास्तीति सन्निकर्षत्वं नास्ति। अतश्चाभावस्य न प्रत्यक्षविषयत्वम्।

अभावः स्वानुरूपेण प्रमाणेन गृह्यते; प्रमेयत्वाद् भाववदि-त्यनुमानमनुपलब्धिसाधकम्।

"भावात्मके यथा मेये नाभावस्य प्रमाणता।
तथाभावप्रमेयेऽपि न भावस्य प्रमाणता॥"
(श्लो. वा. ७४)

इति कुमारिलभट्टः श्लोकवार्तिके। अतोऽस्ति षष्ठं प्रमाणमनुपलब्धिरिति भाट्टाः।

प्राभाकरास्त्वभावमिति कश्चन पदार्थं नाङ्गीकुर्वन्ति। अतः प्रमेयस्याभावस्य नास्तितया प्रमाणस्यानुपलब्धेरपि आवश्यकता नास्ति। अतस्तेषाम्मते अनुपलब्धिर्न प्रमाणान्तरम्।

प्राभाकरमते अभावः अधिकरणस्वरूपः। योऽभावः यस्मिन्नधिकरणे प्रतीयते सोऽभावः तदधिकरणस्वरूपः 'भूतले घटो नास्तीत्यत्र घटाभावः भूतलाधिकरणकः। अत अत्र घटाभावः भूतलस्वरूपः। 'आकाशे गन्धाभाव' इत्यत्र गन्धाभाव आकाशस्वरूपः। एवं सर्वत्राप्यभावानामधिकरणस्वरूपत्वोक्तावेव सामञ्जस्यान्नतिरिक्तपदार्थत्वमिति तेषामाशयः।

**अनुपलब्धेः प्रमाणान्तरत्वनिरसनम्।**

नैयायिकास्तावद् अभावमतिरिक्तपदार्थतया अङ्गीकुर्वन्ति। परन्तु तद्ग्रहणार्थमनुपलब्धिं प्रमाणान्तरं [1]नाङ्गीकुर्वन्ति। प्रत्यक्षयोग्यानां घटपटादीनामभावः प्रत्यक्षयोग्यः। तत्र प्रत्यक्षसामग्रीसत्त्वे यद्यत्र घटः स्यात् तर्ह्युपलभ्येत। नोपलभ्यते। उपलब्ध्यभावान्नास्तीति योग्यानुपलब्धिसहकृतप्रत्यक्षसामग्र्यवाभावग्राहकम्। अन्धकारे तु घटादीनां [2]प्रत्यक्षं न सम्भवतीति, अन्धकारे घटाभावस्यापि प्रत्यक्ष न स्यात्। वायौ रूपाभावः, पाषाणे सौरभाभावः, गुडे तिक्ताभावः, श्रोत्रे शब्दाभाव इत्यादयः प्रत्यक्षविषयाः।

गुरुत्वं धर्माधर्मौ इत्यादीनामतीन्द्रियत्वाद् गुरुत्वादीनामभावा न प्रत्यक्षविषयाः। तेऽनुमानगम्याः। एवञ्चाभावोपलब्धिः प्रत्यक्षादि-

---

1 अभावप्रत्यक्षे योग्यानुपलब्धेः सहकारिकारणत्वमेव।
त. दी. पृष्ठम् २४४–२४५ 2 चाक्षुषप्रत्यक्षम्।

भिश्चतुर्भिः प्रमाणैरेव सम्भवतीति नात्रानुपलब्धेः प्रमाणान्तरत्व-स्वीकार आवश्यकः।

[1]भाष्यकारैः अभावाख्यप्रमाणस्य अनुमानेऽन्तर्भाव उक्तः। तर्कभाषाकारः[2] केशवमिश्रः इन्द्रियाणां सम्बद्धग्राह्यत्वनियमः भावेष्वेव, अभावे न तादृशनियम इति व्यवस्थाप्य विशेषणविशेष्य भावात्मकसन्निकर्षग्राह्यत्वमभावस्य वदति। तन्मते अनुपलब्धिर्न प्रमाणान्तरम्। भाष्यकारस्तु [3]'सत्यमेतानि प्रमाणानि, न प्रमाणा-न्तराणि' इति वदन्, अभावस्य प्रमाणत्वमङ्गीकरोति, प्रमाणान्तर-त्वमेव निषिध्यति।

केशवमिश्रः, विश्वनाथपञ्चाननः, अन्नंभट्ट इत्यादयो योग्यानु-पलब्धेरभावप्रत्यक्षे सहकारिकारणत्वं स्वीकृत्य प्रत्यक्षयोग्यानां घटपटादीनामभावस्य प्रत्यक्षविषयत्वं सम्भवतीति व्यवस्थापयति। नैयायिकैरनुपलब्धेः स्वतन्त्रप्रमाणत्वं निषिध्यते। अभावोपलब्धिं प्रति तस्याः कारणत्वन्त्वङ्गीक्रियत एव।

**सम्भवः**

सम्भवोऽपि प्रमाणान्तरमिति पौराणिकाः। सम्भवो[4] द्विविधः — सम्भावनारूपो निश्चितरूपश्चेति। तत्राद्योऽप्रमाणमेव। तद्यथा-'ब्राह्मणे चतुर्वेदाभिज्ञत्वं सम्भवति' 'क्षत्रिये शौर्य'मित्यादयः। द्वितीयस्तु प्रमाणम्। तत्त्वनुमानान्नातिरिच्यते - 'शतं सहस्रे सम्भवती'ति।

भाष्यकारस्तु 'सम्भवो नामाविनाभाविनोऽर्थस्य सत्ताग्रहणा-दन्यस्य सत्ताग्रहणम्। यथा द्रोणस्य सत्ताग्रहणादाढकस्य सत्ता-ग्रहणम्, आढकस्य सत्ताग्रहणाद् प्रस्थस्येति' इति सम्भवप्रमाणस्य लक्षणोदाहरणे निर्दिशति। तस्यानुमानेन्तर्भावश्च सूत्रकारानुसृतं व्यवस्थापयति च।

---

1 न्या. भा. पृष्ठम् १६८  2 त. भा. पृष्ठम् ५३
3 न्या. भा. पृष्ठम् १३७  4 त. भा. प्र. पृष्ठम् १८४-१८५

**ऐतिह्यम्।**

'अनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमैतिह्यम्' इत्यैतिह्यलक्षणम्। तद्द्विविधम्[1] — वितथमवितथञ्चेति। तत्राद्यं न प्रमाणम्। द्वितीयन्त्वाप्तोपदेशरूपत्वादागमान्न भिद्यते। तद्यथा — 'इह वटे यक्षस्तिष्ठती'ति।

**चेष्टा**

केचित् चेष्टा प्रमाणान्तरमिति वदन्ति। तत्र[2] चेष्टा द्विविधाकृतसमयाकृतसमया चेति। तत्र कृतसमया लिप्यादिवत् अभिप्रायस्थं शब्दं स्मारयति। अकृतसमया तु न कुत्रचिद् प्रमां जनयति। यथा शङ्खध्वनौ त्वया गन्तव्यमिति श्रुतशङ्खध्वनिः प्रतिष्ठते, तथा यदा मया तर्जन्यूर्ध्वीक्रियते तदा त्वयासौ ताडनीय इति तदा ताडयति, न तु किञ्चित् प्रमिणोति।

अनया चेष्टया पदार्था एव स्वतन्त्राः परं स्मार्यन्ते, न तु तेषां परस्परमन्वयोऽपि बोध्यते। शब्दे कर्तृकर्मबोधकविभक्तिवद् चेष्टैकदेशानां नियतानामभावात्। संशयप्रतिभयोरन्यतरस्मात् चेष्टातः प्रवृत्तिनिवृत्ती, न तु चेष्टायाः प्रमाणत्वमिति शङ्करमिश्रः।

**प्रतिभा**

केचित् प्रातिभं ज्ञानं प्रमाणमिति वदन्ति। स च विद्यातपस्समाधिजः प्रकृष्टधर्मः। कणादेन आर्षं ज्ञानं योगिप्रत्यक्षेऽन्तर्भावितम्। योगिनां ज्ञानं प्रमाणम्। तच्च प्रत्यक्षादिष्वेवान्तर्भूतम्। लौकिकानान्तु तादृशं ज्ञानं, वाक्यं वा न प्रमाणम्।

केचिद् ह्रस्वदीर्घयोरपि प्रमाणान्तरत्वमभिमन्यन्ते। तयोः प्रत्यक्षादिषु नान्तर्भाव इति पृथक् प्रमाणत्वं वक्तव्यमिति वदन्ति। तदपि न सम्यक्। ह्रस्वदीर्घयोः परिमाणत्वात्, परिमाणस्य च प्रत्यक्षविषयत्वात्।

एवञ्च चत्वार्येव प्रमाणानीति सिद्धम्। तथा च न्यायसूत्रम्— प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इति।

---

1 त. भा. प्र. पृष्ठम् १८५ 2 वै. सू. 3 ५०२ पृष्ठम्

# द्वितीयोऽध्यायः

## शब्दाख्यं प्रमाणम्

**शब्दप्रमाणलक्षणम्**

'आप्तोपदेशः शब्द' इति शब्दाख्यस्य चतुर्थस्य प्रमाणस्य लक्षणं सूत्रकारेणाभ्यधायि। उपदिश्यतेऽनेनेत्युपदेशः। आप्तस्योपदेशः आप्तोपदेशः।

"आप्तः[1] खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्याप्तिः, तया प्रवर्तत इत्याप्तः।" इति न्यायभाष्यकारो वात्स्यायन आप्तशब्दं सुस्पष्टं व्याचकार।

साक्षात्कृतधर्मता, भूतदया, यथाभूतार्थचिख्यापयिषा – एताभिस्तिसृभिर्युक्तो भवत्याप्तः। स्वयमनवबुध्यमानानां प्राणभृतामुपदेशादन्यद् बोधनमार्गो नास्ति। 'वयमेभ्यो यथादर्शनं यथाभूतमुपदिशामस्त इमे श्रुत्वा प्रतिपद्यमानाः हेयं हास्यन्त्यधिगन्तव्यमेवाधिगमिष्यन्ती'ति कृत्वा आप्ता उपदेशे प्रवर्तन्ते' इति च भाष्यकारः।

साक्षात्कृतधर्मताभूतदयायथाभूतार्थचिख्यापयिषाभिर्युक्तः ऋषिः' आर्यः, म्लेच्छो वा भवतु, स आप्तः। [2]ऋष्यार्यम्लेच्छानां समानं लक्षणम्।

तर्कभाषाकारः[3] केशवमिश्रः 'आप्तवाक्यं शब्द' इति शब्दप्रमाणलक्षणमुक्तवान्। तर्कसंग्रहकार[4] अन्नंभट्टोऽपि 'आप्तवाक्यं शब्द इति शब्दप्रमाणलक्षणं वदति।

'पदसमूहो[5] वाक्यमर्थपरिसमाप्तौ' इति भाष्यकारः वाक्यलक्षणं वदति। [6]'वाक्यन्त्वाङ्क्षायोग्यतासन्निधिमतां पदानां समूह'

---

1 न्य, भा. पृष्ठम् २४ 2 न्या. भा. पृष्ठम् २४

3 त. भा. पृष्ठम ४७ 4 त. सं पृष्ठम् ६५

5 न्या. भा. पृष्ठम् १२५ 6 त. भा. पृष्ठम् ४७

इति वाक्यलक्षणं तर्कभाषाकारः केशवमिश्रोऽपि वदति। गौरश्वः पुरुषो हस्तीति पदसमूहस्य न वाक्यत्वं, परस्पराकाङ्क्षाविरहात्। 'अग्निना सिञ्चती'ति पदसमूहोऽपि न वाक्यं, योग्यताविरहात्। नह्यग्निसेकयोः परस्परान्वययोग्यताऽस्ति। सेचनस्य जलकरणकत्व मेवोपपद्यते, नाग्निकरणकत्वम्। 'गामानये'ति वाक्ये उच्चार्ये 'गाम्' इत्युच्चारणानन्तरं, एकस्मात् प्रहरादूर्ध्वं 'आनय' इत्युच्चरिते, 'गामनये'ति वाक्यजन्यबोधो न स्यात्। अत्राकाङ्क्षा योग्यता चास्ति; परन्तु वाक्यघटितपदयोः सान्निध्याभावात् न वाक्यार्थ बोधो जायते। अत एतद् सिद्धम् – यानि साकाङ्क्षाणि, योग्य-तावन्ति सन्निहितानि, तानि पदानि वाक्यमिति।

'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति वैदिकं वाक्यम्। ज्योतिष्टोम-नामकेन यागेन स्वर्गं भावयेदित्यर्थः। अनेन वाक्येन यागस्य स्वर्गस्य च साध्यसाधनभावो बोध्यते। अत्रत्यानि पदानि साकाङ्-क्षाणि सन्निहितानि योग्यतावन्ति चेति वाक्यं भवति। एवम् 'आसीदयोध्यायां दशरथो नाम राजा' इत्यत्र वर्तमानानि पदान्यपि साकाङ्क्षाणि, योग्यतावन्ति, सन्निहितानि चेति वाक्यस्योदाहरणं भवति। एतद् वाक्यन्तु लौकिकम्। एवं 'नदीतीरे पञ्च फलानि सन्ती'त्यपि लौकिकवाक्यस्योदाहरणं भवति। [1]'सन्ती'त्युक्ते 'कानी'त्याकाङ्क्षा। 'फलानि सन्ती'त्युक्ते 'कती'त्याकाङ्क्षा। 'पञ्च फलानि सन्ती'त्युक्ते 'कुत्रे'त्याकाङ्क्षा। 'तीरे पञ्च फलानि सन्ती'-त्युक्ते 'कस्या' इत्याकाङ्क्षा। अतः 'नद्यास्तीरे पञ्च फलानि सन्तीतिवाक्यस्थपदानि परस्पराकाङ्क्षायोग्यतासन्निधिमन्ति भवन्ति।

वस्तुत आकाङ्क्षा[2] श्रोतुः जिज्ञासा। जिज्ञासा चेच्छाविशेषः। इच्छायाश्चेतनधर्मत्वाद् अचेतने पदे आकाङ्क्षा न सम्भवति। पदार्थाः पदश्रोतरि अन्योन्यविषयाकाङ्क्षां जनयतीति, आकाङ्क्षाजनकत्वेन साकाङ्क्षाः। आकाङ्क्षाया आधारत्वन्तु चेतने श्रोतरि। पदार्थद्वारा पदानामप्याकाङ्क्षाजनकत्वं वर्तत इत्याशयेन पदानां साकाङ्क्षत्वमुक्तम्। एवं परस्परमन्वययोग्यताप्यर्थानामेव। अतः योग्यतावत्वमपि पदार्थ-

---

1 त. भा. प्र. पृष्ठम् १६२-१६३  2 त. भा. पृष्ठम्-४८

द्वारा एवपदानां सम्भवति। सन्निहितत्वन्तु पदानामेकेनैव वक्त्रा अविलम्बेनोच्चरितत्वम्। तच्च पदानां साक्षादेव, नार्थद्वारा। एवञ्च परस्पराकाङ्क्षावदन्वययोग्यार्थप्रतिपादकसन्निहितपदकदम्बकत्वं वाक्यत्वमिति फलितम्।

वर्णसमूहः पदम्। परन्तु वर्णाः आशुतरविनाशिनः। अतः 'वृक्षसमूहः' 'जन्तुसमूह' इतिवत् 'वर्णसमूह' इत्येकदा नैकानां वर्णानां युगपत् प्रतीतिर्न स्याद्। अतः समूहत्वमत्रैकज्ञानविषयत्वं वक्तव्यम्। तच्चेत्थम्--गौरित्यत्र गकारः औकारः, विसर्गश्च वर्तते। अत्र गकारस्य श्रोत्रेण प्रत्यक्षात्मकानुभवानन्तरं तस्मा-देवानुभवात् तत्संस्कारो जायते। एवमौकारात्मकवर्णश्रवणादनन्तरं तस्मादेवानुभवात् तत्संस्कारो जायते। अन्तिमस्य विसर्गस्य श्रवणावसरे पूर्ववर्णजनितसंस्कारसहकृतेन श्रोत्रेण एकदैव गौरिति पदप्रतीतिर्जायते। विभक्त्यन्तेषु वर्णेषु 'सुप्तिङन्तं पदम्' १-४-१४ इति पाणिनिना, 'ते विभक्त्यन्ताः पदम् २-२-६० इति गौतमेन च पदसंज्ञा विहिता। तत्सङ्केतग्रहणानुगृहीतेन श्रोत्रेण विभक्त्यन्तेषु वर्णेष्वेव पदप्रतीतिर्जायते। अत्रान्त्यस्य विसर्गस्यश्रवणकाले, असतोः गकारौकारयोः सतः विसर्गस्य च क्रमिका प्रतीतिः सहकारिदा-र्ढ्यादेव जायते। अत्र सहकारी च पूर्वपूर्वानुभवजनितसंस्कारः। संस्कारस्य स्मृतिहेतुत्वं व्यवस्थितमिति सत्यम्। परन्तु तस्य स्मृतिं प्रत्येव हेतुत्वमिति [1]नाभ्युपगम्यते।

यथा 'सोऽयं देवदत्त' इति प्रत्यभिज्ञाने संस्कारसहकृतस्य चक्षुषः हेतुत्वं वर्तते। तत्र प्रत्यभिज्ञायां पूर्वापरकालावच्छिन्नमेकं वस्तुतत्त्वं चकास्ति। वस्तुतः इन्द्रियं सन्निहितं विषयमवगाहते। नत्वसन्निहितम्। संस्कारोऽपि पूर्वानुभूतस्य स्मृतिं जनयति, न त्वनुभ-वम्। एवमिन्द्रियसंस्कारयोः प्रत्येकं सामर्थ्याभावेऽपि मिलितयोस्त-योरुभयविषयज्ञाने सामर्थ्यं दृष्टम्। संस्कारसहकृतेन्द्रियजन्यत्वात् प्रत्यभिज्ञानस्योभयविषयत्वमुपपत्स्यते। यथा संस्कारसहकृतेन्द्रियजन्यं प्रत्यक्षज्ञानमसन्तं कालं देशं, सन्तं कालं देशञ्चावगाहते तद्वत्

1 'यद्यपि स्मृतिहेतुत्वं संस्कारस्य व्यवस्थितम्।
कार्यान्तरेऽपि सामर्थ्यं तस्य न प्रतिहन्यते॥'

पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतचरमवर्णानुभवसम्बद्धं श्रोत्रेन्द्रियं पदप्रतीतिं जनयति ।

**स्फोटवादः ।**

अत्र वैयाकरणा विप्रवदन्ते । तेषम्मते वर्णाः न वाचकाः । स्फोटस्यैव वाचकत्वम् । स्फुट्यते व्यज्यते वर्णैरिति स्फोटो वर्णाभिव्यङ्ग्यः । स्फुटति स्फुटीभवत्यस्मादर्थं इति स्फोटोऽर्थप्रत्यायकः । इत्थं स्फोटशब्दार्थमुभयथा निराहुः । वर्णातिरिक्तः वर्णाभिव्यङ्ग्यः अर्थप्रत्यायकः स्फोटः । एकं पदमिति प्रतीतिः स्फोटमवलम्बते । प्रत्यक्षमर्थापत्तिश्च स्फोटसत्त्वे प्रमाणम् । 'गौरित्येकं पदमि'ति नानावर्णातिरिक्तैकपदावगतिस्सर्वानुभवसिद्धा । असति बाधके पदानुभवोमिथ्येति वक्तुन्न शक्यः । पदार्थप्रतीत्यन्यथानुपपत्यापि स्फोटोऽभ्युपगन्तव्यः। वर्णेभ्योऽर्थप्रत्ययो न सम्भवति। व्यस्तानां वर्णानामर्थप्रत्ययहेतुत्वं स्वीक्रियते चेद् इतरवर्णानां वैयर्थ्यापत्तिः। आशुतरविनाशिनां वर्णानां यौगपद्यं न सम्भवतीति समस्तानां वर्णानामर्थप्रत्यायकत्वमित्यपि स्वीकर्तुमशक्यम् । अतः वर्णाभिव्यङ्ग्यः वर्णातिरिक्तोऽर्थप्रत्यायकः स्फोटः सिद्ध्यति । भगवान् पतञ्जलिरपि महाभाष्ये, 'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते इति । मण्डनमिश्रः [1]स्फोटसिद्धौ 'अर्थावसायप्रसवनिमित्तं शब्द इष्यते' इति वदति । शब्द इत्यनेन स्फोट इत्यर्थो विवक्ष्यते ।

पूर्वपूर्ववर्णजनितसंस्कारसहित अन्त्यवर्णः प्रत्यायक इति मतमयुक्तम् । संस्कारो हि नाम यदनुभवजनितः तद्विषयमेव स्मरणमुपजनयति न पुनरर्थान्तरविषयं ज्ञानम् । स्मृतिद्वारेण संस्कारोऽर्थप्रत्यायको भविष्यतीति चेद् एतदपि न सम्भवति । ज्ञानयौगपद्यप्रसङ्गात् । अन्त्यवर्णज्ञानानन्तरं पूर्ववर्णस्मरणमिव सङ्केतस्मरणमपि तदैवापतति । ततश्च ज्ञानयौगपद्यम् ।

तावद्वर्णविषयकमेकं सदसद्वर्णगोचरं समूहालम्बनात्मकं ज्ञानं भविष्यति, तद्रूपारूढाश्च वर्णाः अर्थं प्रत्याययिष्यन्तीत्यपि न सुवचम् । तथविधज्ञानोत्पत्तौ कारणाभावात् । नहीन्द्रियमतीतग्रहण-

---

1 स्फो. सि. पृष्ठं २

समर्थम्। न च संस्कारो वर्तमानग्राही। संस्कारः इन्द्रियञ्च युगपद् अर्थबोधं जनयत इत्यपि न, स्मरणमात्रे समर्थस्य संस्कारस्य इन्द्रियेण सह व्यापारासम्भवात्। अतः वर्णाः न वाचकाः।

यदि वर्णाः वाचकाः भवेयुः, विपरीतक्रमप्रयुक्ता अपि वर्णाः अर्थं गमयेयुः। विपरीतक्रमेण वर्णानामुच्चारणेऽपि समूहालम्बनात्मकज्ञाने सर्वेषां वर्णानां विषयत्वात्। विपरीतक्रमे तु नार्थबोधो जन्यते। 'नदी दीन', 'नवं वनं', 'राजा जार' इत्यादिषु व्यत्यस्त एवार्थबोधः। अतः वर्णानां वाचकत्वं सर्वथा नोपपद्यते।

उच्चरिताच्छब्दार्थबोधो जायत एव। अर्थबोधस्तावदकरणक न भवितुमर्हति। जन्यस्यार्थबोधस्य सकरणकत्वान्यथानुपपत्त्या स्फोटः सिद्ध्यति। स च निरवयवः, नित्यः, एक निष्कारणक इति न वर्णपक्ष इव दोषः। 'शब्दादर्थं प्रतिपद्यामहे' इति 'व्यवहाराद् स्फोटोऽर्थप्रतिपादकः। वर्णजनितसंस्कारस्यार्थप्रतिपादकत्वं वदत्तान्मते 'शब्दाद्' इति प्रातिपदिकार्थं अनुपपन्नः स्यात्। शब्दशब्देन वर्णा उच्यन्ते, ते च वर्णा अर्थप्रतिपादका इति वादोऽपि न युज्यते। यदि 'शब्देभ्योऽर्थं प्रतिपद्यामहे' इति व्यवहारः स्यात् तर्हि वर्णानां वाचकत्वमुपपद्येत। परन्तु व्यवहारः शब्दादित्येकवचनयुक्त एव। तादृशश्च व्यवहारः स्फोटात्मकस्य शब्दस्यार्थप्रतिपादकत्वस्वीकार एव युज्यते।

वर्णा अर्थप्रतीतिं प्रत्यन्यथासिद्धाः। स्फोटव्यञ्जकत्वे एव वर्णानामुपयोगः। वर्णैरभिव्यक्तेन स्फोटेनार्थप्रतीतिर्जायते। वर्णैरर्थप्रतीतिरिति तु भ्रमः।

ननु वर्णाभिव्यक्तेन स्फोटेनार्थप्रतिपत्तिरिति मतेऽपि, वर्णानां वाचकत्वाङ्गीकारपक्ष इव दोषस्तुल्यः। तथा हि – किमभिव्यक्तः स्फोटः अर्थप्रतीतिं जनयति, उतानभिव्यक्तः? अनभिव्यक्तः अर्थप्रत्यायकश्चेत् सर्वपदार्थोपलब्धिप्रसङ्गः। अभिव्यक्तश्चेत् व्यस्तेन वर्णेनाभिव्यक्तः? उत समस्तैर्वर्णैः? व्यस्तवर्णाभिव्यक्तस्य स्फोटस्यार्थ

व्यञ्जकत्वं स्वीकरोतीति चेदितरवर्णानां वैयर्थ्यापत्तिः। वर्णाना-माशुतरविनाशित्वात् समस्तत्वञ्च न सम्भवतीति वर्णवाचकत्वपक्षे उक्ता दोषा एवात्रापि सम्भवन्ति। तदुक्तम् —

"यस्या[1]नवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः।
सोऽपि पर्यनुयोगेन नैवानेन विमुच्यते॥"

इति चेन्न। स्फोटव्यक्तौ। विकल्पाः न प्रभवन्ति।[2] प्रयत्नभेदेन भिन्नाः ध्वनयः अस्य स्फोटस्य प्रकाशकाः।

## स्फोटनिरसनम्

नैयायिका मीमांसकाश्च स्फोटं नाङ्गीकुर्वन्ति। त इत्थमभि प्रयन्ति — स्फोटसत्त्वे प्रमाणं नास्ति। गौरित्युच्चार्यमाणे गकारौ-कारविसर्गेभ्योऽन्यस्य प्रत्यक्षत उपलब्धिर्नास्तीति तत्र प्रत्यक्षं न प्रमाणम्। वर्णेभ्य एवार्थप्रतिपत्तिर्युज्यत इति, अन्यथानुपपत्ति-मूलकार्थापत्तिरपि न प्रमाणम्।

तत्र व्यस्तानां वर्णानां नार्थप्रत्यायकत्वम्। परन्तु समस्त-स्यैव। तत्र पूर्वे वर्णा अतीता अप्युपकरिष्यन्ति. चरमवर्णस्तु वर्तमान इतीदृशः काल्पनिकः वर्णसमूहः अर्थप्रत्यायकः।

अथवा[3] क्रमोपलब्धेष्वपि वर्णेषु मानसमनुव्यवसायरूप-मखिलवर्णविषयं सङ्कलनाज्ञानं यदुपजायते तदर्थप्रत्यायनाङ्गं भवि-ष्यति। न च तादृशस्यानुव्यवसायस्य स्वीकारे प्रमाणाभावः। 'शतमाम्राणि भक्षितवान् देवदत्त' इत्यनुव्यवसायो दृश्यते। तत्र शतानामाम्राणां भक्षणं न युगपत्कृतम्। परन्त्वेकस्य भक्षणोत्तरम-परमिति क्रमेणैव। अनुव्यवसायस्तु आम्रशतभक्षणे यौगपद्यमवगाहते। अयमनुव्यवसायः सर्वेषामनुभवसिद्धः।

---

1 श्लो. वा.

2 स्फो. सि. पृष्ठम् ४२

3 न्या. म. (द्वि. सं.) पृष्ठम् १६२.

यथा वा पूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्ण इति तत्रभवता मीमांसाभाष्यकृता वर्णितं तथा वर्णानामर्थप्रत्यायकत्वमस्तु।

संस्कारस्य स्मृतिं प्रत्येव हेतुत्वमिति न नियमः। कार्यकारणभावः अनुभवानुरोधात् कल्प्यते। वर्णानुभवसंस्कृतमतेः पुंसः अर्थाधिगतिः दृश्यते। अत अर्थाधिगमं प्रति संस्कारस्य हेतुत्वं कल्प्यते। संस्कारश्च न शक्तिरूपः। किन्त्वात्मनिष्ठः वासनाख्यो गुणः। स्मृतिं प्रत्यपि च संस्कारस्य हेतुत्वम्।

अथवा न साक्षादर्थप्रतीतिकारी संस्कारः। स्मृतिद्वारेणैवार्थप्रतीतिं प्रति संस्कारस्य हेतुत्वम्। पूर्ववर्णेषु संस्कारात् स्मरणम्, अन्त्यवर्णे श्रोत्रेन्द्रियादनुभव इत्येवं स्मर्यमाणानुभूयमानवर्णकरणकोऽर्थप्रत्ययः।

संस्कार उभयवादिसम्मतः। तस्य स्मरणकारित्वमुल्लङ्घ्यार्थप्रत्ययकारित्वं केवलं नैयायिकैरभिहितम्। वैयाकरणैस्तु इतःपर्यन्तमसिद्धं नवीनं स्फोटमङ्गीकृतम्। प्रसिद्धे धर्मिणि धर्मकल्पनं नूतनधर्मिकल्पनापेक्षया लघु। अत स्फोटे प्रमाणाभावात् लाघवाच्च वाचकत्वं वर्णसमूहात्मकपदे व्यवस्थितम्।

वर्णेषु पदप्रतीतिरिव पदेषु वाक्यप्रतीतिः। पदप्रतीत्यनन्तरं पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेनान्त्यपदविषयेण श्रोत्रेन्द्रियेण पदार्थोपस्थितिरूपकारणयुक्तेन अनेकपदावगाहिनी वाक्यप्रतीतिः क्रियते। तदिदं वाक्यमाप्तपुरुषेण प्रयुक्तं सद् शब्दात्मकं प्रमाणम्। फलन्तु वाक्यार्थज्ञानम्। एतच्च शब्दलक्षणं प्रमाणं लोके वेदे च समानम्। लोके तु यः कश्चिदेवाप्तो भवति, न सर्वः। अतः न सर्वाणि लौकिकवाक्यानि प्रमाणानि। वैदिकानि वाक्यानि तु ईश्वरप्रणीतत्वात् सर्वाण्येव प्रमाणानीति तु विशेषः। अतः आप्तोपदेशः शब्दः प्रमाणमिति सिद्धमिति प्राचीननैयायिकदर्शितः पन्थाः।

**पदज्ञानं करणमिति पक्षः**

नवीननैयायिकाः ज्ञायमानशब्दस्य शाब्दबोधे करणत्वं नाङ्गीकुर्वन्ति। तेषाम्मते शब्दज्ञानमथवा पद[1]ज्ञानं करणम्।

वक्त्रा उच्चारितानि पदानि श्रुत्वा श्रोतुर्बोधो जायते, स च बोधः शाब्दबोधः। शाब्दबोधजनकञ्च पदमित्याशयेन प्राचीनाः ज्ञायमानानां पदानां शाब्दकरणत्वमुक्तवन्तः। परन्तु पदोच्चारणं विनापि शाब्दबोधो जायते। यथा ग्रन्थपारायणेन। तत्र लिप्याः वर्णस्य च सङ्केतग्रहो यस्यास्ति सः सङ्केतितपदज्ञानाद् वाक्यार्थं बुध्यति। एवं द्वित्वादिबोधकहस्तचेष्टया पदज्ञाने सति शाब्दबोधो जायते। अतः शाब्दबोधे पदज्ञानं करणं भवितुमर्हति, न तु ज्ञायमानं पदम्। पदज्ञानञ्च क्वचिदनुभवरूपं, क्वचिच्च स्मरणरूपम्।

यत्र साक्षात् वाक्यश्रवणं, तत्र पदज्ञानमनुभवरूपम्। यथा परस्परसम्भाषणादौ।

यत्र तु वाक्यश्रवणं नास्ति, परन्तु लिप्यादिना, हस्तादीनां चेष्टया वार्थावगमः, तत्र पदज्ञानं स्मरणरूपम्। स्वयं ग्रन्थपारायणं कृत्वा अर्थावबोधनसमये, अन्योच्चारयितृभावात् पदश्रवणं नास्ति। यदा लिप्यां चक्षुःसन्निकर्षो जायते, तदा लिपिसूचकानां पदानां स्मरणं जायते। तेन स्मरणात्मकपदज्ञानेन शक्तिज्ञानसहकारेण पदार्थस्मृतिद्वारा वाक्यार्थबोधो जायते।

एवं हस्तादीनां विविधचेष्टाभिरर्थप्रत्ययो भवति। यथा 'अत्रागच्छे' त्यर्थे हस्तमतिवेगमीषदाकुञ्च्य चालयति। तादृशहस्तचालनं दृष्ट्वा परः 'अत्रागच्छे'ति पदानि स्मृत्वा अर्थं बुध्यते। आगमनार्थकहस्तचलनविपरीतचालनेन 'गच्छ' इत्यर्थः प्रतीयते। अत्रापि पदज्ञानेनैव पदार्थावगतिद्वारा वाक्यार्थबोधः। एवं द्वयोर्नयनयोः

---

1 "पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥"

न्या. सि. मु. पृष्ठम् २६३

समं निमीलनेन 'नास्ति' इत्यर्थो बुद्ध्यते। शिरसः विजातीय-चालने ईप्सितानीप्सितयोः अवगमो भवतीत्यनुभवसिद्धम्। इत्थं बहुधा चेष्टाः सन्ति। तत्र सर्वत्र चेष्टादर्शनेन तत्सूचकानि पदानि स्मृत्वा, तदनन्तरमर्थावगमः। अतः पदज्ञानमेव करणं, न ज्ञायमानं पदम्।

**शब्दस्य पृथक् प्रमाणत्वम् नास्ति।** (पूर्वपक्षः)

सौगताः वैशेषिकाश्च शब्दस्य पृथक् प्रमाणत्वं नाङ्गीकुर्वन्ति। तेषामयमाशय :—

अनु[1]मानाद् शब्दस्य भिन्नत्वं नास्ति। द्वे अपि एकसम्बन्धि-ज्ञानविधया प्रवर्तते। अनुमाने वह्निधूमौ व्याप्तिसम्बन्धेन परस्परं सम्बद्धौ। सम्बद्धयोस्तयोर्द्वयोरेकस्य धूमस्य पर्वतादौ दर्शनेन अपरं सम्बन्धिनं वह्निं गृह्णाति। एवं शब्दार्थौ परस्परं वाच्यवाचक-भावाख्येन सम्बन्धेन सम्बद्धौ। एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारक-मिति रीत्या तयोर्द्वयोस्सम्बन्धिनोरेकस्य पदस्य ज्ञाने सति अपरस्य सम्बन्धिनः अर्थस्य ग्रहणम्। अनुमाने प्रत्यक्षदृष्टधूमः अप्रत्यक्षस्य वह्नेः ज्ञानं जनयति। शब्दे प्रयक्षश्रुतः शब्दः अप्रत्यक्षस्यार्थस्य बोधं जनयति।

शब्दानुमानयोर्द्वयोरपि सम्बन्धः सामान्यद्वारा एव। यत्र यत्र धूमः तत्र तत्र वह्निरिति व्याप्तिग्रहे धूमत्वजातिविशिष्टानां सर्वेषां धूमानां वह्नित्वजातिविशिष्टे व्याप्तिं गृह्णाति। एवं शक्तिग्रहे घटपदस्य घटत्वसामान्यविशिष्टे, पटपदस्य पटत्वसामान्यविशिष्टे च शक्तिं गृह्णाति।

सम्बन्धग्रहाभावे उभयोरपि न प्रवर्तनम्। धूमवह्न्योः महान-सादौ सहचारदर्शनादिना व्याप्तिं गृहीतमतामेव पर्वते धूमदर्शनेन वह्न्यनुमितिः स्यात्। यदि व्याप्त्यात्मकसम्बन्धो न गृहीतः, तर्हि धूमदर्शने वह्न्यनुमितिः न स्यात्। एवं घटपदस्य कम्बुग्रीवादिमत्यर्थं

---

1 न्या. म. (द्वि. सं.) पृष्ठम् १६२

शक्तिः, पटपदस्य वस्त्रे शक्तिः इति पदपदार्थयोः परस्परं सम्बन्धं ज्ञातवतामेव 'घटमानय' 'पटमानय' इत्यादौ शाब्दबोधः जायेत। पदपदार्थयोस्सम्बन्धग्रहाभावे तु शाब्दबोधो न स्यात्।

अत्रायं सन्देहः स्यात्—अविनाभावरूपसम्बन्धो व्याप्तिः। वाच्यवाचकभावरूपः सम्बन्धः शक्तिः। उभयोः परस्परमत्यन्तं भेदो वर्तत इति भिन्नसम्बन्धमूलकयोः प्रमित्योरपि भेदो भवेदेवेति।

सोऽप्यकिञ्चित्करः। सम्बन्धः सर्वत्रैकरूपो न भवेत्। अनुमितिस्थले साध्यहेत्वोः सम्बन्धः व्याप्तिः। तत्र व्याप्तिरित्येकेन नाम्ना व्यवह्रियमाणापि अन्वयव्यतिरेकादिभेदाद् व्याप्तेः भेदो वर्तत एव। तथापि सर्वत्रानुमितिस्थले व्याप्तिरूपामेकामेव सम्बन्धतयाङ्गीकरोति। तद्वद् भेदेऽपि सम्बन्धत्वमुभयत्रापि तुल्यम् इत्येव विवक्षितम्।

यथानुमाने धर्मविशिष्टो धर्मी साध्यः, तथा शब्दप्रमाणेऽपि अर्थविशिष्टः शब्दः साध्यः। गोत्वादिसामान्यं हेतुः।

अनुमितिस्थले 'अनुमिनोमी'त्यनुव्यवसायः, वाक्यार्थज्ञानस्थले तु 'शाब्दयामी' अनुव्यवसायः, अतो द्विविधयोरपि प्रमित्योर्वैलक्षण्यमिति शङ्का न कार्या। तथा वैलक्षण्यस्वीकारे अर्थसूचकानां हस्तचेष्टादीनामपि प्रमाणान्तरत्वप्रसङ्गः।

इयमप्याशङ्का स्यात्—पदज्ञाने पूर्ववर्णानुभवजनितसंस्कारस्य सहकारित्वं वर्तते। अनुमितौ न लिङ्गादेः ज्ञाने संस्कारस्य सहकारिकारणत्वम्। पुनः, शब्दः पुरुषायत्तः, विवक्षयां सत्यां पुरुषः स्वायत्तं शब्दं प्रयुनक्ति। धूमाद् वह्निज्ञानं न तथा। चक्षुषां पुरोवर्तिधूमेन सह सन्निकर्षे सति धूमदर्शनं, ततः व्याप्तिस्मरणं, वह्न्यनुमितिश्च जायते। अतो महान् भेदः शब्दानुमानयोरिति। एषा आशङ्का अस्थानस्था। शब्दप्रयोगस्य पुरुषाधीनत्वानुरोधेन तस्य शब्दस्य प्रमाणान्तरत्वस्वीकारे, हस्तसंज्ञादिलिङ्गेऽपि पुरुषाधीनत्वं वर्तत इति हस्तसंज्ञादीनामपि प्रमाणान्तरत्वापत्तिः।

अनुमाने महानसादिदृष्टान्तापेक्षा नियता। शाब्दबोधे तु दृष्टान्तापेक्षा न नियतेति अनुमानात् शब्दे विशेषो वर्तत इति वादोपि न सयुक्तिक:। असकृदभ्यस्तविषयेऽनुमानेऽपि दृष्टान्तापेक्षा न नियता। अनभ्यस्ते तु सम्बन्धस्मृतिसापेक्षत्वमुभयो: सममेव।

एषोऽन्योऽप्यारोप: स्याद् — एक एवाश्वादिशब्द: श्रोतृप्रति-भानुगुणं मृगविशेष-श्वोऽभवितेत्याद्यर्थान् बहून् प्रत्याययति, न तथा धूम: नानार्थान् प्रत्याययति, किन्तु वह्निमेकम्। एवं स्फुटार्थत्वा-स्फुटार्थत्वादिभेद: शब्दे दृश्यते न धूमादौ। अत: शब्दानुमानयो: महदन्तरं वर्तत इति।

स आरोपोऽप्यकिञ्चित्कर:। धूमधूलीपटलसमानाकारज्ञानात् एकस्य वह्न्यनुमिति:, अपरस्य सेनाद्यनुमितिरिति अनुमितावपि प्रति पत्तिभेदो दृश्यते स्पष्टलिङ्गकेऽपि विवक्षानुगुणं प्रतिपत्तिभेदो दृश्यत एव। यथा धूमात् वह्न्यनुमिति:, तथैव कदाचित् मनुष्यसद्भावस्य वानुमानं यथापेक्षं भवत्येव। एवं स्पष्टास्पष्टप्रतीत्यादिकमपि यथानुभवं तुल्यमेव। अनुमानापेक्षत्वस्य शब्देऽवर्जनीयतया ततोऽपि तस्य न स्वतन्त्रप्रमाणता।

'प्रमाणमविसंवादि ज्ञान'मिति कथनात् शब्दस्य प्रामाण्यं यदाविसंवादरूपं, तदाप्तत्वमूलमेव वक्तव्यम्। एवञ्चानुमानवत् शब्दोऽपि स्वप्रामाण्ये परमुखमेव निरीक्षत इति इदमनुमानमेवेति बौद्धा:।

वैशेषिकदर्शनं नैयायिका समानतन्त्रमामनन्ति। वैशेषिकसूत्रकार: कणाद: शब्दप्रमाणं स्वतन्त्रप्रमाणत्वेन नाङ्गीकुर्वति। 'एतेन [1]शाब्दं व्याख्यातम्' इति सूत्रेण शब्दस्यानुमितावन्तर्भाव उक्त:।

एवं बौद्धमते वैशेषिकमते च शब्दस्य न पृथक्प्रमाणत्वम्।

**शब्दस्य पृथक् प्रमाणता** (नैयायिकमतम्)

अनुमितौ शाब्दबोधे च सम्बन्धग्रहापेक्षा वर्तत इति द्वयो प्रमित्यो: तुल्यत्वं यदुक्तं, तदयुक्तम्। अभिनवविरचितश्लोकश्रवणे

1 वै. सू. ९. २. ३

सति पदसंस्कृतमतीनां तदर्थावगमो दृश्यते। तस्माद् वाक्यमनवगत-सम्बन्धमेव वाक्यार्थबोधने समर्थमिति ज्ञातुं शक्यते। परन्तु पदज्ञानेन पदार्थोपस्थितौ सत्यामेव शाब्दबोधो जायते। पदार्थोप-स्थितिः शक्तिज्ञानसाध्या। शक्तिश्च पदपदार्थसम्बन्धः। स च सामयिकः। न संयोगसमवायादिवत् प्राप्तिरूपः सम्बन्धः। यद्यपि पदार्थोपस्यितौ पदपदार्थयोः सम्बन्धज्ञानापेक्षा वर्तते, तथापि विषय-भेदात् सामग्रीभेदाच्च शब्दस्यानुमानाद्भिन्नत्वम्।

अनुमाने धर्मविशिष्टो धर्मो साध्यः। तद्वत् शब्दं पक्षीकृत्यार्थ-विशिष्टत्वं साधयितुं न शक्यम्। 'शब्दः अर्थवान्, शब्दत्वात् इत्येवं-रूपेण जनाः शब्दार्थयोः सम्बन्धं न गृह्णाति। परन्तु व्यवहारादिना। अस्य पदस्यायमर्थ इति पदानामर्थबोधकत्वं गृह्णन्ति। शब्दात् पृथगेवार्थः। अतः शब्दस्यार्थवत्त्वसाधने पक्षत्वं न सम्भवतीति सिद्ध्यति। धर्मविशिष्टस्य धर्मिणः साध्यस्येहासम्भवात् शब्दलिङ्ग-योर्महान् विषयभेदः।

अनुमाने 'यत्र यत्र धूमस्तत्र तत्र वह्नि'रित्यन्वयव्याप्तिः, 'यत्र यत्र वह्न्यभावस्तत्रतत्र धूमाभाव' इति व्यतिरेकव्याप्तिश्च भवतः। तादृशान्वयव्यतिरेकौ शब्दस्यार्थस्य च मिथः वक्तुन्न शक्यते। यत्र देशे शब्दो वर्तते, न तत्र देशेऽर्थो वर्तते। स्पृष्टा-दिनाभ्यन्तरप्रयत्नेन विवारसंवारादिबाह्यप्रयत्नेन च कण्ठताल्वाद्यु-पहिताकाशे शब्दो जायते। अर्थश्चापरत्र वर्तते। यस्मिन् काले शब्दः तस्मिन् कालेऽर्थः इत्यपि न। इदानीं युधिष्ठिराद्यर्थाभावेऽपि युधिष्ठि-रादिशब्दसद्भावाद्। अतः शब्दस्यार्थस्य च मिथः धूमाग्न्योरिव कालिकसामानाधिकरण्यं दैशिकसामानानाधिकरण्यञ्च नास्तीति सिद्धम्। परन्तु शब्दज्ञानार्थज्ञानयोर्मिथः कालिकसामानाधिकरण्यं दैशिकसामा-नाधिकरण्यञ्च भवतः। तत्तु वस्तुस्थितिकथनमेव, न शब्दमनुमानेऽन्त र्भावयितुमलम्। [1] "समयबलेन सिद्धायामर्थबुद्धौ समयनियमार्थावन्वय व्यतिरेकौ शब्दे, नान्वयव्यतिरेककृता च घूमादेरिवाग्नेः ततोऽर्थबुद्धिः।"

---

1 न्या. म. (प्र. सं) पृष्ठम् ४०८

ननु यत्र यत्र पदज्ञानं, तत्र तत्रार्थज्ञानं, यत्र यत्रार्थज्ञानाभावः तत्र तत्र पदज्ञानाभावः इत्यन्वयव्यतिरेकाधीनकार्यकारणभावग्रहादेव पदज्ञानमर्थज्ञानजनकमिति पदपदार्थयोः सामान्यशक्तिज्ञानं जायत इति, अनुमानादेवसामान्यशक्तिज्ञानस्योद्भव इति चेत्–तथापि सामान्यशक्तिग्रहोत्तरं गोपदादेव गोत्वविशिष्टस्य बोधः, घटपदादेव घटत्वविशिष्टस्य बोधः इत्यादिनियमज्ञानं जायते, ततः गोपदस्य गोत्वविशिष्टे शक्तिः, घटपदस्य घटत्वविशिष्टे शक्तिः इत्यादिशक्तिनिश्चयज्ञानं, ततः शाब्दबोध इति शाब्दबोधेऽनुमानपूर्वकत्वं सम्भवति इत्येव, न तु शब्दस्यानुमानेऽन्तर्भूतत्वम् ।

व्यवहाराद् शक्तिग्रहस्यानुमानिकत्वं सर्वसम्मतमेव । धूमाद् वह्न्यनुमितिस्थले महानसादौ प्रत्यक्षादेव धूमवह्न्योरविनाभावरूप-सम्बन्धनिर्णयः । प्रकृते तु वृद्धव्यवहारकालेऽनुमानाद् वाच्यवाचक-भावरूपसम्बन्धनिर्णयः । धूमवह्न्योः बहुशः सहचारदर्शनानन्तरं व्याप्तौ गृहीतायां पर्वतादौ धूमदर्शनेनैव वह्न्यनुमितिर्जायतो अतः अनुमानस्य प्रत्यक्षपूर्वत्वं वर्तते । परन्त्वनुमानं प्रत्यक्षात् भिन्नं द्वितीयं प्रमाणमभ्युपगच्छन्ति । एवमनुमानाधीनप्रवृत्तिकः शब्दः कथमनुमानं स्यात् ? अनुमानात् वाच्यवाचकभावस्यैवावगमः । वाच्यवाचकभावश्च नाविनाभावरूपः । धूमवह्न्योः सम्बन्धः न सङ्केतमूलकः किन्तु स्वाभाविकः । अतः शब्दानुमानयोर्महदन्तरं वर्तते । एवञ्च प्रत्यक्षपूर्वकस्यानुमानस्य यथा पृथक् प्रमाणत्वं, तथैव अनुमानपूर्वकस्य शब्दस्यापि पृथक् प्रमाणत्वं युक्तिसिद्धम् ।

यत्किञ्चिद्सम्बन्धमूलकत्वमात्राद् शब्दस्यानुमानेऽन्तर्भावे, इन्द्रि-यार्थसम्बन्धमूलकं प्रत्यक्षमपि अनुमानं स्यात् ।

अतः शब्दानुमानयोः यत् सादृश्यं निर्दिष्टं, तदुपरिप्लवमेव, सुक्ष्मदृष्ट्या निरीक्षणे तूभयोः महदन्तरं वर्तत इति सिद्धम् । ततश्च शब्दारव्यस्य प्रमाणस्य अनुमानात् पृथक्त्वं सिद्ध्यति ।

एषा आशङ्का स्यात् – शब्दस्य प्रमाणत्वमेव कथम्? प्रमा-करणं हि प्रमाणम् । शब्दस्य कदापि प्रमाजनकत्वं नास्ति ।

'अङ्गुल्यग्रे हस्तियूथशतमास्ते' इति वाक्यं प्रयुक्तं दृष्टम्। अर्थबोधश्च जायते। अतः शब्दाः असत्यर्थे बोधमुत्पादयति। विकल्पमात्रमूलाः[1] शब्दाः नार्थं स्पृशन्ति। अर्थासंस्पर्शिनः शब्दाः किं बोधयन्ति? जातिमात्रस्य शब्दार्थत्वे व्यक्तिबोधो न स्यात्। व्यक्तिमात्रस्य शब्दार्थत्वेऽननुगमाद् व्यक्त्यन्तरबोधनं न स्यात्। जातिमान् पदार्थस्तु कश्चन नास्त्येव। शब्दस्यार्थेन सम्बन्धः यः सङ्केतनामा सः नित्यः अनित्यः वा? नित्यत्वे शब्दस्यापि नित्यत्वप्रसङ्गः। अनित्यत्वेऽनवस्था। किञ्चातीन्द्रियेऽर्थे सम्बन्धग्रहणं कथम्? कुत्रापि केनापि 'अयमस्यार्थ' इति प्रदर्शयितुमशक्यत्वात्। इति।

आशङ्कासमाधानन्त्वित्थम् - यदि कदाचिदपि शब्दः यथार्थं प्रत्ययं नोपजनयेत्, तदार्थासंस्पर्शित्वं शब्दस्य स्वभाव इति वक्तुं शक्येत। परन्त्वाप्तोच्चरितात् 'नद्यास्तीरे फलानि सन्ती'त्यादिवाक्याद् यथार्थं प्रत्ययं जायमानं द्रष्टुं शक्यते। अत अर्थासंस्पर्शित्वं शब्दवैगुण्यकृतन्न, परन्तु वक्तृगतदोषकृतम्। वक्तारः स्वेच्छानुसारं पदानि प्रयुञ्जते, वक्ता अनाप्तश्चेत् तेनोच्चारितानि पदानि प्रमाणं न स्यादित्यत एवाप्तोच्चरितस्यैव पदस्य प्रमाणत्वं न्यायसूत्रकारेण निर्दिष्टम्। अतः प्रमायाः करणत्वं शब्दस्यास्त्येवेति शब्दः प्रमाणमेव। शब्दार्थसम्बन्धः सङ्केतः। तस्य स्वरूपं भाष्यकार एवं निर्दिशति - 'कः पुनरयं समयः? अस्य शब्दस्येदमर्थजातमभिधेयमित्यभिधानाभिधेयनियमनियोग'[2] इति। 'अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति साम्प्रदायिकाः। ईश्वरेच्छा न शक्तिः, किन्त्विच्छैवेत्याधुनिकाः।

स्वर्गः, अप्सरसः, उत्तराः कुरवः, सप्तद्वीपसमुद्रो लोकसन्निवेश इत्येवमादेरप्रत्यक्षस्यार्थस्य न शब्दमात्रात् प्रत्ययः, परन्तु

---

1 "विकल्पयोनयः शब्दाः विकल्पाः शब्दयोनयः।
तेषामन्योन्यसम्बन्धे नार्थं शब्दा स्पृशन्त्यमी॥"
दिङ्नागकृता कारिका जयन्तभट्टेन न्यायमञ्जर्यामुद्धृता।
न्या. म. (प्र. सं) पृष्ठम् ४१६

2 न्या. भा. पृष्ठम् १२८

*9

आप्तैरयमुक्तः शब्द इत्यतः सम्प्रत्यय इत्यपि भाष्यकारो [1]वदति। अतः स्वर्गादीनां बोधः स्वर्गादिपदोच्चारणे जायते इति तु निर्विवादम्। बोधो जातश्चेत् पदपदार्थयोः सम्बन्धोऽपि ज्ञातः। अत 'अस्यार्थस्य स्वर्गः इति नाम' इति प्रदर्शनाभावेऽपि सम्बन्धज्ञानं जायत इत्यनुभवः।

**प्रामाण्यविचारः**

ज्ञाननिष्ठं प्रमात्वं स्वतोग्राह्यं परतोग्राह्यं वेत्यत्र दार्शनिकानाम्मते महती विप्रतिपत्तिः वर्तते। साङ्ख्यास्तावत् प्रमात्वमप्रमात्वञ्चोभयमपि स्वतोग्राह्यमिति वदन्ति। बौद्धानाम्मते प्रमात्वं परतोग्राह्यम्, अप्रमात्वं स्वतोग्राह्यम्, मीमांसकानाम्मते प्रमात्वं स्वतोग्राह्यम्, अप्रमात्वं परतोग्राह्यम्। नैयायिकानाम्मते प्रमात्वमप्रमात्वञ्चोभयमपि [2]परतोग्राह्यमेव। अत्र स्वतोग्राह्यत्वमित्यनेन स्वग्राहकसामग्रीग्राह्यत्वमित्यर्थो विवक्षितः। स्वमित्यनेन ज्ञानं विवक्षितम्। तथा च यया ज्ञानं गृह्णाति तयैव सामग्र्या तन्निष्ठप्रमात्वमपि गृह्यत इत्यर्थः।

स्वतस्त्वं द्विविधम् – उत्पत्तौ ज्ञप्तौ चेति। उत्पत्तौ स्वतस्त्वं नाम प्रामाण्यस्य ज्ञानजनकसामग्रीजन्यत्वम्। येन कारणकलापेन ज्ञानं जन्यते तेनैव प्रामाण्यमपि जन्यते। अधिकापेक्षा नास्तीति यावत्। ज्ञप्तिर्नाम निश्चयः। '[3]तदभावाप्रकारा धीस्तत्प्रकारः तु निश्चय' इति निश्चयलक्षम्। ज्ञप्तौ स्वतस्त्वन्नाम येन कारणकलापेन ज्ञानं गृह्यते तेनैव प्रामाण्यमपि निश्चीयते। एवं परतस्त्वमपि

---

1 न्य. भा. (२.१.५३) पृष्ठम् १२३

2 प्रमाणत्वाप्रमाणत्वे स्वतः साङ्ख्या समाश्रिताः।
नैयायिकास्ते परतः सौगताश्चरमं स्वतः॥
प्रथमं परतः प्राहुः प्रामाण्यं, वेदवादिनः।
प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम्॥
स. द. सं. (जै) पृष्ठं १०६ – १०७

3 न्या. सि. मु. (का) १२८ पृष्ठम् ४७९

द्विविधम् – उत्पत्तौ ज्ञप्तौ चेति। उत्पत्तौ परतस्त्वञ्च यैः कारणैः ज्ञानं जन्यते तदितरकारणजन्यत्वं प्रमात्वस्य। एवं यैः कारणैः ज्ञानं गृह्यते, तद्भिन्नकारणेन प्रमात्वस्य निश्चयः, ज्ञप्तौ परतस्त्वम्।

साङ्ख्यमते प्रामाण्यमप्रामाण्यञ्चोभयमपि स्वतोग्राह्यमित्युक्तम्। तन्न युक्तम्। यदि हि ज्ञानस्य प्रामाण्यमप्रामाण्यं वा स्वत एव गम्येत, तर्हि शुक्ता'विदं रजत'मिति ज्ञानं प्रमाणतया प्रतिपन्नमप्रमाणतया वेति वक्तव्यम्। प्रमाणतया प्रतिपन्नं चेत् प्रवृत्तौ विसंवादो न युज्यते। अप्रमाणतया प्रतिपन्नञ्चेद् शुक्तौ रजतज्ञानानन्तरं प्रवृत्तिः कथं सम्भवति? वस्तुतस्तु रजतार्थी शुक्तांविदं रजत'मिति ज्ञानानन्तरं रजतलब्ध्यर्थं प्रवर्तते, प्रवृत्तौ विसंवदते च। प्रवृत्तिविसंवादात् पूर्वोत्पन्नज्ञानस्याप्रामाण्यं बुध्यति च। यद्यत्र प्रामाण्यं स्वत एव गृहीतं, तर्हि प्रवृत्तिः सफला भवेत्। अप्रामाण्यं स्वतः गृहीतञ्चेत् प्रवृत्तिः न युज्यते। भ्रमात्मकज्ञानानन्तरं प्रवर्तते, प्रवृत्तिरसफला भवति चेत्यनुभवसिद्धम्। अतः प्रामाण्यमप्रामाण्यमुभयमपि स्वतोग्राह्यमिति वादो निरर्थकः।

अप्रामाण्यं स्वतः प्रामाण्यन्तु परत इति वदतां बौद्धानां मते शुक्तौ रजतत्वबुद्धिमतः प्रवृत्तिर्नोपपद्यते। अप्रामाण्यमुत्पत्तौ करणदोषापेक्षम्। निश्चये बाधकज्ञानापेक्षमिति उत्पत्तौ ज्ञप्तौ च परतस्त्वमेव युज्यते। अतः अप्रामाण्यं स्वत इति न समीचीनम्।

प्रामाण्यस्य स्वतस्त्वमप्रामाण्यस्य परतस्त्वञ्च वदतां मीमांसकानां मतमपि न युक्तम्। अनभ्यासदशापन्नज्ञाने प्रामाण्यसंशयस्यानुभवसिद्धत्वात्। किञ्चिज्ज्ञानग्रहणानन्तरं, 'यत्किञ्चिद् जलज्ञानं मे जातं, तत् प्रमा न वे'ति प्रामाण्यसंशयः सर्वेषामनुभवसिद्धः। प्रामाण्यस्य स्वतोग्राह्यत्वे एष संशयो नोपपद्यते। ज्ञानग्रहणकाल एव प्रामाण्यस्यापि ग्रहणात्। अतः प्रामाण्यसंशयोत्पत्त्या ज्ञानहणग्रकाले प्रामाण्यं न गृह्यत एवेत्यनुमातुं शक्यते। अतः सिद्धं प्रामाण्यस्य ज्ञानजनकसामग्रीभिन्नसामग्रीजन्यस्वरूपमुत्पत्तौ परतस्त्वं, ज्ञानग्राहकसामग्रीभिन्नसामग्रीग्राह्यत्वरूपं ज्ञप्तौ परतस्त्वञ्च युक्तमिति एवमप्रामाण्यस्यापि।

ज्ञानमात्मनि जायते। अतः आत्मा समवायिकारणम्। आत्ममनःसंयोगोऽसमवायिकारणम्। प्रत्यक्षे मन-इन्द्रिय-इन्द्रिय-विषयसंयोगादिकम्, अनुमितौ व्याप्तिज्ञानपरामर्शादि, उपमितौ सादृश्यज्ञानातिदेशवाक्यस्मरणादि शब्दे पदज्ञानपदार्थोपस्थित्यादि च कारणम्। तत्र सर्वत्र प्रमाजनकस्तु गुणः। अत्र गुणशब्दः न द्वितीयपदार्थवाचकः। अपि तु प्रमासाधारणजनके रूढः। प्रत्यक्ष[1]-प्रमाजनको गुणः विशेषणवद्विशेष्यसन्निकर्षः। अनुमितिप्रमाजनको गुणः साध्यविशिष्टे पक्षे परामर्शः। उपमितौ शक्ये सादृश्यबुद्धिः प्रमाजनको गुणः। शाब्दे योग्यतायाः तात्पर्यस्य वा प्रमा गुणः। अतः ज्ञानसामान्यकारणभिन्नाद् गुणरूपाद् कारणाद् प्रमा जन्यत इति प्रामाण्यस्योत्पत्तौ परतस्त्वम्। प्रामाण्यनिश्चयः संवादिप्रवृत्त्यादिना अनुमितिरूपेण जायते। 'इदं ज्ञानं प्रमा, संवादिप्रवृत्तिजनकत्वाद्। यन्नैवं, तन्नैवं, यथा अप्रमा इत्यनुमानाकारः। प्रथमजलज्ञानानन्तरं जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वाद् इति पूर्वोत्पन्ने जलज्ञाने, प्रवृत्त्यनन्तरं प्रामाण्यं निश्चीयते। अतः प्रामाण्यं ज्ञप्तावपि परत एव।

अतश्च प्रामाण्यं स्वतः भवतीति पक्षः अयुक्तः - यतः कार्याणां कारणाधीनजन्मत्वाद्, प्रामाण्यस्य च कार्यत्वात्। प्रामाण्यमस्ति, तच्च वस्तु, न च नित्यमिति तत् कार्यमेव। कार्यञ्च कार्यत्वादेव स्वतो भवितुं नार्हति।

द्विविधं कार्यं भवति - सम्यगसम्यक् च। तत्र गुणवता कारणेन सम्यक् कार्यमुत्पद्यते, दोषवता त्वसम्यक्।

प्रामाण्यनिश्चयस्य द्वयी गतिः - नास्तित्वं कारणापेक्षिता च। प्रामाण्यनिश्चयः अस्ति, कारणानपेक्षश्चेति न शक्यते वक्तुम्।

---

1 "प्रत्यक्षे तु विशेष्येण विशेषणवता समम्।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः॥ १३२॥
पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेद्।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः॥ १३३॥
शब्दबोधे योग्यतायास्तात्पर्यस्याथवा प्रमा।
गुणः स्याद्........................॥ १३४॥" का. मु.

तत्र प्रथमज्ञाने तावन्नास्त्येव प्रामाण्यनिश्चयः। न हि नीलग्राहिणा प्रमाणेन नीलस्वरूपमिव स्वप्रामाण्यमपि तदानीं निश्चेतुं शक्यते। कालान्तरे तस्य प्रामाण्यनिश्चयोऽस्ति, तन्निश्चयस्य प्रवृत्तिसामर्थ्याधीनत्वात्।

भाष्यकारश्च – [1]'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाण'मित्युक्त्या प्रामाण्यस्य परतस्त्वमेव सूचयति। कालान्तरे संवादिप्रवृत्तिजनकत्वं ज्ञात्वैव ज्ञानस्य प्रामाण्यं निश्चेतुं शक्यते। प्रत्यक्षानुमानोपमानानामिव शब्दस्यापि प्रामाण्यं परत एव गृह्यत इति दृष्टम्। आप्तोच्चरितवाक्यं श्रुत्वा अर्थं ज्ञात्वा प्रवर्त्तमानानां फलसिद्धिदर्शनात् वाक्यस्यापि प्रामाण्य सिद्ध्यति। अर्थासंस्पर्शित्वादयो दोषाः न शब्दकृताः, परन्तु वक्तृगतदोषकृताः इत्यपि सिद्धम्। अतः शब्दाख्यस्य चतुर्थस्य प्रमाणस्य प्रमाणत्वं सिद्धम्।

नविननैयायिकमतमनुसृत्य शाब्दबोधे पदज्ञानं कारणं पदार्थोपस्थितिर्व्यापारः शक्तिज्ञानं सहकारिकारणं, शाब्दबोधः फलमित्युक्तम्। तत्र पदज्ञानं श्रावणप्रत्यक्षरूपं, स्मृतिरूपञ्चेति द्विविधम्। यत्र पदानामुच्चारणं वर्तते तत्र पदज्ञानं श्रावणप्रत्यक्षरूपम्। ग्रन्थपारायणस्थले हस्तचेष्टादिस्थले च पदज्ञानं स्मृतिरूपम्।

पदज्ञानं पदार्थस्मृतिद्वारा शाब्दबोधं प्रति कारणं भवति। अत एव तस्य करणत्वमुपपद्यते। व्यापारवत्कारणं खलु करणम्। अत्र पदार्थस्मृतिः व्यापारः। पदज्ञानस्य पदार्थस्मृत्यात्मकव्यापारवत्वं वर्तत इति करणलक्षणं तस्य सुसम्पन्नम्। व्यापारलक्षणञ्च तज्जन्यत्वे सति तज्जन्यजनकत्वरूपम्। अत्र तच्छब्देन करणमुच्यते। तथा च करणजन्यत्वे सति करणजन्यजनकत्वं व्यापारत्वमित्यर्थः। पदार्थस्मृतिः पदज्ञानाद् जन्यते। तच्चैकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्या। पदपदार्थयोः वाच्यवाचकभावाख्यः सम्बन्धो वर्तते।

---

1 न्या. भा. पृष्ठम् १

स च सम्बन्धः सामयिकः। समयश्च 'अस्मात् पदादयमर्थो बोद्धव्य' इत्येवंरूपः। सङ्केत इत्यप्यस्य सम्बन्धस्यापरा संज्ञा। सङ्केतश्च शक्तिर्लक्षणेति द्विविधः। यस्मिन् पदे उच्चारिते यस्यार्थस्य नियमेन प्रतीतिर्वर्तते तस्य पदस्य तस्मिन्नर्थे शक्तिः। स चार्थः तस्य पदस्य मुख्योर्थः यथा 'घट' इत्युच्चरिते कम्बुग्रीवादिमतः पदार्थस्य नियमेन प्रतीतिर्वर्तते। अतः घटपदस्य कम्बुग्रीवादिमति पदार्थे शक्तिः। एवं 'गौ'रित्युच्चारिते सास्नालाङ्गूलककुदखुरविषाणवतः सम्प्रत्ययो भवति। अतः गौरिति पदस्य सास्नादिमति पदार्थे शक्तिः। गौरिति पदस्य मुख्योऽर्थः सास्नादिमान् जन्तुः।

कदाचिद् वाक्यादर्थबोधे जायमाने, वाक्यघटकपदानां येष्वर्थेषु शक्तिः तदर्थकथने वक्तुस्तात्पर्यं नोपपद्येत। अतः तादृशस्थले पदानां शक्यार्थे सम्बद्धः अपरोऽर्थो वक्तव्यः। अत्र शब्देन स्वशक्यार्थसम्बद्धोऽर्थः लक्ष्यते। एतादृशस्थले पदपदार्थसम्बन्धः लक्षणा।

शक्त्या बोध्योऽर्थः शक्यः। वाच्यमित्यपि शक्यस्यापरं नाम। शक्यार्थबोधकपदस्य वाचकमिति नाम। वाच्यवाचकयोः सम्बन्धः शक्तिः।

लक्षणया बोध्योऽर्थः लक्ष्यः। लक्ष्यार्थबोधकपदस्य लक्षकमिति नाम। लक्ष्यलक्षकयोः सम्बन्धः लक्षणा। लक्षणा च तात्पर्यानुपपत्त्या स्वीक्रियते। 'गङ्गायां घोष' इत्यत्र गङ्गापदस्य घोषपदस्य च शक्यार्थस्वीकारे 'गङ्गाप्रवाहवृत्तिः घोष' इति बोधः स्यात्। परन्तु प्रवाहस्य घोषाधारत्वं न सम्भवतीति तादृशार्थकथने वक्तुस्तात्पर्यं न स्याद्। अतः अत्र तीररूपार्थे लक्षणा कल्प्यते। तीरपदार्थश्च गङ्गापदशक्यार्थेन प्रवाहेण सामीप्यात्मकसम्बन्धेन

---

1 "शक्यार्थसम्बन्धः यदि तीरत्वेन रूपेण गृहीतः तदा तीरत्वेन तीरबोधः। यदि तु गङ्गातीरत्वेन रूपेण गृहीतः तदा तेनैव रूपेण ग्रहणम्। अत एव लक्ष्यतावच्छेदके न लक्षणा, तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः।" न्या. सि. मु. (श. ख)

सम्बद्धः। अतः 'गङ्गायां घोष' इति पदात्[1] 'तीरे घोष' इत्यर्थ-बोधः। लक्षणया बोध्योऽर्थः गौणः।

एवञ्च पदस्यार्थस्य च शक्तिर्लक्षणा चेति द्विविधः सम्बन्धः भवतीत्यायातम्। अतः पदपदार्थौ सम्बन्धिनौ। यथा हस्तिहस्ति-'पकयोर्मिथः सम्बन्धं ज्ञातवतां हस्तिपकदर्शने हस्तिस्मरणं जायते तद्वत् पदतदर्थयोस्सम्बन्धं ज्ञातवतां पदज्ञाने सति पदार्थस्मृतिर्जायते। अत्र पदज्ञानस्य स्मारकत्वम्। अतः पदज्ञानजन्यं भवति पदार्थ-स्मृतिः। उच्चरितपदश्रवणाभावे, लिप्यादिना पदस्मरणाभावे वा शाब्दबोधो न जायत इति शाब्दबोधः पदज्ञानजन्यः पदज्ञानजन्या पदार्थस्मृतिः वाक्यार्थबोधे हेतुः। करणात् पदज्ञानात् जन्यत्वं, करणरूपपदज्ञानजन्यशाब्दबोधजनकत्वञ्च वर्तत इति पदार्थस्मृतेः व्यापारलक्षणमुपपद्यते। अतः पदार्थस्मृतिः शाब्दबोधं प्रति व्यापारः।

**अभिहितान्वयवादः**

भाट्टमीमांसकाः वाक्यार्थबोधे पदानां कारणत्वं नाङ्गीकुर्वन्ति। पदानामर्थबोधने एव सामर्थ्यम्। पदैरभिहिताः पदार्थाः वाक्यार्थ-बोधने समर्थाः। तथा च शाबरभाष्यम् — [1]"पदानि स्वंस्व-मर्थमभिधाय निवृत्तव्यापाराणि; अथेदानीं पदार्थाः अवगतास्सन्तः वाक्यार्थमवगमयन्ति।" इति।

पदश्रवणानन्तरमपि, पदार्थज्ञानाभावे अन्वयबोधो न जायत इत्यनुभवसिद्धः पदार्थज्ञानसत्त्वे चान्वयबोधो जायत इत्यप्यनुभव-सिद्धः। अतः अन्वयव्यतिरेकाभ्यां पदार्थस्यान्वयबोधं प्रति कारणत्वं सिद्धम्। पदार्थज्ञानानन्तरमन्वयबोधो नविलम्ब्यते। अन्वय-बोधाव्यवहितपूर्ववर्त्तित्वं पदार्थज्ञानस्यैव। पदज्ञानस्य त्वन्वयबोधाद् अव्यवहितपूर्ववर्तित्वं न सम्भवतीत्यतोऽपि पदार्थस्यैव शाब्दबोधं प्रति करणत्वं युक्तम्।

पदार्थानामेव परस्परान्वयार्हत्वम्। अतस्तेषु परस्परान्वयरूप-वाक्यार्थबोधसामर्थ्यं क्लृप्तमेव। पदानान्तु अन्वितार्थप्रतिपादन-शक्तिः अत्यन्ताक्लृप्ता।

---

1 शा. भा. १. १. २४

पदानां वाक्यार्थावगमसामर्थ्यकल्पनापेक्षया पदार्थानां वाक्यार्थावगमशक्तिकल्पनमुचितं लाघवाद्। पाणिकरहस्तादीनां पर्यायपदानामेकार्थबोधकत्वम्। तादृशस्थले पदार्थस्य शाब्दबोधकारणत्वं वदतामभिहितान्वयवादिनामेकस्यैवार्थस्य वाक्यार्थावगमशक्तिः कल्पनीयेति लाघवम्।

पदं विनापि पदार्थमात्राद् वाक्यार्थबुद्धिरुदेति। कवीनां कर्माणि काव्यान्यत्र निदर्शनम्। स्वयमुत्प्रेक्षितमर्थं कवयः काव्ये निबध्नन्ति। अर्थं बुद्ध्वा हि वाक्यरचना। कवेः काव्यहेतुकवाक्यार्थज्ञानं पदानि जनयन्तीति न युक्तम्। चिन्तावशेनोपस्थिताः पदार्थाः एव परस्परमन्वयरूपवाक्यार्थज्ञानं जनयति।

'पश्यतः श्वेतमारूपं हेषाशब्दश्च शृण्वतः।
खुरविक्षेपशब्दञ्च श्वेतोऽश्वो धावतीति धीः॥
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित्॥'

इति वार्तिककारोक्तदिशा येन पुरुषेण अज्ञाताश्रयं श्वैत्यं प्रतिपन्नं ह्रेषाशब्देनाश्वोऽनुमितः खुरविक्षेपशब्देन अज्ञातकर्तृकं धावनञ्चानुमितं तस्य पुरुषस्य 'श्वेतोश्वो धावतीति' वाक्यार्थबुद्धिरुदेति। अत्र पदं न श्रूयते। पदार्था एवोपस्थिताः। अतः वाक्यार्थबोधं प्रति पदार्थानामेव करणत्वमिति मतमेव समीचीनम्।

पाकपराण्यपि काष्ठानि साक्षात् न पाकसमर्थानि। अपि तु ज्वलन एव। ज्वलनद्वारा तु पाके उपयुज्यन्ते। एवमेव पदानि स्वार्थप्रतिपादन एव समर्थानि। तेषां वाक्यार्थावगमे न सामर्थ्यम्। काष्ठाः यथा ज्वालाद्वारेण पाके समर्थास्तथा पदानि पदार्थप्रतिपादनद्वारा वाक्यार्थबोधे प्रयोजकानि। "अर्थस्य[1] तन्निमित्तत्वाद्" इति सूत्रेण सूत्रकारोऽपि पदार्थस्यैव व्यक्ततया वाक्यार्थबोधहेतुतामाचष्टे।

पदञ्च शुद्धं पदार्थस्वरूपमभिधत्ते। तावता पदं चरितार्थम्। घटादिपदाज्जायमानं घटत्वादिरूपमभिधेयज्ञानं स्मरणरूपं, ज्ञातपदार्थ-

---

1 जै. सू. १.१.२५

मात्रविषयत्वेनाधिगतार्थगोचरत्वात् । आचार्यवाचस्पतिमिश्राश्चाभिहितान्वयप्रस्तावे वाक्यार्थप्रत्ययकारण पदजन्यपदार्थज्ञानं स्मृतिपदेन व्यवहरन्ति ।

यद्यपि पदाज्जायमाना पदार्थप्रतिपत्तिः स्मरणमित्युक्तं तथापि स्मृत्यनुभवविलक्षणमेव । पदाज्जायमाना पदार्थप्रतिपत्तिः न स्मरणं, स्मारकस्य सम्बन्धस्याभावात् । हस्तिहस्तिपकयोः संयोगात्मकसम्बन्धं ज्ञातवतः हस्तिपकदर्शने हस्तिनः स्मरणं जायते । पदपदार्थयोस्तादृशस्य संयोगादेः सम्बन्धस्याभावात् पदज्ञानात् पदार्थस्मृतिर्जायत इति वक्तुन्न शक्यते । वाक्यार्थप्रयोगसमये पदाज्जायमानं पदार्थमात्रावगाहि ज्ञानं नानुभवरूपम्, अज्ञातविषयत्वाभावात् । अतः पदाज्जायमानं पदार्थज्ञानं प्रमाणबलात् स्मृत्यनुभवविलक्षणमङ्गीक्रियते । प्रामाणिकैः कृतः स्मरणव्यवहारस्तु पदजन्यपदार्थज्ञानस्य गृहीतग्राहित्वेन स्मृत्यविशिष्टत्वात् । अत एव [1]'पदमभ्यधिकाभावाद् स्मारकान्न विशिष्यते' इत्यत्र स्मारकादविशेष एवोक्तः, न तु स्मारकतैवोक्ता । स्मृत्यनुभवविलक्षणस्य च पदजन्यपदार्थज्ञानस्य 'अभिधान'मिति नाम । अभिधानात्मकविलक्षणज्ञानविषयीभूताः पदार्था अभिहिता इत्युच्यन्ते । ते च परस्परान्वयानुभवं जनयन्ति । 'नलो राजासी'दित्यादौ अतीतस्य नलादेरिदानीमसत्त्वेन, पदार्थानां वाक्यार्थबोधजनकत्वमङ्गीकुर्वतामभिहितान्वयवादिनां कथं संसर्गानुभवकारणत्वमिति नाशङ्कनीयम् । नित्याया जातेरेव पदार्थत्वाङ्गीकारात् । अतो न दोषः ।

पदजन्यं पदार्थस्वरूपमात्रविषयकमभिधाननामकं ज्ञानं निर्विकल्पकम् । "पदजन्यमभिधानमेव संसर्गावगाहिशाब्दबोधहेतुरासत्तिः । आकाशपदादाश्रयाश्रयिभावसम्बन्धेनाकाशोपस्थितौ सत्यामाकाशमेकमिति बोधो न जायते । अतः वृत्या साकाङ्क्षपदजन्यं ज्ञानं हेतुरिति वक्तव्यम् । वृत्या तादृशपदजन्यत्वञ्च तदर्थवृत्तिज्ञानजन्यसंस्कार सहकृतपदजन्यत्वम् । तथा चोक्तसंस्कारपदाभ्यां जनितस्य पदार्थज्ञानस्य वाक्यार्थबुद्धिहेतुता पर्यवसिता [2]बोध्या ।"

1 श्लो. वा. पृष्ठं ४३२   2 शा. त. (प्र. त) पृष्ठम् १४

एवमभिहिताः पदार्थाः स्वसम्बन्धिनीमन्वितावस्थां लक्षणा-व्यापारेण बोधयन्ति। पदानि पदार्थान् बोधयन्ति। पदार्थाः वाक्यार्थं बोधयन्ति। पदार्थानां वाक्यार्थबोधकत्वं लक्षणाव्यापारेण।

अभिहितान्वयवादिमते पदबोध्यः शक्यः। पदार्थबोध्यो लक्ष्यः। 'गङ्गायां घोष' इत्यत्र लाक्षणिकं तीरं स्मृतिविषयः वाक्यार्थस्तु लाक्षणिक अनुभवविषय इत्येव भेदः।

पदानां प्रमाकरणत्वरूपं प्रमाणत्वं भाट्टमते न सम्भवति। किन्तु प्रमाप्रयोजकत्वरूपम् प्रमाणत्वमेव।

'गङ्गायां घोष' इत्यादौ गङ्गापदस्य तीरे लक्षणास्वीकारे गङ्गापदशक्यप्रवाहसम्बन्धज्ञानमपेक्षितम्। वाक्यार्थावगमात्पूर्वं पदार्थ-संसर्गे तथा पदार्थप्रतियोगिकत्वरूपसम्बन्धज्ञानं नापेक्षते। कुत इति चेद् यत्र बोध्यप्रमापूर्वं बोध्योपस्थितिरपेक्ष्यते तत्रैव बोध्य-बोधकसम्बन्धज्ञानस्य कारणत्वम्। तीरादिसम्बन्धावगाहिशाब्दबुद्धौ तीरोपस्थितेर्हेतुत्वं, तीरोपस्थितिश्च गङ्गापदबोध्यप्रवाहेण तीरस्य सम्बन्धज्ञानं विना न सम्भवति। यत्र बोध्यप्रमापूर्वं बोध्योप-स्थितिर्नापेक्ष्यते तत्र बोध्यबोधकसम्बन्धज्ञानं न कारणम्।

**बोध्यबोधकसम्बन्धस्य स्वरूपसन्नेव कारणत्वम्**

चक्षुषा घटगतनीलप्रत्यक्षे बोध्यस्य नीलस्य बोधकस्य चक्षुषश्च सम्बन्धः संयुक्तसमवायः भवति। परन्तु 'नीलम्' इति प्रत्यक्षं प्रति 'प्रमाणस्य चक्षुषः प्रमेयस्य नीलस्य च मिथः सम्बन्धो वर्तत' इति ज्ञानं नापेक्षितम्। संयुक्तसमवायात्मके सम्बन्धे जाय-माने सति प्रत्यक्षं जायते। अत्र सम्बन्धस्य स्वरूपसन्नेव हेतुत्वं, न ज्ञातस्य। एवं वाक्यार्थसंसर्गबोधे अपि तस्य संसर्गस्योपस्थितिः नापेक्ष्यते। अतः बोध्ये संसर्गे बोधकस्य पदार्थस्य सम्बन्धज्ञानं नापेक्षितम्। स्वरूपसन्नेव सम्बन्धस्य प्रयोजकत्वम्।

पदार्थस्य वाक्यार्थबोधं प्रति करणत्वस्वीकारे पदार्थस्याति-रिक्तप्रमाणत्वापत्तिः, वाक्यार्थबोधस्य शब्दजन्यत्वाभावाद् अशाब्द-त्वापत्तिश्च दुष्परिहरमित्याशङ्का न कार्या। पदाभिहितानां

पदार्थानां शब्दप्रमाणे एवान्तर्भावः। अन्वयप्रतीतेः शब्दजन्यत्वाभावेऽपि शब्दावगतपदार्थजन्यत्वात् शाब्दत्वं, तद्विषयत्वाद् वाक्यार्थस्यापि शाब्दत्वं सिद्ध्यति। एवञ्चेत् चक्षुरिन्द्रियावगतधूमरूपप्रमाणेन जातायाः 'पर्वतो वह्निमानि'त्यनुमितेरपि चाक्षुषत्व स्यादिति नापादनीयम्। पदानां पदार्थावगममवान्तरव्यापारीकृत्य अन्वयानुभावकत्वकल्पनात्। तथा चक्षुषः लिङ्गज्ञानमवान्तरव्यापारो नेत्यनुमितेः चाक्षुषत्वापत्तिः नैव सम्भवति।

एवञ्चाभिहितेन पदार्थेन करणेन अन्वयः पदाथसंसर्गरूपान्वयधीः अभिहितान्वय इति अभिहितान्वयपदव्युत्पत्तिरन्वर्थः।

**अन्विताभिधानवादः**

प्राभाकरमीमांसकाः अन्विताभिधानवादिनः। तेषाम्मते पदानि अन्विताभिधायीनि। पदान्येव वाक्यार्थबोधं जनयन्ति। पदान्येव वाक्यम्। पदार्थ एव वाक्यार्थः। वाक्ये घटकानां सर्वेषां पदानां वाक्यार्थबोधे कारणत्वम्। यथा त्रयो ग्रावाणः उखां बिभ्रति तद्वत्। पदानामर्थान्तरान्वितस्वार्थे शक्तिः। अर्थावगमे शक्तिग्रहः आवश्यकः। दीपप्रकाशः स्वरूपसन्नेन अर्थप्रत्यक्षे हेतुः। शब्दस्तु न तथा। शक्तिग्रहे सत्येव पदान्यर्थबोधं जनयन्ति। शक्तिग्रहश्च व्यवहारेण। यदा प्रयोजकवृद्धः प्रयोज्यवृद्धं प्रति 'गामानये'ति वदति, प्रयोज्यवृद्धश्च तच्छ्रुत्वा गामानयति, तद्दृष्ट्वा व्युत्पित्सुः बालः 'प्रयोज्यवृद्धस्य प्रवृत्तिः ज्ञानजन्या प्रवृत्तित्वात्' इति प्रयोज्यवृद्धप्रवृत्तेर्ज्ञानजन्यत्वमनुमीय तदनन्तरं 'प्रवृत्तिजनकं ज्ञानं वाक्यजन्यं, वाक्यप्रयोगानन्तरभावित्वाद्' इत्यनुमिनोति। एवमसकृत् प्रयोगेन 'गामानये'ति वाक्यस्य गोकर्मकानयने वाक्यार्थे व्युत्पत्तिं गृह्णाति। ततः कदाचिद् 'अश्वमानय' 'गां नये'त्यादौ आवापोद्वापाभ्यां अश्वपदस्य इतरान्वितहयरूपेऽर्थे, गोपदस्येतरान्वितसास्नादिमत्यर्थे च शक्ति गृह्णाति। इत्थं शक्तिग्राहकप्रमाणमूर्धन्येन व्यवहारेण पदानामितरान्वितस्वार्थे शक्तिः सिद्धयति। सा चेतरान्वितार्थानुभवजनकत्वारूपा। इयमेव पदानामानुभाविकी शक्तिः।

अभिहितान्वयवादिनः पूर्वं शब्दावगतपदार्थजन्यज्ञानविषयत्वेन

परम्परया शब्दप्रयोज्यत्वाद् वाक्यार्थबोधस्य शाब्दत्वमुपवर्णितम्। तथा चेद् शब्दग्राहकश्रोत्रस्यापि वाक्यार्थबुद्धिप्रयोजकत्वाद् वाक्यार्थस्य श्रौत्रत्वमपि व्यवह्रियेत। अतः पदानां साक्षाद् वाक्यार्थबोध-जनकत्वशक्तिरेवोचिता।

पदं विना पदार्थमात्रेण श्वेतोऽश्वो धावतीति धीर्भवतीति यदुक्तं तन्न सम्यक्। श्वैत्याधिकरणे ह्रेषाशब्दः, खुरविक्षेपध्वनि-श्चावगतौ चेत्, तत्र ह्रेषाशब्देन हेतुना अश्वस्यानुमितिः। ह्रेषा शब्दः श्वैत्यं खुरविक्षेपशब्दश्च यदि स्वरूपत एव ज्ञाता, न तु तेषां सामानाधिकरण्यमपि, तदाऽर्थापत्तिप्रमाणेन श्वेतोऽश्वो धावतीति धीः। तदित्थम्—अश्वातिरिक्तमपरं द्रव्यं तत्र नास्तीति पूर्वमेव सुनिश्चितं, ह्रेषाशब्दश्च श्रूयते, खुरविक्षेपशब्दोऽपि श्रूयते, श्वैत्यञ्चाज्ञाताश्रयं दृष्टं अतः इतरद्रव्यकर्तृकधावनानुपपत्त्या खुरविक्षेपशब्दश्रवणान्यथानुपपत्त्या अश्वकर्तृकधावनबोधः। यदि च द्रव्यान्तराभावनिश्चयो न जातः, तदा श्वेतोऽश्वो धावतीति धीर्नोदेति। पदं विना केवलपदार्थबोधाद् एव श्वेतोऽश्वो धावतीति बुद्धिरुदेति चेद्, तर्ह्यस्य ज्ञानस्य कस्यां प्रमितावन्तर्भावः? पदाभावान्न शाब्दम्। वस्तुसंसर्गावगाहि ज्ञानं सर्वं शाब्दमिति वक्तुन्न युक्तम्। तदनन्तरं 'धावन्तमश्वं शाब्दयामि' इत्यनुव्यव सायोऽपि नास्ति। अतः श्वेतोऽश्वो धावती'त्यत्र पदार्थमात्रेण शाब्दबोध इति न युज्यते।

काव्यरचनाहेतुभूतं पदार्थसंसर्गज्ञानं मानसम्।

शक्तिग्राहकप्रमाणेषु व्यवहार एव सर्वप्रधानः। तेन व्यवहारेण पदानां कार्यान्वित एवार्थे शक्तिं गृह्णाति। अतः सर्वत्र कार्या-न्वितार्थविषयक एव शाब्दबोधः। यत्र कार्यवाचिपदन्न श्रूयते तत्रापि लिङादिपदमध्याहृत्यैव बोधः। "चैत्र पुत्रस्ते जात' इत्यत्र 'तं पश्ये'त्यध्याहारेणान्वयबोधः। 'चैत्र पुत्रस्ते जातो मृतश्चे'त्युक्तौ 'जानीही'ति क्रियाध्याहारः। एवं सर्वत्रातिपरम्पर-यापि कार्यान्वितार्थानुभवजनकत्वमेव पदानां स्वीक्रियते।

अतः 'को गच्छति?' 'राजा गच्छती'त्यादौ, कविकृतस्वभाववर्णनादौ च 'जानीही'ति योग्यक्रियाध्याहारेण कार्यान्वितार्थानुभवस्यैवोपगमात् पदानामेव वाक्यार्थानुभावकत्वमिति पदार्थानां वाक्यार्थावगमसामर्थ्यं क्लृप्तमिति वादो न साधुः।

प्रमेये प्रमाणस्य सम्बन्धोऽपेक्षितः। 'भूतलं घटवदि'ति बुद्धौ प्रमाणं चक्षुः। प्रमेयं भूतलं घटः संयोगश्च। तत्र प्रमाणस्य चक्षुषः प्रमेयेन भूतलेन घटेन च सह संयोगः सम्बन्धः। संयोगेन सह तु संयुक्तसमवायः। एवं वाक्यार्थबोधं प्रत्यपि प्रमाणस्य शब्दस्यानुभावकत्वरूपः सम्बन्धः अवश्य वाच्य इति पदानामन्विते शक्तिस्वीकार आवश्यकः।

अन्वयमन्तरेणान्वितस्य न पृथगात्मलाभः। यथा घटमन्तरेण पटः पृथगवतिष्ठते, न तथाऽन्वयमन्तरेणान्वितत्वं पृथगवतिष्ठते। अतः अन्वयमन्तरेणान्वितस्य प्रत्येतुमशक्यत्वाद्, अन्वयप्रतीतौ चान्वितस्यापि प्रतीतेर्वर्तमानत्वाद् एकैव शक्तिः। जातिशक्ताद् पदाद् जातौ भासमानायां व्यक्तिरपि भासते, व्यक्तिं विना जातेरप्रतीतेः, शक्तिस्वीकारस्तु जातौ तद्वत्।

यथा नैयायिकाः घटत्वविशिष्टे घटपदस्य शक्तिस्वीकारे घटघटत्ववैशिष्ट्येषु त्रिष्वेकामेव शक्तिं स्वीकुर्वन्ति तद्वदन्वयविशिष्टे शक्तिस्वीकारे अन्वये पृथक् शक्तिर्नावश्यकी। तस्मात् पदानामन्विते शक्तिरन्वयपर्यन्ता भवति।

पर्यायपदप्रयोगावसरे पाणिकरहस्तादीनां शब्दानामर्थस्यैकत्वात् एकस्यैवार्थस्य वाक्यार्थावगमे हेतुत्वं कल्पनीयमित्यभिहितान्वयवादिनाम्मते लाघवमिति यदुक्त, तत्तुच्छम्। अन्विताभिधानमतेऽपि पदानामन्वयेऽर्थे च पृथक् शक्तिर्न स्वीक्रियते। अर्थं विनान्वयस्य, अन्वयं विनार्थस्य च पदादननुभवेन अन्वितार्थानुभवरूपकार्यस्यैकत्वेन तदनुकूलशक्तिरप्येकैव।

आकाङ्क्षितं योग्यं सन्निहितं पदार्थान्तरं, तदन्विते शक्तिग्रहणं सम्भवति। अन्वयप्रतियोगिजिज्ञासा आकाङ्क्षा। सन्निधिर्न शब्दे-

नैवापेक्षितः। अध्याहृतेनाप्यन्विताभिधानसम्भवाद्। अन्विताभिधानानुपपत्तिवशाद् खल्वध्याहारः। सा चानुपपत्तिर्योग्यप्रतियोग्यर्थोपस्थापनेन शान्ता भवतीत्यर्थाध्याहार एवावश्यकः, न शब्दाध्याहारः। अत एव 'घटेन जलमाहरे'त्यत्र छिद्रेतरत्वस्यापि शाब्दबोधे भानं स्वीक्रियते। योग्यत्वं सम्बन्धार्हत्वम्। यस्य योग्यत्वमवधारितं तेनान्वयः।

केवलस्यैकस्य पदस्य नान्विताभिधायकत्वं वर्तते। प्रतियोगिन अनुपस्थापनाद्। अतः पदश्रवणे प्रथममनन्वितार्थस्मरणमेव जायते। यद्यपि व्यवहारेण संसृष्टे एव शक्तिग्रहस्तथापि केवलपदश्रवणकालेऽसंसृष्टस्य पदार्थस्य स्मरणमेव जायते। अन्वितार्थेऽनन्वितांशस्यापि विद्यमानत्वात् तथा स्मरणस्य नानुपपत्तिः। विशिष्टानुभवादपि क्वचित्कारणवशात् विशेष्यमात्रस्मरणं लोके दृश्यते।

एकैकपदश्रवणानन्तरमनन्विततत्तदर्थोपस्थितौ सत्यामेकस्मृत्यारूढेभ्यः पदेभ्य आकाङ्क्षितयोग्यसन्निहितार्थान्तरान्वितप्रतीतिर्जायत इति [1]नान्योन्याश्रयः।

'घटमानये'त्यत्र घटपदेनानयनान्वितघटस्य, आनयेति पदेन घटान्वितानयनस्य च बोधात् वाक्यभेदापत्तिर्न विभावनीयम्। एकस्मिन् वाक्यार्थे पर्यवसन्ने, वाक्यार्थान्तरबोधो भवति चेत् तत्र वाक्यभेदः आपादयितुं शक्यते। विशेष्यविशेषणमात्रभेदेऽपि प्रकृते 'घटमानये'त्यत्र घटानयनात्मकस्यार्थस्याभेदात् न वाक्यभेदः।

घटादिपदानामन्वितघटे शक्तिस्वीकारेऽपि घटपदं घटत्वस्य वाचकमित्येव व्यवहारः, नान्वितघटत्वस्य वाचकमिति; न वान्वितघटत्वं घटपदवाच्यमिति व्यवह्रियते।

---

1 "किञ्च पदं किं पदान्तरानभिहितेनान्वितमर्थमभिधत्ते उत पदान्तरेणाभिहितार्थान्वितमर्थम्। आद्ये पदान्तरवैयर्थ्यम्। एकेनैव पदेन सर्वान्वयप्रतीतिसम्भवाद्। द्वितीयेऽन्योन्याश्रयः। प्रथमपदमन्वितस्वार्थाभिधानाय द्वितीयपदाभिधानमपेक्षते। द्वितीयपदमपि अन्वितस्वार्थाभिधानाय प्रथमपदाभिधानमपेक्षते।" इति (शा. त. (प्र–त.) पृष्ठम् ३१-३२) अन्योन्याश्रयः आरोपितः।

घटत्वनिरूपितत्वेन शक्तिज्ञानस्य शाब्दधीप्रयोजकत्वात् घटत्वमेव वाच्यतया व्यवह्रियते। एवञ्चान्वयस्य नानात्वेऽपि घटादिपदस्य न नानार्थकत्वम्। यत्र नानाधर्माणां प्रत्येकनिरूपितत्वेन पदे शक्तिग्रहाः शाब्दबोधहेतवस्तत्रैव पदस्य नानार्थता। यथा हर्यादिपदस्य। तत्र विष्णुत्वसूर्यत्वादिप्रत्येकनिरूपितत्वेन हरिपदे शक्तिज्ञानस्य विष्ण्वादिविषयकशाब्दबोधहेतुतास्वीकारात्। अन्वयं निरूपितत्वेन शक्तिग्रहस्य हेतुतायाः अनङ्गीकारेण तद्भेदेन नानार्थत्वापत्तेरसम्भवात्।

**शाब्दबोधप्रकारः**

अन्विताभिधानमते नावान्तरवाक्यार्थबोधपूर्वकः महावाक्यार्थबोधः। परन्तु क्रियाकारकसंसर्गावगाही शाब्दबोधः कार्यताविषयकः। स च न विशिष्टवैशिष्ट्यावगाही। तत्कारणस्य विशेषणतावच्छेदकप्रकारकनिर्णयस्य पूर्वमभावात्। तस्मात् खलेकपोतन्यायेनैव शाब्दबोधः।

अभिहितान्वयवादिमते प्रकृतिप्रत्ययार्थान्वयबोधोत्तरमेव तादृशबोधरूपकारणेन क्रियाकारकसंसर्गावगाहिशाब्दबोधो जायत इति महावाक्यार्थबोधः विशिष्टवैशिष्ट्यावगाह्येव।

**नैयायिकमतम्**

न्यायमते वाक्यार्थः न शक्यः, न वा लक्ष्यः, किन्त्वाकाङ्क्षाभावस्यः। पदानि पदार्थस्मृतिद्वारा आकाङ्क्षादिसहकारेण शाब्दबोधजनकानि। पदश्रवणेऽर्थस्मृतिः शक्तिग्रहे सत्येव सम्भवति। सङ्केतो लक्षणा चार्थे पदवृत्तीः। सङ्केत एव शक्तिः। सा 'चेदं पदममुमर्थं बोधयत्वि'ति 'अस्मात् पदादयमर्थो बोद्धव्य' इति वेश्वरेच्छारूपा।

ईश्वरेच्छायाः शक्तित्वं प्राचीननैयायिकमतमनुसृत्यैव। नवीननैयायिकाः केवलाया इच्छायाः शक्तित्वं वदन्ति। अतः आधुनिकैः सङ्केतिते नदीवृद्ध्यादिपदेऽपि शक्तिस्सम्भवति। शक्तिग्रहश्च —

"व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यत सिद्धपदस्य वृद्धाः"

इत्युक्तदिशा व्याकरणोपमानकोशादिभिर्बहुभिः प्रकारैः जायते। बाल्ये, कौमारे च सर्वेऽप्यपरेषां व्यवहारादेव पदानामर्थो बुध्यते। ततः विद्याप्राप्तये अध्ययनप्रारम्भात् परमेव व्याकरणादितः पदानामर्थे शक्तिं गृह्णाति। अत एव सर्वेषां शक्तिग्रहोपायानां मध्ये व्यवहारस्य प्राधान्यम्।

'गामानये'त्युत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धः गामानयति। तद्दृष्ट्वा पार्श्वस्थो बालो गवानयनरूपं कार्यं 'गामानये'ति शब्दप्रयोज्यमिति विजानाति। निष्कृष्टतया बालस्यानुमानप्रकारन्त्वित्थम् 'मध्यमवृद्धस्य गवानयनरूपप्रवृत्तिः ज्ञानजन्या, प्रवृत्तित्वात् मदीयप्रवृत्तिवदि'ति मध्यमवृद्धप्रवृत्तेर्ज्ञानजन्यत्वमनुमिनोति। ततः 'मध्यमवृद्धस्य वाक्यार्थज्ञानं गामानयेति शब्दप्रयोगजन्यं, तदनन्तरभावित्वादि'ति वाक्यार्थज्ञानस्य शब्दप्रयोगजन्यत्वमनुमिनोति। ततश्च गामानयेति वाक्ये गोकर्मकानयनरूपार्थज्ञानजनकतामवगच्छति। ततः 'अश्वमानय' 'गां नये'त्यादिवाक्यश्रवणानन्तरं प्रवृत्तिं दृष्ट्वा आवापोद्वापाभ्यां गवादिपदानां गवादिपदार्थे शक्तिं गृह्णाति। एवं व्यवहारेण संसृष्टार्थज्ञानहेतुतायाः पदे गृहीतत्वात् पदानामेव वाक्यार्थधीजनकाश्रयणं समुचितं, न पदार्थानाम्। अगृहीतपदार्थस्य वाक्यार्थबुद्धिर्नोदेतीति पदार्थज्ञानमप्यवश्यापेक्षितम्। परन्तु पदार्थोपस्थितिद्वारा पदान्येव शाब्दबोधकरणमिति समीचीनः पन्थाः। पदार्थज्ञानस्य करणत्वस्वीकारे, तस्य व्यापारः क इति वक्तव्यं, व्यापारवत्कारणस्यैव करणत्वात्। प्रत्यक्षे इन्द्रियं करणम्, इन्द्रियार्थसन्निकर्षः व्यापारः। तद्वत्, वाक्यार्थज्ञाने पदार्थस्मृतेः करणत्वे व्यापारः न कोऽपि वर्तते। पदज्ञानस्य करणत्वे तु पदार्थस्मृतिर्व्यापारः। तज्जन्यत्वे सति तज्जन्यजनकत्वरूपं व्यापारलक्षणं पदार्थस्मृतेर्वर्तते, च, पदार्थस्मृतेः पदज्ञानजन्यत्वात्, पदज्ञानजन्यशाब्दबोधहेतुत्वाच्च।

फलायोगव्यवच्छिन्नं कारणं करणमिति वादिनाम्मते करणस्य व्यापारापेक्षाभावाद् पदार्थस्मृतेः शाब्दबोधकरणत्वं सम्भवत्येव। तद्वदभिहितान्वयवादिनाम्मतेऽपि पदार्थानां शाब्दबोधकरणत्वे न दोष इति चेत्, तदापि पदानां शाब्दबोधकारणत्वं वर्तत एव।

आकाङ्क्षादिमत्पदज्ञाने संसर्गधीः, आकाङ्क्षादिमत्पदज्ञानाभावे संसर्गबुद्ध्यभाव इत्यन्वयव्यतिरेकात्।

पदज्ञानं करणं पदार्थस्मरणं व्यापारः। पदार्थस्मरणञ्च पदज्ञानजन्यम्। तच्च वृत्त्या बोध्यम्। पदजन्यपदार्थोपस्थितेरेकस्या एव शाब्दबोधकारणत्वमिति न समुचितम्। तथा सति 'घटमानय' 'कलशमानये'त्यादौ विभिन्नानुपूर्व्यवच्छिन्नपदविशेषजन्योपस्थितित्वेन कारणतास्वीकारे, आनुपूर्वीभेदेन, एकविधशाब्दबोधं प्रति गुरुधर्मावच्छिन्नकारणतानन्त्यप्रसङ्गेन गौरवो वर्तते। तत्तदानुपूर्व्यवच्छिन्नपदविशेषस्य संसर्गबुद्धिं प्रति स्वातन्त्र्येण कारणत्वाङ्गीकारे, आनुपूर्वीभेदेन कारणताभेदेऽपि गुरुधर्मावच्छिन्नकारणतानन्त्यं नास्ति। पदार्थोपस्थितेश्च विविधानुपूर्वीसाधारणशब्दजन्यपदार्थोपस्थितित्वेनैकैव कारणतेति पदज्ञानस्य करणत्वाङ्गीकारपक्षे लाघवम्। किञ्च वृत्तिज्ञानसहकृतस्वजन्यपदार्थोपस्थितिसम्बन्धेन पदविशेषस्य कारणत्वकल्पनमेवोचितं लाघवात्।

चिन्तोपनीतपदार्थज्ञानावान्तरव्यापारद्वारा मन एव काव्यकरणप्रयोजकं पदार्थसंसर्गज्ञानं जनयति। अत्र मानसे संसर्गज्ञाने मन एव करणम्। अतः अत्र पदार्थः वाक्यार्थबोधं जनयतीत्यभिहितान्वयवादिभिरुक्तं न सम्यक्। एवं पदज्ञानं विना श्वेतोऽश्वो धावतीति संसर्गज्ञानं जायत इति यदुक्तं तदप्यत्र संसर्गज्ञानस्य वाक्यार्थत्वाभावाद् पदार्थस्य वाक्यार्थकरणत्वसमर्थकन्न।

पदज्ञानं विना क्वचिदपि शाब्दबोधस्यासम्भवाद् शाब्दबोधे पदज्ञानस्यैव करणत्वं युक्तम्। पदार्थज्ञानापेक्षया प्रथमगृहीतत्वादपि पदज्ञानस्यैव वाक्यार्थकरणत्वं युक्तम्।

नानार्थकपदप्रयोगस्थले शाब्दबोधोपपत्त्यर्थं तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वं वक्तव्यम्। तात्पर्यञ्च तत्प्रतीतीच्छयोच्चरितत्वम्। तात्पर्यज्ञानञ्च पदविशेष्यकमिति तात्पर्यवत्त्वेन पदज्ञानस्य शाब्दबोधकारणता क्लृप्तैव।

'पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ।' इत्यभिहितान्वयवादिभिरुक्तदिशा पदार्थज्ञानस्यावान्तरव्यापारत्वं पदज्ञानस्य वाक्यार्थज्ञानकारणत्वं विना न सम्भवति । तज्जन्यत्वे सति तज्जन्यजनकत्वस्यैव व्यापारत्वम् । व्यापारेण व्यापारिणः नान्यथा सिद्धिरिति न्यायाद् न पदार्थस्मृत्या पदज्ञानस्यान्यथासिद्धत्वम् । अस्य न्यायस्यास्वीकारे आवश्यकेनापूर्वेणैव स्वर्गोत्पत्तिसम्भवे यागस्य स्वर्गं प्रति कारणत्वमेव न स्याद् । वस्तुतस्तु यागे कृते एवापूर्वो जायते । तेनापूर्वेण स्वर्गोत्पत्तिः । एवमेव पदज्ञाने जात एव पदार्थस्मृतिः । तेन पदार्थस्मृत्या शाब्दबोधः ।

अभिहितान्वयवादिनां मते शब्दस्य शाब्दबोधप्रयोजकत्वरूपप्रमाणत्वमेव वर्तते । तन्न समीचीनम् । अपरेषां सर्वेषां प्रमाणानां प्रमाकरणत्वरूपं प्रमाणत्व सम्भवति । अतः शब्दस्यापि प्रमाकरणत्वरूपप्रमाणत्वस्यैव युक्तत्वम् ।

शब्दादमुमर्थं प्रत्येमीति प्रतीतिस्सर्वेषां जायते । सा च प्रतीतिर्बाधकरहिता । अतः वाक्यार्थबुद्धेः शब्दजन्यतैव प्रामाणिकी । शाब्दबोधपूर्वक्षणे पदज्ञानस्याविद्यमानत्वेऽपि तस्य व्यापारस्य पदार्थज्ञानस्य तदानीं सत्त्वाद् पदज्ञानस्य कारणत्वनिर्वाहात् । कार्याव्यवहितपूर्ववृत्तिस्वस्वव्यापारान्यतरकत्वस्यैव कारणतारूपत्वात् ।

पदार्थस्य वाक्यार्थकरणत्वस्वीकारे तस्यातिरिक्तप्रमाणत्वापत्तिः । तस्यातिरिक्तप्रमाणत्वन्तु मीमांसाभाष्यकारोऽपि न वदति । न च तस्य लिङ्गादीनामिव शब्दप्रमाणेऽन्तर्भाव इति वाच्यम् । यदि पदार्थः शब्दमुत्थापयेत्, उत्थापितश्च शब्दः वाक्यार्थमवगमयेत् तदा पदार्थस्य शब्देऽन्तर्भावकथनं समञ्जसं भवेत् । न त्वेवम् । प्रत्युत शब्दोपस्थापित अर्थ एव वाक्यार्थमवबोधयतीति शब्दस्यैव पदार्थेऽन्तर्भावो वक्तुमुचितः ।

पदात् घटत्वादिपदार्थमात्रावगाहिनिर्विकल्पकशाब्दबोधो जायत इत्यभिहितान्वयवादिभिर्यदुक्त तदपि न समीचीनम् । निर्विकल्पक शाब्दत्वसत्त्वे प्रमाणाभावात् । पदजन्यपदार्थज्ञानोत्तरं 'स्मरामी' त्येवासव्यवसायः, न 'शाब्दयामी'ति । अतः पदजन्यं पदार्थज्ञानं

स्मृतिरूपम्। निर्विभक्तिकपदस्थले पदस्य पदार्थस्मारकत्वं भाट्टाः स्वीकुर्वन्ति खलु। अतः पदानामर्थस्मारकत्वं नात्यन्तापरिचितम्। पदपदार्थयोस्सङ्केतस्य सम्बन्धतायास्सत्वात् स्मरणप्रयोजकसम्बन्धो नास्तीति वक्तुन्न शक्यते।

घटपदेन घटत्वविशिष्टे शक्तिग्रहात् घटपदश्रवणे घटत्वविशिष्ट-स्यैव स्मृतिः सम्भवति, न घटत्वमात्रस्य। जातिमात्रे पदानां शक्तिस्वीकारे व्यक्तिबोधो न सम्भवति। अतः व्यक्तिबोधासम्भवेन जातिमात्रे पदानां शक्तिर्न्निराकृतेति न पदात् निर्विकल्पकशाब्द-बोधो जायते।

'वाक्यार्थो लाक्षणिकः। वाक्यघटकानि सर्वाणि पदानि वाक्यार्थे लाक्षणिकानि। पदबोध्यनिष्ठः पदार्थप्रतियोगिकस्सम्बन्धः लक्षणा। अनन्यलभ्यः शब्दार्थ इति लक्षणालभ्यस्य वाक्यार्थस्य न शब्दार्थता। पदबोध्येन पदार्थेन वाक्यार्थोऽनुभाव्यते न तु स्मार्यते' इत्यादि यदुक्तं भाट्टमतानुयायिना तदपि न समीचीनम्। मीमांसकमते अन्वयानुभव-जननसामर्थ्यमेव शक्तिः। तच्च सामर्थ्यं लाक्षणिकस्यापि भवतीत्युच्यते चेद् तदा लाक्षणिकस्यापि शक्तिमत्त्वाद् मुख्यजघन्यविभागो न घटत इति लिङ्गाधिकरणविरोधः।

अतः वाक्यार्थो न लाक्षणिकः। न वा पदशक्यः, किन्त्वा-काङ्क्षाभास्यः।

अन्विताभिधानवादिनो प्राभाकरमीमांसकाः पदानामन्विते शक्तिं स्वीकुर्वन्तीत्युक्तम्। प्रथमं शक्तिग्रहः व्यवहाराद्भवति; व्यवहारेण शक्तिग्रहसमये पदानामितरान्विते शक्तिं गृह्णातीति स्वी-कारो न युक्तः। परन्तु पश्चाद् अन्वयस्यान्यलभ्यत्वप्रतिसन्धानाद् प्रथमगृहीताया अपि अन्विते शक्तेस्त्यागः सम्भवति। अन्विताभिधान-वादिनोऽपि प्रथमं 'गामानये'त्यादिवाक्याद् गवानयनादिकार्यलिङ्गेन पदानां कार्यान्विते शक्तौ गृहीतायामपि कार्यस्य लिङादिपदलभ्यतया पश्चादन्वितमात्रे शक्तिं स्वीकुर्वन्ति, तद्वत्। सर्वैरप्यन्वय-विशेषबोधनिर्वाहाय आकाङ्क्षा स्वीकर्तव्या। तत्तत्संसर्गविशेष-विषयकशाब्दबोधं प्रति तत्तत्पदसमभिव्याहाररूपाकाङ्क्षायाः ज्ञानस्य

कारणत्वं क्लृप्तम् । तादृशाकाङ्क्षयैव संसर्गलाभादन्यलभ्यत्वेन पदान्तरशक्तिलभ्यत्वानावश्यकत्वात् । तस्मात् प्रथमगृहीता अन्विते शक्तिः पश्चादन्वयांशे त्यज्यते: पदार्थ एव स्वीक्रियते । तस्माद् पदानामन्वये शक्तिस्वीकारो नोचितः ।

वृत्तिविषयस्यैव शाब्दबोधे विषयत्वमिति न । वृत्यविषयस्यापि संसर्गस्य शाब्दबोधे भानं दृश्यते । तादृशञ्च संसर्गभानमाकाङ्क्षालभ्यमित्यप्यनुभवसिद्धम् । 'घटः पटो ने'त्यत्र नञान्योन्याभावो बोध्यते । 'भूतले घटो ने'त्यत्र तु नञात्यन्ताभावश्च । एवञ्च समानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहृतनञः अन्योन्याभावोऽर्थः, सप्तम्यन्तानुयोगिवाचकपदसमभिव्याहृतनञः अत्यन्ताभावबोधकत्वञ्चेति सिद्ध्यति । एवञ्च सर्वानुभवसिद्धम् । तत्र नञर्थेऽभावे पटः प्रतियोगितासम्बन्धेनान्वेति । अत्र प्रतियोगित्ववाचकं पदं न किमपि वर्तते । अतः शाब्दबोधे वृत्तिविषयस्यैव भानमिति नियमाभावात् न तदनुरोधेनान्विते शक्तिस्सिद्ध्यति ।

तथा चेदं सिद्धम् — वाक्यार्थबोधतात्पर्येण प्रयुक्तानि पदानि (पदज्ञानं नव्यमते) अन्वयबोधं जनयन्ति । अतः (प्राचीनमते) ज्ञायमानं पदं, (नवीनमते) पदज्ञानं वा करणं पदार्थस्मृति र्व्यापारः । पदार्थानां करणत्वं वदद्भिः भाट्टैरपि पदानां शाब्दबोधकारणत्वमङ्गीकरणीयम् । तैरेव 'पाके ज्वालेव काष्ठाना'मित्यादिना पाके काष्ठवत् वाक्यार्थबोधे पदानां हेतुताङ्गीक्रियते । अन्विताभिधानवादिनस्तु पदानां हेतुत्वमङ्गीक्रियत एव । परन्तु तेषाम्मते अन्वयः पदशक्यः । न्यायमते तु न । न्यायमतेऽन्वयः आकाङ्क्षाभास्यः ।

अन्विताभिधानवादिमते पदानि स्वार्थजातिस्मारकाणि । शुद्धाया जातेः व्यक्तिविना भानासम्भवात् पदजन्यं जातिस्मरणं व्यक्तिविषयकमपि भवति । तदधीनश्शाब्दबोधोऽपि व्यक्तिविषयकः । अभिहितान्वयवादिनाम्मते तु पदात् प्रथमं निर्विकल्पकमभिधाननामकं पदार्थज्ञानं जायते । पदार्थश्च जातिः । ततः वाक्यार्थबोधः । तदनन्तरमेवाक्षेपात् व्यक्तिविषयकबोधः । नैयायिकमते

पदज्ञानात् पदार्थोपस्थितिः। पदार्थश्च जातिविशिष्टव्यक्तिः। पदार्थोपस्थितिः स्मरणात्मकम्। पदार्थोपस्थितौ पदज्ञानं स्मारकम्। पदार्थोपस्थित्यनन्तरं शाब्दबोधः।

अन्विताभिधानवादिनां गुरूणां मते शाब्दबोधः [1]खलेकपोतन्यायेनैव। अभिहितान्वयवादिमते महावाक्यार्थबोधः विशिष्टवैशिष्ट्यावगाही। अवान्तरवाक्यार्थबोधात् महावाक्यार्थबोधो जायते। अवान्तरवाक्यार्थबोधे पदानां हेतुता। महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधस्यैव हेतुत्वम्। न तु पदानाम्। नैयायिकमते यथासम्भवं खलेकपोतन्यायेन राजपुरप्रवेशन्यायेन च बोधः। परन्तु पदानामवान्तरवाक्यार्थबोधद्वारा महावाक्यार्थबोधेऽपि कारणत्वं स्वीक्रियते।

पदानि पदार्थस्मरणद्वारान्वयबोधं जनयन्ति। तत्र संसर्ग अथवान्वयः न पदशक्यः न वा पदलक्ष्यः, परन्त्वाकाङ्क्षाभास्यः।

---

1 "वृद्धाः युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति।
तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति॥"

तावद् पदार्थानां स्मरणात्, क्रियाकारकभावेनैकदैव तावत्पदार्थानामन्वयबोधरूपः शाब्दबोधः खलेकपोतन्यायेन शाब्दबोधः। विशेष्ये विशेषणमिति रीत्या शाब्दबोध इत्यप्येतस्य नाम। प्रथमोक्तपदार्थस्य वृद्धसाम्यं, द्वितीयोक्तस्य युवसाम्यं सन्निहितोक्तस्य शिशुसाम्यञ्च। यथा वृद्धयुवशिशुभेदं विना सर्वे कपोता एकस्मिन्नेव समये खले पतन्ति, तद्वत् पूर्वापरभेदं विना सर्वे पदार्था एकदैव शाब्दबोधविषयो भवति।

1 "मतेऽस्मिन् नावान्तरवाक्यार्थबोधपूर्वकः महावाक्यार्थबोधः। आद्यव्युत्पत्तिग्रहानुरोधेन शाब्दसामान्यस्य कार्यान्वितविषयत्वं नियतम्। घटमानयतीत्यत्र घटमिति सुबन्ताद् न घटनिष्ठं कर्मत्वमिति शाब्दबोधः। तज्ज्ञानीयघटादिविषतायाः कार्यताविषयतानिरूपितत्वाभावात्। परन्तु क्रियाकारकसंसर्गावगाही शाब्दबोधः कार्यताविषयकः। स च न विशिष्टवैशिष्ट्यावगाही। तत्कारणस्य विशेषणतावच्छेदकप्रकारकनिर्णयस्य पूर्वमभावात्। तस्मात्खलेकपोतन्यायेनैव शाब्दबोध इति बोध्यम्।" (शा.त.प्र.त.पृष्ठं ३६)

# ॥ तृतीयोऽध्यायः ॥

## । वृत्तिनिरूपणम् ।

**शक्तिस्वरूपनिरूपणम् ।**

वाक्यश्रवणे सर्वेषां वाक्यार्थबोधो जायते। वाक्यघटकानां सर्वेषां पदानां सम्यक् श्रवणाभावे वाक्यार्थबोधो न जायते। अतः वाक्यार्थबोधं प्रति पदश्रवणम् अथवा पदज्ञानं कारणं भवतीति सिद्ध्यति। एवं, वाक्यघटकानां सर्वेषां पदानां सम्यक् श्रवणेऽपि वाक्यघटकानां सर्वेषां पदानामर्थज्ञानाभावे वाक्यार्थबोधो न जायत इत्यनुभवसिद्धम्। अतः पदार्थोपस्थितिरपि वाक्यार्थज्ञाने हेतुः। पदार्थोपस्थितिश्च स्मरणरूपा। पदश्रवणानन्तरं पदार्थोपस्थितिर्जायते। स्मृतिश्चानुभवजन्या। अस्य पदस्यायमर्थ इति पूर्वमेव पदतदर्थयोस्सम्बन्धग्रहणे सत्येव उच्चरितवाक्यश्रवणे पदार्थस्मृतिर्जायेत। एष पदपदार्थसम्बन्ध एव शक्तिरिति व्यवह्रियते।

वाक्यार्थबोधे शक्तिग्रहस्य हेतुत्वं सर्वैर्दार्शनिकैरङ्गीकृतम्। तत्र न विवादः। परन्तु शक्तेस्स्वरूपं कीदृशमिति विषये दार्शनिकाः बहुधा विप्रवदन्ते।

तत्र शक्तिस्वरूपनिरुपणे मीमांसकानां वैयाकरणानाञ्च प्रायशस्समानाभिप्रायो वर्तते। परन्तु वैयाकरणेषु प्राचीनानां नवीनानाञ्चेषत् मतभेदो वर्तते। तत्र प्राचीनमतमित्थम्-

**प्राचिनवैयाकरणमतम्।**

[1]"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।<br>
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा॥ १॥(३७)॥"

---

1 कौण्डभट्टः कारिकाव्याख्यानात्मके स्वग्रन्थे भूषणसारे शक्तिनिर्णये एतां कारिकामुद्धरति। (भू. सा. द्वि. भा. पृष्ठम् ३१७)

इति भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकारिकायाम् । यथा चक्षुरादीनामिन्द्रियाणां रूपादिविषयकज्ञानजनने पुरुषप्रयत्नानपेक्षा अनादिर्योग्यता तज्जनकतावच्छेदकधर्मवत्त्वरूपा तथा शब्दानामर्थेऽनादिः सम्बन्ध एव योग्यता, सः शाब्दबोधजनकतावच्छेदको धर्म इति । तथा च बोधकारणतारूपैव शक्तिरित्यर्थः ।

नन्वनादिभूतस्य बोधकारणत्वस्य शक्तिस्वीकारे आधुनिकैः पित्रादिभिः कृते देवदत्तादिनाम्नि शक्तिर्नस्याद् । आधुनिकेऽप्यनादित्वसत्त्वे पित्रादिसङ्केताज्ञानेऽपि अन्वयबोधप्रसङ्गः । किञ्च लाक्षणिकस्य गङ्गादिपदस्य बोधजनकतया तत्राप्यनादित्वविशिष्टबोधकारणताकल्पनापत्त्या विनैव लक्षणां तीरादिबोधसम्भवाद् अतिव्याप्तिस्स्याद् । अतः सङ्केतज्ञानमपि बोधे कारणमिति वक्तव्यम् । सङ्केतज्ञानाभावे बोधानुदयाद् सङ्केतज्ञानमेव शक्तिरस्तु; सङ्केतज्ञानञ्चाधुनिके पित्रादेः, गवादौ चेश्वरस्य इति चेन्न ।

अयं सङ्केतः स्वरूपतः सामान्यतः विशेषरूपेण वा हेतुः ? यदि सङ्केतः स्वरूपेण हेतुः, तर्ह्यगृहीतशक्तिकादपि पदार्थबोधप्रसङ्गः । यदि सङ्केतः सामान्यतो हेतुस्तर्हि 'सङ्केतो नाम कश्चित् प्रमेयपदार्थ' इत्येवं प्रमेयत्वादिना केनचिद् धर्मेण सङ्केतज्ञानेऽपि घटादिपदाद् शाब्दबोधापत्तिः । ईश्वरीयसङ्केतत्वादिना विशेषरूपेण सङ्केतज्ञानं हेतुरिति यद्युच्यते तर्हि पामराणां, निरीश्वरवादिनां मीमांसकबौद्धादीनाञ्च बोधो न जायत इति वक्तव्यं स्याद् । वस्तुतस्तु तत्तत्पदानां तत्तदर्थबोधजनकत्वं मीमांसकादयो गृह्णन्त इति तेषां वाक्यार्थबोधो जायते । सङ्केतज्ञानस्य शाब्दबोधं प्रति [1]अर्थबोधजनकतावच्छेदकत्वेनैव हेतुत्वं सम्भवति अर्थबोधजनकतावच्छेदकत्वापेक्षया अर्थधीजनकत्वस्यैव हेतुत्वे लाघवम् ।

'चैत्रादिपदस्य तत्तद्व्यक्तिविशेषे सङ्केत' इति ज्ञानादेव आधुनिकसङ्केतितचैत्रादौ अर्थबोधस्य जायमानत्वेन, अर्थधीजनकत्वरूपायाः शक्तेः ज्ञानस्य तत्राभावात् कारणाभावेऽपि कार्यसत्त्वरूपव्यतिरेक-

1 घटादिपदे या अर्थबोधजनकता, तस्या अवच्छेदक सङ्केतः ।

व्यभिचारः तत्रास्तीति नाशङ्कनीयम्। तत्र'पीदं पदमेनमर्थं बोधयत्वि'तीच्छाग्रहे पदे तदर्थबोधकत्वस्यावगाहनेन कारणरूपाया अर्थधीजनकतायास्सत्त्वाद् व्यतिरेकव्यभिचाराभावात्। सङ्केतज्ञानमेव बोधकज्ञानरूपम्। इदं पदमेतदर्थबोधकं भवत्विति सङ्केते बोधकत्वं विषयः। सङ्केतज्ञाने च सङ्केतविषयबोधकत्वमपि विषयः। इच्छादिज्ञानस्य इच्छाविषयविषयकत्वनियमात्। एवञ्च सङ्केतज्ञानमपि बोधकत्वज्ञानमेवेति न व्यभिचारः।

शक्तेरर्थबोधजनकत्वरूपलक्षणस्वीकारे 'गङ्गायां घोष' इत्यादौ लाक्षणिके गङ्गापदे तीररूपार्थबोधकत्वस्य सत्त्वाद् गङ्गादिपदानां तीरादिशक्तत्वं स्यादिति यो लक्षणोच्छेदप्रसङ्गात्मको दोष उक्तः, तत्रेष्टापत्तिरेव। लक्षणारूपाया वृत्तेरनङ्गीकारात् शक्तिग्राहकशिरोमणेर्व्यवहारस्य शक्यलक्ष्यसाधारण्यात् शक्ये प्रवाहे इव लक्ष्ये तीरेऽपि गङ्गापदस्य शक्तिरेवेति। अतिरिक्ताया: लक्षणाया स्वीकारे तु शाब्दबोधं प्रति शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम्। तथा च कार्यकारणभावद्वयकल्पने गौरवम्। किञ्च शक्तिजन्योपस्थितिं विना लक्षणाजन्योपस्थितितः, एवं लक्षणाजन्योपस्थितिं विना शक्तिजन्योपस्थितित: शाब्दबोधो जायत इति कार्यकारणभावस्य प्रत्येकं व्यभिचारवारणायाव्यवहितोत्तरत्वं निवेशनीयमिति गौरवम्। वृत्तिज्ञानत्वेन पदार्थोपस्थितिं प्रति, वृत्तिजन्योपस्थितित्वेन शाब्दबोधं प्रति च कारणतास्वीकारात् नोक्तगौरवमिति न च वाच्यम्। वृत्तित्वं किंरूपम्? किं शक्तिलक्षणान्यतरत्वं, उत शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वम्? उभयस्यापि शक्तित्वमपेक्ष्य गौरवम्। न च शक्यसम्बन्धरूपलक्षणायां विशेषणतया शक्तेरपि प्रवेशात् लक्षणाङ्गीकर्तृमतेऽपि पदार्थोपस्थितिं प्रति शक्तिज्ञानं कारणं, शाब्दबोधे च शक्तिज्ञानजन्यपदार्थोपस्थितिः कारणमिति शक्तित्वेनैव कार्यकारणभाव इति वाच्यम्। शक्तिज्ञानपदार्थोपस्थित्योः शक्तिज्ञानशाब्दबोधयोश्च समानविषयत्वेनैव कार्यकारणभावः। समानविषयत्वेन कार्यकारणभावस्य स्वीकाराभावे, गङ्गातीरयोः सम्बन्धग्रहाभाववतः, गङ्गापदस्य प्रवाहे शक्ति जानत अपि 'गङ्गायां घोष' इति वाक्याद् गङ्गातीरे घोष इति बोधप्रसङ्गः। शक्तिज्ञानस्य

तत्र सत्त्वात् । अपि च, 'घटमानये'ति वाक्यं, हस्तिनञ्च स्मरतः घटपदादिभ्यो घटादेः गजात् हस्तिपकस्य च समूहालम्बनस्मरणवतः घटानयनवत् हस्तिपकस्यापि शाब्दबोधापत्तिः । समूहालम्बनरूपायां पदार्थोपस्थितौ वृत्तिजन्यत्वसत्त्वात् । अतः विषयतासम्बन्धेन शाब्द-बोधं प्रति तदंशविषयकवृत्तिजन्योपस्थितिर्हेतुरिति वाच्यम् । तथा च प्रवाहोपस्थितौ 'गङ्गापदं प्रवाहविशेषे शक्तमित्येवं विषयता-सम्बन्धेन गङ्गापदनिष्ठवृत्तिज्ञानजन्यत्वसत्त्वेऽपि तीरोपस्थितौ गङ्गापदशक्यप्रवाहसम्बन्धीत्येवं गङ्गापदनिष्ठवृत्तिज्ञानजन्यत्वसत्त्वेऽपि गङ्गापदनिष्ठतीरविषयकवृत्तिज्ञानजन्यत्वाभावाद् न शक्तिज्ञानात् लक्ष्यार्थोपस्थितिः ।

एवञ्चैतत्सिद्धं यत् लक्षणाख्या वृत्तित्वान्तस्वीकारे गौरवमिति। तथा च गङ्गादिपदानां प्रवाहादाविव तीरादावपि शक्तिः । यथा नानार्थकपदप्रयोगस्थले प्रकरणादिकमर्थविशेषग्राहकं, तथान्वयानुप-पत्त्यादिना तीरादेर्बोधः । एवञ्चार्थबोधजनकता अथवा बोधकत्वमेव शक्तिरिति सिद्धम् ।। इति ।।

**नवीनवैयाकरणमतम् ॥**

अगृहीतवृत्तिकस्य शाब्दबोधादर्शनात् तद्धर्मावच्छिन्नविषयक-शाब्दत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः । ज्ञाने वृत्तिवैशिष्ट्यञ्च स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यस्वाश्रय-पदविषयकत्वोभयसम्बन्धेन बोध्यम् ।

तत्र शक्तिः पदपदार्थयोस्सम्बन्धः । वाच्यवाचकभाव इति तस्य सम्बन्धस्य नाम । शक्तिग्राहकञ्चेतरेतराध्यासमूलं तादात्म्यम् । तच्च सङ्केतः । शक्तिग्राहकत्वाद् तादात्म्यस्यापि शक्तित्वारोपेण शक्तिरिति व्यवहारः । परन्तु तस्य सम्बन्धत्वाभावाद् न शक्तित्वम् । वास्तविक-भेदविशिष्टारोपिताभेद एव तादात्म्यम् । तादात्म्यघटकभेदस्याभेदस्य वा सम्बन्धत्वं क्वापि न दृष्टम् । सम्बन्धत्वं हि सम्बन्धिभिन्नत्वे सति सम्बन्धिद्वयनिष्ठत्वे सति विशिष्टबुद्धिनियामकत्वम् । 'घटव-द्भूतल'मित्यत्र संयोगः सम्बन्धः । तस्य च संयोगस्य घटः प्रतियोगी भूतलञ्चानुयोगि । भूतलघटौ सम्बन्धिनौ । घटभूतलभिन्नत्वं संयोगस्य

वर्तते। घटे भूतले च संयोगः समवायेन वर्तत इति सम्बन्धिद्वयनिष्ठत्वञ्च वर्तते। तेन संयोगेन हेतुना 'घटवद्भूतल'मिति विशिष्टबुद्धिः। तादात्म्यस्य तु तद्विधसम्बन्धत्वन्न सम्भवति।

[1]पाणिन्यादिस्मार्तसङ्केतस्यैव शक्तिग्राहकत्वं, नत्वाधुनिकसङ्केतस्य। अत आधुनिकसङ्केतस्थले द्वादशेऽह्नि क्रियमाणनामस्थले च लक्षणा।

पदपदार्थयोः बोध्यबोधकभावनियामिका शक्तिरेव सम्बन्ध इति मतन्न समीचीनम्। दीपगतप्रकाशकत्वशक्तेः वस्तुप्रकाशनात्मककार्यं प्रति कारणत्वं, दीपवस्तुनोः संयोगात्मकसम्बन्धसत्त्वे एव सम्भवति। एवं घटादिपदगतशक्तेरपि शाब्दबोधरूपकार्यजनने कारणत्वं, घटादिपदतदर्थयोस्सम्बन्धाभावे न युज्यते।

एवञ्च 'अस्माद् पदादयमर्थो बोद्धव्य इत्याकारा, 'इदं पदममुमर्थं बोधयतु' इत्याकारा वेश्वरेच्छा न शक्तिः। ईश्वरेच्छायास्सम्बन्धत्वाभावाद्। उभयनिष्ठस्यैव सम्बन्धत्वम्। इच्छात्मकसङ्केतस्योभयनिष्ठत्वं नास्ति। घटादौ पदार्थे इच्छाविषयबोधविषयतायाः सत्त्वेऽपि, इच्छाविषयबोधविषयतायाः इच्छाश्रयतानियामकत्वन्नास्ति। 'घटादिविषयः इच्छावान्' इति प्रामाणिकव्यवहारमूला बुद्धिरपि नास्ति। अतः ईश्वरेच्छात्मकसङ्केतस्य सम्बन्धत्वन्न सम्भवति।

अपि च बोधकत्वान्यथानुपपत्त्या कल्प्यमानस्सम्बन्धः न बोधकतावटितो युज्यते। तथा हि - प्रयोजकवृद्धप्रयुक्तं घटमानये'ति वाक्यं श्रुत्वा प्रयोज्यवृद्धः घटमानयति। तद्दृष्ट्वा व्युत्पित्सुर्बालः 'प्रयोज्यवृद्धः घटानयनकार्यताज्ञानवान्, घटानयनविषयकचेष्टात्वाद्' इत्यनुमाय, तदनन्तरं घटानयनकार्यताज्ञानं 'घटमानये'ति शब्दप्रयोज्यं, तद्वाक्याव्यवहितोत्तरजन्यप्रवृत्तित्वादित्यनुमिनोति। ततः आवापोद्वापाभ्यामन्वयव्यतिरेकेण पदादिष्वपि पदार्थविषयकबोधजनकत्वं निर्धार्यत इति स्थितिः। पदे वाक्ये वा बोधजनकत्वं बोधकारणीभूतपदवाक्ययोरर्थेन सह सम्बन्धाभावे नोपपद्यते। तथा

---

1 ल. म. पृष्ठम् २७

च कारणत्वान्यथानुपपत्त्या शक्तिरूपः कारणसम्बन्धः कल्प्यते। अतः शक्तिग्रहपूर्वक्षणे, अर्थेनासम्बद्धस्य शब्दस्य तद्बोधकारणत्वमनुपपन्नमिति अनुपपत्तिज्ञानं वर्तते। तदनन्तरं जायमानस्य शक्तिज्ञानस्य घटकस्य शक्तेर्बोधकताघटितत्वं न सम्भवति। तद्वत्तानिश्चयं प्रति तदभाववत्तानिश्चयस्य प्रतिबन्धकत्वाद्।

किञ्चेश्वरेच्छाया ईश्वरज्ञानस्य वा शक्तित्वमित्यत्र विनिगमनाविरहः, एकतरपक्षपातियुक्तेरभावाद्। अतः 'विनिगमनाविरहेण सिद्धं चेदुभयमपि सिद्धमेवेति न्यायेन ईश्वरेच्छाज्ञानयोरुभयोरपि शक्तित्वमङ्गीकरणीयमिति गौरवम्।

किञ्च पदस्यार्थबोधजनकत्व'मिदमस्माद्भवत्वि'तीश्वरेच्छाविषयत्वरूपमिति स्वीकारे दण्डादीनामपि घटादिजनकत्वप्रकारकेच्छाविषयत्वरूपं स्यात्। एवञ्चेच्छातिरिक्तस्य लोकप्रसिद्धस्य कारणत्वरूपधर्मस्य विलयापत्तिः। तस्मादीश्वरेच्छा कारणत्वस्य नियामिकैव, न तु तदवच्छेदिका।

किञ्च चक्षुरादीनां प्रमाणानां प्रत्यक्षप्रमाजनकत्वं संयोगसंयुक्तसमवायादिना सन्निकर्षेणैव भवति, न तु जनकेत्वसम्बन्धेन जनकत्वघटितेच्छारूपसम्बन्धेन वा। शब्दमपि प्रमाणं भवत्यतश्शब्दस्यापि शाब्दबोधजनकत्वं जनकत्वतद्घटितसम्बन्धातिरिक्तसम्बन्धेनैव युक्तम्। तथानङ्गीकारे 'पर्वतो वह्निमान्, धूमादि' त्याद्यनुमितिस्थलेपि हेतुसाध्ययोः 'धूमज्ञानजन्यज्ञानविषयो वह्निर्भवत्वि'तीच्छाविषयत्वेन वह्निविषयकबोधजनकत्वरूपेण वा सम्बन्धेन निर्वाहे हेतुसाध्ययोः व्याप्तिरूपसम्बन्धस्यावश्यकता नास्ति। तथा च व्याप्त्युच्छेदः।

यो ह्याधाराधेयभावनियामकत्वेन दृष्टः स एव सम्बन्धः। प्रकृते च इच्छीयविषयताश्रयबोधनिष्ठजन्यतानिरूपितजनकत्वाख्यविषयतासम्बन्धेन 'अयमर्थः अयं शब्दो वा इच्छावान्' इति व्यवहारादर्शनाद्, 'इदं पदममुमर्थं बोधयत्वि'ति, 'अस्माद् पदादयमर्थो बोद्धव्य' इति वेश्वरेच्छायाः न सम्बन्धत्वम्।

यद्यपि ज्ञानरूपकार्यं प्रति विषयस्य ज्ञानकर्तुश्चोभयोरपि कारणत्वं वर्तते, तथापि न जनकत्वसम्बन्धेन विषयविशिष्टः कर्ता, कर्तृविशिष्टो विषयो वेति विशिष्टबुद्धिः। अतः जनकता शक्तिरिति मतमपि न समीचीनम्।

तस्माद् वाच्यवाचकपदव्यवहार्या शक्तिः पदपदार्थयोस्सम्बन्धः। सा चाखण्डोपाधिरूपपदार्थान्तरम्। तादृश्याः शक्तेर्ग्राहकञ्च इतरेतराध्यासमूलं तादात्म्यम्। शक्त्युपकारकत्वाद् तस्यापि शक्तिरिति व्यवहारः। परन्तु तस्य न सम्बन्धत्वम्। तादात्म्यमेव सङ्केतः।

'समयः' सङ्केत' इति चाप्तोपदेशवृद्धव्यवहारपर्यायौ। अतः वृद्धव्यवहाराद् सङ्केतग्रह इति मतमयुक्तम्।

सा च वाच्यवाचकभावाख्या शक्तिः साधुपदेष्विवापभ्रंशेष्वपि वर्तते, शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वाद्।

लाक्षणिकेष्वपि शक्यार्थमादायैव पदस्य साधुत्वं, पदान्तरसम्बन्धे अन्वयाद्यनुपपत्त्या शक्यतावच्छेदकारोपेणैव लक्ष्यार्थबोधात्। पाणिनीयव्याकरणव्युत्पत्तिज्ञानपूर्वकं साधुत्वेन ज्ञातसाधुशब्दप्रयोगाद्धर्मः असाधुशब्दप्रयोगाच्चाधर्मः। [1]"समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियम" इति भाष्यकारेणापि एतदेवोक्तम्। [2]"वाचकत्वाविशेषेऽपि नियमः पुण्यपापयो"रिति कारिकाभागेन हरिणाप्येतदेवोच्यते।

तार्किकाणां मतेऽपभ्रंशाद् व्युत्पन्नानां साधुपदस्मरणद्वारा अर्थबोधः, अव्युत्पन्नानान्तु शक्तिभ्रमादेव बोधः। तन्न सम्यक्। अपभ्रंशे शक्त्यंशे कदापि कस्यापि व्यवहर्तुर्बाधादर्शनेन न तत्र शक्तिज्ञानस्य भ्रमत्वम्। असति बाधके प्रमात्वस्यैवोचितत्वाद्।

वाच्यवाचकभावाख्य अतिरिक्तसम्बन्धः शक्तिः, शक्तिग्राहकञ्च शब्दार्थयोस्तादात्म्यम् इत्युक्तम्। शब्दार्थयोस्तादात्म्यस्वीकारे किं प्रमाणमिति चेदनुभव एव प्रमाणम्। तथा हि — पुरोवर्तिनं घटं

1 म. भा. (प. आ) पृष्ठम् ४७

2 वा. प. (का. ३) समुद्दे. ३. कारिका ३.

पश्यतः पुरुषस्य 'अयं घट' इति प्रतीतिर्जायते। अत्र प्रतीतौ घटादिपदार्थः, तद्वाचकघटादिशब्दानुविद्ध एव भासते। पुरोवर्ति वस्तु पश्यन्, तद्वाचकशब्दमजानान पुरुषः 'किमिदमिति न जानामी'ति वदति। 'अयं घट' इति वाचकशब्दोपदेशानन्तरञ्च ज्ञातमिति वदति। यदि प्रत्ययेष्वर्थस्यैव भानं तर्हि पुरोवर्तिनोऽर्थस्य ज्ञातत्वाद् 'न जानामी'ति प्रयोक्तुं कथं शक्येत? अतः, शब्दानुविद्ध एवार्थ भासत इति सिद्ध्यति।

अपि च, 'कोकिलः पिक इत्यपी'त्यादिना कोशेन, कोकिल-वाचकाः कोकिलादयः शब्दाः निर्दिष्टाः। तत्र केनचन पुंसा पिक शब्दस्य कोकिलरूपार्थे शक्तिर्गृहीता। कोकिलशब्दस्य शक्तिर्न गृहीता। अतः वस्तुतः कोकिलशब्दे श्रूयमाणेऽर्थ बोधो न जायते। प्रत्यये जायमाने, तस्मिन्नर्थस्यैव भानं सम्भवति न पदस्येति स्वीकरोति चेद् अत्र कोकिलरूपार्थदर्शने 'अयं कोकिल' इति अनुव्यवसायापत्तिः, अर्थस्य पूर्वं ज्ञातत्वाद्। कोकिलपदस्य कोकिलरूपार्थे शक्तिज्ञानवत एव 'अयं कोकिल' इति बुद्धिरुदेति। अतः ज्ञाने वाचकपदमपि भासत इति स्वीकरणीयम्।

किञ्च 'घटमहं जानामि' इत्याद्यनुव्यवसाये विषयत्वं भासते। व्यवसायविषय एवानुव्यवसाये भासते। न च व्यवसाये विषयत्वं न भासते, अनुव्यवसाय एव विषयत्वस्य भानमिति वाच्यम्। व्यवसायावि-षयस्य परन्तु व्यवसाये विद्यमानस्यानुव्यवसाये भानोपगमे 'अयं गुड' इति, व्यवसायानन्तरं वर्तमानेऽनुव्यवसाये, व्यवसायविषये गुडे विद्यमानं माधुर्यं भासेत। अतः व्यवसायविषय एवानुव्यवसाये भासत इत्यङ्गीकरणीयम्। विषयत्वन्त्वनुव्यवसाये भासते, अतः व्यवसायेऽपि वर्तते इति सिद्ध्यति। तस्माद् प्रत्यक्षादावपि विषयताभान नियमनिर्वाहाय पदभानमावश्यकम्। तस्मा'दयं घट' इत्यादिप्रत्यये तत्तद्वाचकशब्दानुविद्ध एवार्थो भासत इति सिद्धम्।

एवञ्च प्रत्यक्षादिषु सर्वेष्वपि ज्ञानेषु पदभानमस्तीति सिद्धम्। अर्थः वाचकशब्दसामानाधिकरण्येन प्रतीयत इति शब्दात्मको भवति। यत् यत्सामानाधिकरण्येन प्रतीयते तत् तदात्मकमिति, यद्

यदात्मकन्न भवति न तत् सामानाधिकरण्येन प्रतीय इत्यन्वयव्यतिरेकसत्त्वाद् ।

अत्यन्तभिन्नयोः घटपटयोः 'घटः पटः' इति सामानाधिकरण्येन प्रतीतिर्नास्ति । अत्यन्ताभिन्नयोरपि 'घटो घट' इत्यपि सामानाधिकरण्येन प्रतीतिर्नास्ति । नीलघटयोस्तु भिन्नयोरपि 'नीलो घट' इति सामानाधिकरण्येन प्रतीतिर्वर्तते । तद्वच्छब्दार्थयोरपि सामानाधिकरण्येन प्रतीतेस्सत्वाद् भेदसमानाधिकरणाभेदरूपं तादात्म्यं सिद्ध्यति ।

एवं 'कश्शब्द' इति प्रश्ने 'घट इत्ययं शब्द' इत्युत्तरयति । 'कोऽर्थ' इति प्रश्नेऽपि 'घट इत्ययमर्थ' इत्युत्तरयति । एवञ्च शब्दप्रश्नस्यार्थप्रश्नस्य च एकाकारोत्तरदर्शनाद् तन्मूलतादात्म्यप्रतीतिः । तया प्रतीत्या शब्दार्थयोस्तादात्म्यं सिद्ध्यति ।

[1]अपि च 'पदं' श्रुतम्, अर्थं शृणु, इति व्यवहरन्ति । अत्रार्थपदं न शब्दपरं, पदं श्रुतमिति पृथगभिधानाद् । परन्त्वर्थ श्रोतुन्नशक्यते शब्दस्यैव श्रवणार्हत्वाद् । तस्माच्छब्दार्थयोस्तादात्म्यमभिसन्धायैव 'अर्थं शृण्वि'ति व्यवहरन्ति । अतः प्रामाणिकैरेतादृशप्रयोगादपि शब्दार्थयोस्तादात्म्यं सिद्ध्यति ।

'ओमित्येकाक्षरं ब्रह्म' इत्यादिश्रुतिषु, [2]'वृद्धिरादैच्' इत्यादिव्याकरणे, 'कम्बुग्रीवादिमान् घट' इत्यादौ लोके 'अमरा निर्जरा देवा' इत्यादौ कोशे च सामानाधिकरण्येन निर्देशादपि तादात्म्यं सिद्ध्यति ।

वस्तुतस्तु बौद्धयोरेव शब्दार्थयोस्तादात्म्यं वर्तते । बौद्धयोरेव शब्दार्थयोर्वाच्यवाचकभावः । अतः 'अन्न'मित्युक्ते न पूरणापत्तिः, न वा 'अग्नि'रित्युक्ते दाहापत्तिः; बाह्यस्यैवान्नाग्न्यादेः पूरणदाहादिशक्तिमत्त्वाद् ।

---

1 ल. म. पृष्ठम् ३३

2 प. सू. १. १. १.

बौद्धार्थस्वीकार आवश्यकः। यदि घटादिशब्दः बाह्यसत्ता-विशिष्टस्यैव घटस्य वाचकः, तर्हि 'घटोऽस्ती'ति प्रयोगानापत्तिः। घट इति शब्देनैव घटे [1]बाह्यसत्ताया बोधनाद्, अस्तीति प्रयोगो नावश्यकः। एवं 'घटो नास्ती'त्यपि प्रयोक्तुन्न शक्यते, घटशब्देन घटस्य बाह्यसत्तायाः बोधनाद्। बौद्धार्थस्वीकारे तु 'घटोऽस्ती' ति प्रयोगे न काप्यनुपपत्तिः, बौद्धस्यैव घटस्यास्तित्वबोधनाद्। एवं 'घटो नास्ती' ति प्रयोगेऽपि न काप्यनुपत्तिः बौद्धस्य घटस्य नास्तिताबोधनाद्। अतः बौद्ध एवार्थो वाच्यः।

एवं 'शशश्रृङ्गं नास्ती'ति वाक्याद् शाब्दबोधो न स्याद्, बाह्यस्य शशश्रृङ्गस्याभावाद्। एव'मङ्कुरो जायत' इति वाक्यादपि शाब्दबोधो न स्याद्। ज्ञानसामान्ये विषयः कारणम् अतः विद्यमानस्यैव शाब्दबोधः, शाब्दबोधकाले च बाह्यस्योत्पत्याश्रयस्याङ्कुरस्य चाभावः। बौद्धार्थस्वीकारे तु शशश्रृङ्गपदबोध्ये बौद्धे शशश्रृङ्गे बाह्यसत्ताभावः 'शशश्रृङ्गं नास्ती'ति वाक्येन बोधयतीति वक्तुं शक्यते। एवं बुद्धिसिद्धाङ्कुरे उत्पत्तिः 'अङ्कुरो जायत' इति वाक्येन बोधयति।

ज्ञानसामान्यं प्रति विषयस्य कारणत्वम्। कार्यकारणभावश्च समानाधिकरणयोरेव भवतीति बाह्यघटादिः स्वानधिकरणमनोगत-ज्ञानस्य कथं कारणं भवति? बौद्धार्थस्वीकारे तु बौद्धो विषयः घटादिः स्वाधिकरणे मनसि ज्ञानं जनयेदिति कार्यकारणभाव उपपद्यते।

अतीतघटविषयकस्मरणे अतीतघटस्य विषयतासम्बन्धेन कारणत्वं वक्तुन्न शक्यते। विषयस्यातीतघटस्य बाह्यस्य स्मरणकालेऽसत्त्वेन तत्र विषयतासम्बन्धेन स्मरणस्यासत्त्वाद्। विद्यमानयोरेव घटभूतलाद्योः संयोगादिसम्बन्धदर्शनेनाविद्यमानेनाविद्यमानेऽतीतघटे विद्यमानस्मरणस्य सम्बन्धासम्भवाद्। बौद्धार्थस्वीकारे तु बाह्यस्य घटस्यातीतत्वेपि बौद्धस्य घटस्य सत्त्वाद् स्मरणसम्बन्धः, मनोनिष्ठप्रत्यासत्या कार्यकारण भावश्चोपपद्यते।

---

1 ल. म. (बौद्धार्थनिरूपणम्) पृष्ठम् २०३

एवं 'पुरा निषधेषु नलो नाम राजा आसीद्' 'लङ्कायां रावणो नाम राजा आसीद्' इत्यादौ नलरावणादिपदाद् शाब्दबोधनिर्वाहार्थमपि बौद्धार्थस्वीकार आवश्यकः। घटादिपदानां घटत्वादिजाति-विशिष्टे इव नलरावणादिपदानां नलत्वरावणत्वादिजातिविशिष्टे शक्तिग्रहो न सम्भवति। तस्माद् नलादिगुणसमृद्धयादिश्रवणोत्तरं सामान्यतः बुद्धया गृहीताकारे शक्तिग्रहः। बौद्ध एवार्थः शाब्दबोधे भासत इति बौद्धार्थस्वीकार आवश्यकः।

"बुद्धिसिद्धं तु तदसत्" (न्या. सू. ४–१–८०.) इति सूत्रयता गौतमस्यापि बौद्धार्थः सम्मतः। 'तत् – कार्यं उत्पत्तेः प्राक् नाशोत्तरञ्च असदपि बुद्धिविषयतया सिद्ध'मिति सूत्रार्थः। बौद्धस्य घटस्य पूर्ववृत्तित्वाद् कर्तृत्वमुपपद्यत इति परिहारो वदति, यदा उत्पत्तेः प्रागसच्च कार्यं कथमुत्पत्तिकर्तृ भवेद्, कर्तृत्वस्य कार्यनियतपूर्ववर्तित्वरूपकारणत्वव्याप्यत्वादित्याशङ्का जाता। तथा च न्यायसूत्रकर्तुरपि बौद्धार्थस्वीकारः सम्मत इति सिद्धयति।

एवञ्चैतत्सिद्धम् – यद् बौद्ध एवार्थो वाच्यः, बौद्ध एव शब्दो वाचकः, तयोः बौद्धयोश्शब्दार्थयोरेव तादात्म्यम्। तादात्म्यञ्च सङ्केतः। तच्च शक्तिग्राहकम्। शक्तिश्च वाच्यवाचक-भावाख्यः सम्बन्धः। शक्तेरनुयोगी अर्थः, प्रतियोगि पदम्। शक्त्यनुयोगित्वम् शक्यत्वम्। शक्तिप्रतियोगित्वं शक्तत्वम्। अनुयोगितावच्छेदकं शक्यतावच्छेदकम्। शक्यतावच्छेदकताभेदात् शक्तिभेदः, न तु शक्यतावच्छेदकभेदात्। अतः दिवाकरत्वनिशाकर-त्वरूपशक्यतावच्छेदकभेदेऽपि न पुष्पवत्पदस्य शक्तिभेदः। इति॥

**भाट्टमीमांसकमतम्**

"औत्पत्तिकस्तु[1] शब्दस्यार्थेन सह सम्बन्धः" इति जैमिनि-सूत्रम्। अत्रौत्पत्तिकपदस्य नित्यमित्यर्थः। शब्दार्थयोः प्रत्याय्य-प्रत्यायकभावाख्यः सम्बन्धोऽस्ति। विना सम्बन्धान्तरं शब्दः स्वभावत एवार्थस्य प्रत्यायकः। अर्थश्च प्रत्याय्यः। अतः शब्दार्थयोः प्रत्याय्यप्रत्यायकभाव एव सम्बन्धः। प्रत्यक्षे इन्द्रिय-

1 मी. द. १ १. ७.

सन्निकर्षः, अनुमितौ लिङ्गस्य व्याप्त्यात्मकसम्बन्धश्चात्यन्तापेक्षितः, शब्देन क्रियमाणमर्थप्रतिपादनन्तु न सम्बन्धान्तरमपेक्षते।

शब्दश्रवणोत्तरं जायमानार्थप्रत्तिरेव शब्दार्थयोः प्रत्याय्यप्रत्यायक-भावसम्बन्धसत्त्वे प्रमाणम्। इय प्रतिपत्ति अभिप्रायानुमानद्वारैव उपपन्नेति न च वाच्यम्। अभिप्रायशून्येन जनेन स्वप्नदशाया परवशतया प्रयुक्तैश्शब्दैरपि अर्थप्रतिपत्तिर्भवतीति लोकानुभवात्। एवमपौरुषे वेदयवाक्यमर्जज्ञानरहितैरपि जनैः प्रयुज्यमानं विचक्ष-णानामर्थज्ञानं जनयत्येवेति सुविदितमेव। अतः शब्दः प्रत्यायकः, अर्थश्च प्रात्यल्यः।

न च यादि प्रत्यायकः शब्दस्तर्हि प्रथमश्रवण एव स प्रत्या येदिति वाच्यम्। शब्दस्यार्थप्रात्ययने संज्ञात्वग्रहणमङ्गम्। 'अय शब्दः अस्यार्थस्य संज्ञा' इति यः जानाति तमेव शब्दः अर्थ प्रत्यायति।

स च सम्बन्धः नित्यः। प्रथमतः 'गामानय' इत्यादिव्यव-हारवशाद् सास्नादिमद्गवानयनं पश्यति बालः। तदा सम्मुग्धा-कारेण तस्य प्रत्ययो जायते — 'अस्मात् वाक्यादयमर्थः प्रत्यायित' इति। पश्चाद् वाक्यावयवानां पदानां, पदभागानां, प्रकृति-प्रत्ययानाञ्च ततःतदर्थेषु प्रतिपत्तिर्जायत इति शब्दार्थयो स्सबन्धः स्वभावसिद्ध एव। न तु पौरुषेयः।

**प्राभाकरमीमांसकमतम्**

"औत्पत्तिकस्तु शब्दस्यार्थेन सह सम्बन्धः। तस्य ज्ञानमुपदेशः अव्यतिरेकश्चार्थे अनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वाद्" (मी. द. १. १. ५) इति जैमिनिसूत्रम्। औत्पत्तिकशब्दस्य नित्यः स्वाभाविकः अपौरुषेय इत्यर्थः। वर्णानां नित्यतया, अर्थानाञ्च प्रवाहनित्यत्वाद् सम्बन्धस्यापि नित्यत्वमभ्युपगम्यते। स च सम्बन्धः प्रत्याय्यप्रत्यायकभावः। स च वाच्यवाचकभाव एव।

यदि शब्दः स्वभावत एवार्थं प्रत्याययेत् तर्हि प्रथमश्रवणे एव शब्दादर्थबोधो भवत्विति चेद् — प्रथमश्रवणे अर्थावगमाभावेऽपि शब्दस्य स्वाभाविकतयैवार्थप्रत्यायकत्वमिति कथने न कापि हानिः। वृद्धव्यवहारदर्शनेन कश्चिदेकस्य वाक्यप्रयोगं, अपरस्य प्रवृत्तिञ्च दृष्ट्वा, प्रवर्तने बोधस्य, बोधे वाक्यस्य च हेतुत्वं निश्चिनोति। ततः प्रवर्तमानस्य पुरुषस्यार्थप्रतिपादने स्वस्याप्रतिपादने च को हेतुरिति संशेते। तदनु अर्थप्रत्यायकत्वावगम एव तत्र विशेष इति निर्धारयति। न सङ्केतप्रतीतिः तत्र विशेष इति मनुते। सङ्केतस्य तदाप्रतीतेः। शब्दस्वभावत एवार्थप्रतीतिसिद्धिः।

देवदत्तादिषु पदेषु सङ्केतस्य प्रत्यक्षतः दृश्यमानत्वाद् तत्र सङ्केतस्यैव अर्थप्रतीतिनिमित्तता अस्तु। गवादिपदेषु तु न स आवश्यकः। अत शब्दानामर्थैस्सह प्रत्याय्यप्रत्यायकरूपः सम्बन्धः अपौरुषेयः नित्य इति सिद्धम्।

**नैयायिकमतम्**

आधुनिकसङ्केतिते देवदत्तादिपदे सङ्केतज्ञानादेव शाब्दबोधस्सम्भवति। वाच्यवाचकभावाख्यातिरिक्तसम्बन्धः शक्तिरिति वदतां वैयाकरणानामपि सङ्केतज्ञानादेव शक्तिग्रहः सम्भवति। अतः 'तद्धेतोरेवास्तु हेतुत्वं, मध्ये किं तेने'ति न्यायमनुसृत्य सङ्केतज्ञानस्यैव शाब्दबोधकारणत्वमुचितम्। अतः अवश्यं ज्ञातव्यः क्लृप्तः सङ्केत एव पदस्यार्थे सम्बन्धः। सङ्केत एव समय इत्यप्युच्यते। वाच्यवाचकभावाख्यातिरिक्तसम्बन्धकल्पने प्रमाणं नास्ति। किञ्च पारिभाषिकपदानामङ्गुल्याद्यभिनयानाञ्च बोध्येनार्थेन सहातिरिक्तस्य सम्बन्धस्य स्वीकार आवश्यकः स्याद् तत्र पारिभाषिकपदेभ्यः अङ्गुल्याद्यभिनयाच्च बोधजननाद्, तत्र च वाच्यवाचकभावाख्यस्य सम्बन्धस्याभावाद्। अतः सङ्केतज्ञानस्यैव शाब्दबोधहेतुत्वं वक्तव्यम्।

सङ्केतो द्विविधः - आधुनिको नित्यश्चेति। आधुनिकसङ्केतः परिभाषा इत्युच्यते। नित्यः ईश्वरसङ्केतः शक्तिः। सा चेद पदममुमर्थं बोधयत्वि'ति पदविशेष्यिका, 'अस्मात् पदादयमर्थो बोद्धव्य' इत्यर्थविशेष्यिका वा बोध्या। विशेष्यतासम्बन्धेन तत्पदजन्यबोधविषयत्वप्रकारकेश्वरेच्छावत्वं तत्पदवाच्यत्वम्।

ननु ईश्वरेच्छाया एकत्वाद्, घटबोद्धव्यत्वप्रकारकेश्वरेच्छा-विशेष्यत्वं घटस्येव पटादिष्वपि वर्तत इति घटपदवाच्यत्वं पटा-दीनामपि सम्भवति इति चेन्न। ईश्वरेच्छायाः पटादिविषयत्व सत्त्वेऽपि, पटे घटपदजन्यबोधविषयत्वं नावगाहते, तथासति ईश्वरे-च्छायाः विसंवादित्वापत्तेः। घटे एव घटपदबोद्धव्यत्वमवगाहते। तत्पदजन्यबोधविषयत्वप्रकारतानिरूपितेश्वरेच्छाविशेष्यत्वमेव तत्पद-शक्यत्वम्। ईश्वरेच्छीयपटविशेष्यतायां न घटपदबोद्धव्यत्वप्रकार-तानिरूपितत्वमिति न पटस्य घटपदवाच्यत्वम्।

सम्बन्धस्य द्विनिष्ठत्वाद्, सङ्केतस्य द्विनिष्ठत्वाभावाद् सम्बन्धत्वं नोपपद्यत इति यदुक्तं, तन्न सम्यक्। सम्बन्धस्य द्विनिष्ठत्वन्नापेक्षितम्, अपि तु द्विसम्बन्धित्वमेव। तच्च सर्वत्र नापेक्षितम्, अभेदसम्बन्ध-स्वीकाराद्। 'घटशब्दो घटरूपार्थबोधजनको भवत्वि'तीच्छायां शब्दः विशेष्यः, शब्दे जनकत्वं प्रकारः, जनकत्वे बोधः प्रकारः, बोधे च विषयितासम्बन्धेन घटरूपार्थः प्रकारः। तथा चेच्छा, विशेष्यता-सम्बधेन्न शब्दे, प्रकारताविशेषसम्बन्धेन घटरूपार्थे च वर्तते। अतः सङ्केतस्य शब्दार्थोबयसम्बन्धित्वं वर्तत एव।

न च वृद्धव्यवहारदर्शिनो बालस्य 'शब्दे बोधकारणत्वस्यानुपपन्न'-मिति ज्ञानदशायां तद्धटितसङ्केतरूपसम्बन्धज्ञानं न सम्भवतीति वाच्यम्। शब्दे अर्थस्य बोधजनकत्वप्रकारकेश्वरेच्छाविशेष्यत्वं सम्बन्धः। 'शब्दस्य बोधकारणत्वमनुपपन्न'मिति ज्ञानं शब्दे बोधकारणत्व-प्रकारकमेव ज्ञानं प्रतिबध्नाति; नतु बोधकारणत्वप्रकारकेश्वरेच्छा-विषयत्वप्रकारकमपि ज्ञानम्। तस्माद् बोधकारणत्वस्यानुपपद्य-मानत्वज्ञानदशायामपि नैयायिकाभिमतसङ्केतरूपसम्बन्धज्ञानं सम्भव-त्येवेति न दोषः।

विनिगमनाविरहाद् ईश्वरेच्छायाः ईश्वरज्ञानस्य च शक्तित्वं वक्तव्यं भवेदिति वैयाकरणेन कृत आरोपोऽपि न सम्यक्। शाब्दबोधं प्रति शक्तिज्ञानस्य नेश्वरसङ्केतत्वेन रूपेण कारणत्वमङ्गीक्रियते, अपि तु सङ्केतत्वेन रूपेणैव। ईश्वरानङ्गीकर्तॄणां मीमांसकादीनामपि शाब्द-बोधो जायते। तथा चाधुनिकसङ्केतज्ञानस्य शाब्दबोधं प्रति

कारणत्वं सर्वदार्शनिकैरङ्गीकृत्तम् । अतः सङ्केतत्वेन रूपेण सङ्केत-ज्ञानस्य शाब्दबोधं प्रति कारणत्वं वदतां नैयायिकानां परिभाषास्थले विशिष्य कार्यकारणभावकल्पनाभावप्रयुक्तलाघवं वर्तते । ईश्वरज्ञानस्य शक्तित्वे तु अतिरिक्तं कारणत्वं कल्पनीयमिति गौरवम् । अतः लाघवात्मकविनिगमनासत्त्वेन ईश्वरेच्छाया एव शक्तित्वं; न त्वीश्वरज्ञानस्य ।

'इदमस्माद्भवतु' इतीच्छाविषयत्वमेव जनकत्वं स्यादिति बहूपप्लव इत्यपि न यतो वयं नैयायिकाः पदस्यार्थबोधजनकत्वं, बोधकत्वेनेच्छाविषयत्वमिति न वदामः, परन्तु पदनिष्ठार्थबोधजन कतानिर्वाहकसम्बन्धत्वेनेश्वरेच्छाविषयत्वं शक्तिरिति ब्रूमः । घटस्य कपाले समवायः सम्बन्धः प्रत्यक्षसिद्ध इति समवायस्यैव जनकता निर्वाहकत्वं सम्भवति, न तु घटजनकत्वेनेच्छाविषयत्वस्य । शब्दे चार्थस्य समवायादिः सम्बन्धः न सम्भवति, अतः बोधजनकता-निर्वाहकत्वेनेश्वरेच्छाविषयत्वं शक्तिरिति स्वीकारे न कोऽपि दोषः ।

न च चक्षुरादिप्रमाणं यथा बोधकत्वघटितसम्बन्धभिन्नसम्ब-धेन प्रमेयसम्बद्धं सदर्थबोधं जनयति, तथा शब्दोऽपि प्रमाणं बोधकत्वघटितसम्बन्धभिन्नसम्बन्धेन प्रमेयसम्बद्धः सन्नर्थबोधको भवेत् । अन्यथा 'धूमाद्वह्निज्ञानं जायताम्' इतीच्छाविषयत्वमेव वह्निधूमयोः सम्बन्धोऽस्त्विति व्याप्त्युच्छेद इति वाच्यम् ।

'शब्दः बोधकत्वघटितसम्बन्धभिन्नसम्बन्धेन प्रमेयसम्बद्धस्सन्नर्थ बोधजनकः, प्रमाणत्वाद् इत्यनुमाने [1]प्रमाणत्वरूपहेतुरप्रयोजकः व्यभिचारशङ्कावारकतर्काभावाद् । किञ्च प्रत्यक्षादृते अन्यानि त्रीण्यपि प्रमाणानि ज्ञानकरणकाणि । यदि ब्रूयाद् प्रत्यक्षप्रमाणं ज्ञानद्वारा प्रमितिजनकं, प्रमाणत्वाद्, अनुमानवदिति, तर्हि तत्तुल्य मेवोपर्युक्तमनुमानवाक्यम् । अपि च व्याप्त्युच्छेद इत्युक्ते कोऽर्थो

---

1 यदि प्रमाणत्वं बोधकत्वघटितसम्बन्धभिन्नसम्बन्धेन प्रमेयसम्बद्धं सद् अर्थबोधजनकत्वाभाववद्वृत्ति स्यादिति व्यभिचारशङ्का । व्याभिचार शङ्काया वारकोनुऽकूलस्तर्कः । तादृशस्तर्कोऽत्र नास्तीति भावः ।

विवक्षितः? साहचर्यनियमस्योच्छेदस्तावत् न सम्भवति। तस्य सर्वानुभवसिद्धत्वाद्, तदभावस्यापादनमशक्यम्। नापि व्याप्तिज्ञान स्यानुमिति हेतुत्वोच्छेदः, कारणताग्राहकयोरन्वयव्यतिरेकयोस्सत्त्वात्।

'धूमाद्वह्निज्ञानं जायता'मितीच्छाविषयत्वमेव वह्निधूमयोस्स-म्बन्धोऽस्त्वित्यप्यसङ्गतम्। ईश्वरेच्छायास्सन्मात्रविषयकत्वाद् 'धूमा द्वह्निज्ञानं जायता'मित्याकारिकापीश्वरेच्छा भवति। परन्तु तस्य सम्बन्धत्वे न प्रमाणम्। संयोगादयः सम्बन्धाः शब्दार्थयोः न सम्भवन्ति। शाब्दबोधकादाचित्कत्वान्यथानुपपत्या च कश्चन सम्बन्धो वाच्यः। अतिरिक्तसम्बन्धरूपधर्मिकल्पनामपेक्ष्य अवश्य-ज्ञेयस्य क्लृप्तस्य सङ्केतस्य सम्बन्धत्वकल्पने लाघवम्।

वाच्यवाचकभावाख्यातिरिक्तसम्बन्धः शक्तिः तादृश्याः शक्तेः ग्राहकं शब्दार्थयोस्तादात्म्यमिति यदुक्तं, तन्न सम्यक्। शब्दार्थयो-स्तादात्म्यस्यैवासिद्धत्वात्।

वाचकशब्दसामानाधिकरण्येन अर्थावगाहित्वाद् शब्दार्थयोस्ता-दात्म्यं सिद्ध्यतीति वादो नोपपन्नः। शब्दार्थसम्बन्धमगृहीतवतां बालमूकादीनामर्थज्ञानं जायते। मूकादिभिश्च शब्दलेशोऽपि नानु-भूयते। अतस्तेषामर्थज्ञानं कथ शब्दसामानाधिकरण्यमवगाहेत? कथं वा तत्तादात्म्यमर्थानां सिद्ध्येत्?

व्युत्पन्नानामपि जायमानः सविकल्पकप्रत्ययः शब्दसामानाधिक-रण्यं नावगाहते। ते सास्नादिमद्रूपस्यार्थस्य गोशब्दो वाचक इति प्रतियन्ति, नत्वयं गोशब्द इति। यत्र त्वयं गौरित्यभेदेन सम्बन्ध-बोधनं, तत्र गोशब्दः गोशब्दप्रतिपाद्ये निरूढलाक्षणिकः। यथ 'गौर्बाहीक' इत्यत्र गोत्वं जाड्यमान्द्यादिरूपगोगतगुणलक्षकत्वेन बाही-कोपाधिः, न तु गोतादात्म्यात्, समवायाद्वा, तथा गोशब्दः वाच्य-त्वोपलक्षकतया इदं पदार्थोपाधि। नैव 'अयं गोशब्द' इति प्रतीतिर्न स्थिरबुद्धिमतां जायते।

सविकल्पकज्ञानेऽर्थः शब्दानुविद्ध एव भासते इति स्पष्टीकरणाय अज्ञातवाचकस्य पुरुषस्यार्थे ज्ञातेऽपि, 'किमिदमिति न जानामी'ति

व्यवहारः, वाचकोपदेशे कृते 'ज्ञान'मिति व्यवहारश्च ज्ञापकतया नव्यवैयाकरणेन प्रदर्शितौ। परन्तु तौ व्यवहारौ, अर्थः सविकल्पक-प्रत्यये शब्दानुविद्ध एव भासते इति स्थापयितुं न प्रभवतः। 'किमिद-मिति न जानामि'ति यदा वक्त्रोच्यते तदा श्रोता 'अयमस्य नाम, किमिति न जानाती'ति विज्ञाय वक्तुस्तात्पर्यं ज्ञात्वा 'अयं घट इत्युच्चरति। पुरोवर्तिनं चैत्रं दृष्ट्वा स ब्राह्मणो वा क्षत्रियो वेति न जानातीत्यर्थकं 'अयं क इति न जानामि'ति वाक्यं प्रयुङ्क्ते चेद् श्रोता 'अयं ब्राह्मण' इति वदति। अत एतादृशस्थलेषु प्रष्टा पुरोवर्तिनं पदार्थं सम्यगनुभवति परन्तु तद्गतविशेषधर्मं न जानाति। पुरोवर्तिपदार्थस्थकीदृशो विशेषधर्मः प्रष्टुर्जिज्ञासाविषय इति श्रोत्रा प्रकरणादिना ज्ञायते, तदनुसारेण जिज्ञासाप्रशामकमुत्तरं दीयते च। अतः सविकल्पकप्रत्ययेऽर्थः शब्दानुविद्ध एव भासत इति स्थापयितुं उक्तौ व्यवहारावशक्तौ।

किञ्चोक्तरीत्या सविकल्पकेऽर्थः शब्दानुविद्ध एव भासत इति स्थापने कश्चन दोषोऽपि भविष्यति। चैत्रादावर्थे नामधेयज्ञानेऽपिचैत्रगत-विशेषधर्मान्तराज्ञानाद् 'अयं चैत्रः क इति पृच्छ्यते, "अयं चैत्रः क इति न जानामी' तिव्यवह्रियते च। 'अयं चैत्रः पाचक' इत्युक्ते, तद्गत-पाचकत्वरूप-विशेषधर्मे ज्ञाते 'अयं चैत्रः' क इति ज्ञातमिति व्यवह्रि-यते च। तथा च पाचकत्वात्मकविशेषधर्माज्ञानेन चैत्रेऽज्ञातत्वव्यवहार स्य, तज्ज्ञानेन तत्र ज्ञातत्वव्यवहारस्य च तुल्यत्वात् चैत्रज्ञानेऽपिपाचक-त्वादि भासत इत्यापद्येत। अतोऽपि सविकल्पके ज्ञाने अर्थश्शब्दानुविद्ध एव भासत इति स्थापनार्थं पूर्वोक्तौ व्यवहारावसमर्थौ।

पिकपदस्य कोकिलरूपा शक्तिग्रहवतः, कोकिलपदस्य कोकिल-रूपार्थे शक्तिमजानतः कोकिलदर्शने 'अयं कोकिल' इत्यनुव्यवसाया-पत्तिरिति यदुक्तं, तन्न युज्यते। कोकिलपदे कोकिलरूपार्थस्य शक्तिमजानतः कोकिलदर्शने'ऽयं कोकिल' इति ज्ञानं न स्याद्।

प्रत्यक्षादौ विषयताभाननियमनिर्वाहाय पदभानमावश्यक-मित्युक्तिरपि युक्तिरहिता। यस्मिन् भासते स विशेष्यः। तस्मिन् यो भासते स प्रकारः। 'अयं घट' इति ज्ञाने घटे घटत्वं भासत इति घटः विशेष्यः घटत्वं प्रकारः। घटे विशेष्यताख्या विषयता घटत्वे

प्रकारताख्या विषयता च वर्तेते। एते विषयते ज्ञाननिरूपिते। न तु ज्ञानविषयौ। व्यवसायो यद्विशेष्यको यत्प्रकारकश्च, स तद्विशेष्यकत्वेन तत्प्रकारकत्वेन चानुव्यवसाये भासते इत्येव नियमः, न तु व्यवसाये यद्भासते तदेवानुव्यवसाये भासत इति। अतः व्यवसायाविषयस्यापि विषयत्वस्यानुव्यवसाये भानं सम्भवति। प्रत्यक्षादौ विषयताभानस्वीकारेऽपि पदविषयकत्वं प्रत्यक्षादीनां नावश्यकम्।

एवञ्चा'यं घट' इत्यादिप्रत्यये पदभानाभावाद् न शब्दसामानाधिकरण्येनार्थप्रतीतेः बलाद् शब्दार्थयोस्तादात्म्यं सिद्ध्यति।

शब्दप्रश्नस्यार्थप्रश्नस्य चैकाकारोत्तरदर्शनाद् तयोस्तादात्म्यमिति नाशङ्का कार्या। अर्थबोधनतात्पर्येण शब्दाः प्रयोक्तृभिः प्रयुज्यन्ते। 'कोऽर्थ' इति प्रश्ने 'घट इत्ययमर्थ' इत्युत्तरं, तत्र घटशब्दस्य घटः (कम्बुग्रीवादिमद् वस्तु) अर्थः। 'कः शब्द' इति शब्दप्रश्ने 'घट इत्ययं शब्द' इत्युत्तरवाक्यम्। तत्र घटशब्दस्य घकारोत्तराकारोत्तर टकारोत्तरा कारोत्तर विसर्गत्व रूपानुपूर्वीविशिष्टः घटशब्दोऽर्थः। एवञ्चोत्तरयतः पुंसः न शब्दार्थयोस्तादात्म्याध्यासः। अपि च, शब्दः आकाशनिष्ठः श्रोत्रग्राह्यश्च। अर्थश्च भूतलनिष्ठः चक्षुरादिग्राह्यश्चेति वैरुद्ध्यं वर्तते। अयं कम्बुग्रीवादिमानर्थः न घटशब्द इति विपरीतप्रतीतश्चास्ति। अतश्शब्दार्थयोस्तादात्म्याध्यासो न सम्भवति।

'पदं श्रुतम्' 'अर्थं शृणु' इति व्यवहारमूलप्रतीत्या अपि न तादात्म्यं सिद्ध्यति। 'अर्थं शृणु' इति वाक्यस्थार्थपदस्य पूर्वोक्तपदवाच्यार्थप्रतिपादके पर्यायान्तरे वाक्ये वा लक्षणा। अर्थपदं न शब्दपरमिति द्योतनायैव 'पदं श्रुत'मित्यत्र पदशब्दं प्रयुक्तमिति वादो न साधुः। यतः पूर्वं पदं श्रुतम्। तथापिविस्तरेण तत्प्रतिपाद्यार्थप्रतिपादकवाक्यं, तत्प्रतिपाद्यार्थबोधकपदान्तरं वा न श्रुतम्। अतोर्थपदस्यात्र पर्यायान्तरे, वाक्ये वा लक्षणेत्येव युक्तम्।

बौद्ध एवार्थश्शक्यः, बौद्ध एव शब्दः वाचकः बौद्धयोरेव शब्दार्थयोस्तादात्म्यमित्युक्तिर्न सम्यक्, बौद्धार्थस्यासिद्धेः।

'घटोऽस्ति', घटो नास्ति' इति प्रयोगोपपत्तये बौद्धार्थस्वीकार

आवश्यक इति कथनमपि युक्तिशून्यम्। घटपदस्य बाह्यघट एव शक्तिः। परन्तु बाह्यसत्त्वं न शक्यतावच्छेदकम्। अतः बाह्यसत्त्वं घटपदजन्यबोधे न भासते। अतः घटपदेनानवगतसत्तायाः बोधनार्थं अस्तिपदप्रयोग आवश्यकः। एवं घटो नास्ति' इति प्रयोगोपपत्तये बौद्धार्थस्वीकार आवश्यक इत्युक्तम्। वस्तुतस्तु 'घटो नास्ती'ति वाक्याद् शाब्दबोधो न जायते। अनुयोगिविनिर्मोकेण नञः अभाव-बोधकत्वस्याव्युत्पन्नत्वाद्। अतः 'भूतले घटो नास्ती'त्यादिवाक्यादेव शाब्दबोधः। तथैव प्रयोगोऽपि साधुः। 'भूतलनिरूपितवृत्तित्वा-भाववान् घट' इति शाब्दबोधः। सति तात्पर्ये, घटाभावः भूतल वृत्तिरिति, भूतलवृत्यभावप्रतियोगी घट इति च बोधः। घटपद-बोध्यस्य बाह्यसत्तावत्त्वेऽपि भूतलवृत्तित्वाभावः सम्भवति। बाह्य-सत्तायाः प्रदेशविशेषवृत्तित्वाभावेन विरोधाभावाद्। अतः 'घटोऽस्ति' 'घटो नास्ति' इति प्रयोगोपपत्तये बौद्धार्थस्वीकार आवश्यक इति कथनमसङ्गतमिति सिद्धम्।

प्रत्युत बौद्धार्थस्वीकर्तॄणामेव मते 'घटोऽस्ति' 'घटो नास्ती'ति प्रयोगानुपपत्तिः। घटपदं बौद्धसत्ताविशिष्टं घटं बोधयति अस्तिपदं बौद्धसत्तामेव बोधयति, न बाह्यसत्तां, पदत्वाविशेषाद्। एवञ्च घटपदेनैव तन्निष्ठबुद्धिसत्ताया बोधितत्वाद् अस्तिपदं नावश्यकम्। एवं 'घटो नास्ती'त्यत्रापि घटपदेन बुद्धिसत्ताया बोधितत्वाद् नास्तीति प्रयोगोऽनुपपन्नः। अतः 'घटोऽस्ति', 'घटो नास्ति' इति प्रयोगोप-पादनाय बौद्धार्थस्वीकार आवश्यक इति कथनमसङ्गतमेव।

'शशशृङ्गं नास्ति' अङ्कुरो जायते इति वाक्यजन्यशाब्द-बोधान्यथानुपपत्या बौद्धार्थसिद्ध्यतीति वादोऽपि निरर्थकः। केवल-शशशृङ्गपदमपार्थकमेव। शशस्य, शृङ्गस्य, तदभावस्य च प्रसिद्ध-त्वाद् न बोधानुपपत्तिः। शशविशेष्यकः शृङ्गाभावप्रकारकः बोधो जायते। यद्यपि अत्यन्ताभावविषयकशाब्दबोधे सप्तम्यन्तानुयोगि-वाचकपदसमभिव्याहारः कारणम्, अत्र च शशपदं न सप्तम्यन्तम्। तथापि शश-शृङ्गादिपदजन्यपदार्थोपस्थितिमूलकः शशे शृङ्गाभाव इति मानसबोधो जायते। तादृशमानसबोधजननेच्छयैव व्युत्पन्नाः शशशृङ्गं नास्तीति प्रयुञ्जते।

'अङ्कुरो जायत' इत्यत्र अङ्कुरः उत्पत्त्याश्रय इति बोधः। बोधकाले अङ्कुरो नास्तीति सत्यं, परन्तु तथा बोधजनने न काप्यनुपपत्तिः। प्रत्यक्षे एव विषयस्य कारणत्वम्; शाब्दबोधे विषयस्य न कारणत्वम्। अतीतानागतविषयकपरोक्षज्ञानसत्त्वेन. ज्ञानसामान्यं प्रति विषयस्य कारणत्वमिति कार्यकारणभावग्रहो न सम्भवति। ज्ञानसामान्ये विषयः कारणमित्यस्य विद्यमानस्यैव ज्ञानं सम्भवतीति सारार्थः। पदार्थस्मृतिश्शाब्दबोधश्चाविद्यमानस्यापि जायत इत्यनुभवसिद्धम्। अतः विषयतासम्बन्धेन ज्ञानं प्रति तादात्म्येन विषयः कारणमित्येव कार्यकारणभावः। तथा च परोक्षज्ञाने विषयज्ञानमेवावश्यकमिति।

एवं 'नलो राजा' इत्यादावपि शाब्दबोधनिर्वाहाय बौद्धार्थस्वीकार आवश्यक इति वैयाकरणोक्तिरप्यश्रद्धेया। तत्र नलादिपदेषु नलपदादिबोध्ये लक्षणा। नलपदस्य शक्तिग्रहाभावे शक्यसम्बन्धरूपलक्षणा कथमिति चेद्, यत्पदं साधु व्युत्पन्नैः प्रयुक्तं, तत्पदं किञ्चिद्वाचकमिति सामान्यतः तत्पदशक्ति ग्रहसम्भवाद्। लक्षणाग्रहे विशिष्य शक्यतावच्छेदकभानस्यानपेक्षितत्वाद्।

'बुद्धिसिद्धन्तु तदसत्' इति सूत्रयतो गौतममहर्षेः बौद्धार्थस्सम्मत इत्युक्तिरवास्तवा। कार्यमुत्पत्तेः प्रागसदपि नियतकारणत्वेन ज्ञातमिति पटार्थिनः तन्तुनेवोपाददते, न मृदिति सूत्रार्थः।

एवञ्च बौद्धार्थस्य विचारासहत्वाद् न बौद्धयोश्शब्दार्थयोस्तादात्म्यं वाच्यवाचकभावापरपर्यायशक्त्युपकारकमिति सिद्धम्।

अनादिबोधकत्वं शक्तिरिति मतमप्यसङ्गतम्। बोधकत्वज्ञानार्थं सङ्केतज्ञानमवश्यमपेक्षणीयम्। अतः आवश्यकज्ञानविषयसङ्केतस्यैव शक्तित्वमुचितम्। ईश्वरसङ्केतस्यैव शक्तित्वेऽपि, सङ्केतज्ञानम् आधुनिकसङ्केतसाधारणसङ्केतज्ञानत्वेनैव कारणं, लाघवाद्। अतः ईश्वरसङ्केतत्वेन ज्ञानस्यानपेक्षितत्वाद्, ईश्वरानङ्गीकर्तॄणां शाब्दबोधानापत्तिरूपदोषो न सम्भवति। बोधकत्व-

ज्ञानस्य शक्तित्वोपगमे आधुनिकसङ्केतस्थले बोधकत्वज्ञानाभावेऽपि सङ्केतज्ञानादेव शाब्दबोधोत्पत्तेः, कारणाभावेऽपि कार्यसत्त्वरूपव्यतिरेकव्यभिचारः ।

नानार्थकस्थल इव घटादिपदप्रयोगेऽपि तात्पर्यज्ञानादेवार्थविशेषविषयकः इति सर्वत्र तात्पर्यज्ञानकल्पने गौरवम् ।

शक्यार्थो लक्ष्यार्थ इत्यसङ्कीर्णो व्यवहारस्सर्वतान्त्रिकाणां वर्तते । तादृशव्यवहारान्यथानुपपत्त्या च लक्ष्यार्थव्यावृत्तैव शक्तिर्वाच्या । तथा च गङ्गापदात् तीरोपस्थितये लक्षणावृत्तिस्स्वीकर्तव्या । अन्यथा तीरबोधकत्वस्य गङ्गपदे विद्यमानत्वात् गङ्गापदं तीरवाचकमिति प्रामाणिकव्यवहारापत्तिः ।

यदपि लक्षणाङ्गीकारे शाब्दबोधं प्रति शक्तिज्ञानजन्योपस्थितित्वेन लक्षणाजन्योपस्थितित्वेन च कार्यकारणभावद्वयकल्पनाद् परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वं निवेशनीयमिति गौरवमित्युक्तं, तदप्यकिञ्चित्करम् । बोधजनकत्वस्य शक्तित्वं स्वीकृत्य लक्षणानङ्गीकर्तॄणामेव तादृशं लाघवम् । लक्षणानङ्गीकारस्यावश्यकता प्रतिपादिता । अतः लक्षणावृत्तेस्सिद्धत्वाद् तादृशाव्यवहितोत्तरत्वनिवेशनरूपगौरवं न किञ्चित्करं, फलमुखगौरवस्यादोषत्वाद् ।

'गङ्गायां घोष' इत्यादौ 'गङ्गापदं तीरबोधं जनयत्वि'ति वक्तुस्तात्पर्यज्ञानं शक्तिज्ञानरूपं, तस्य ज्ञानस्य गङ्गापदे तीरबोधकत्वावगाहित्वाद्, बोधकत्वस्यैव शक्तिस्वरूपत्वाद्, तत एव शाब्दबोधो जायत इति लक्षणाज्ञानस्य तज्जन्योपस्थितेर्वा शाब्दबोधकारणत्वं नाङ्गीक्रियत इति प्राचीनवैयाकरणाभिप्रायं समादतुं न शक्यते । तात्पर्यज्ञाम वक्तुरिच्छा । पदस्य येन येनार्थेन सह वृत्तिज्ञान जातं, तेषां सर्वेषामर्थानामुपस्थितिः उच्चारितवाक्यघटकपदश्रवणे जायते । तेषु यस्यार्थस्य बोधे वक्तुस्तात्पर्यं ज्ञायते, तस्यार्थस्य शाब्दबोधो जायते । अतस्तात्पर्यज्ञानात्पूर्वं पदार्थोपस्थितिरपेक्षिता । पदश्रवणे वाक्यार्थोपस्थित्यर्थं वृत्तिज्ञानमपेक्षितम् । अतस्तात्पर्यज्ञानस्य शक्तिज्ञानत्वकथनमसङ्गतम् । तात्पर्यज्ञानस्य शाब्दबोधं प्रत्येव हेतुत्वम् । अतः लक्षणाया स्वीकार

आवश्यकः। लक्षणास्वीकारे तु बोधकत्वं शक्तिरिति स्वीकर्तुन्न शक्यते। अतः सङ्केत एव शक्तिरिति सिद्ध्यति।

ईश्वरेच्छायास्सङ्केतत्वं वदतां नैयायिकानाम्मते लक्षणाङ्गीकारस्य नावश्यकत्वं, गङ्गायां घोष इत्यादौ गङ्गापदेन तीरबोधाद्। विद्यमानसर्वविषयिणी ईश्वरेच्छा, गङ्गापदजन्यबोधविषयत्वं तीरेऽप्यवगाहत इति तीरस्यापि गङ्गापदवाच्यत्वादित्यापादयितुं न शक्यते। यतः नैयायिकमते तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितेश्वरेच्छाविशेष्यत्वमेव तत्पदवाच्यत्वम्। लोकव्यवहारानुरोधेनैवेश्वरेच्छायाः आकारः कल्प्यः। लोके तावत् तीरं गङ्गापदवाच्यं भवतीति व्यवहारो नास्ति। अतः 'विषयता गङ्गापदजन्यबोधीया भवतु', 'तीरं विषयतावद्भवतु' इत्येवेश्वरेच्छायाः आकारः कल्प्यः। तावतापि ईश्वरेच्छायाः विद्यमानसर्वविषयकत्वनिर्वाहाद्। तथा चेश्वरेच्छायां तीरे गङ्गापदजन्यबोधविषयत्वं विषयतात्वेनैव प्रकारः, न तु गङ्गापदजन्यबोधविषयतात्वेन। तीरस्य गङ्गापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितेश्वरेच्छाविशेष्यत्वाभावाद् न गङ्गापदवाच्यत्वं सिद्ध्यतीति लक्षणाया आवश्यकत्वं वर्तते। एवञ्च तीरस्य गङ्गापदवाच्यत्वापत्त्या लक्षणोच्छेदप्रसङ्गो न।

एवञ्च अवश्यज्ञेयः क्लृप्तः सङ्केत एव पदपदार्थसम्बन्धः। समय इत्यप्यस्य सञ्ज्ञा। तत्राधुनिकसङ्केतः परिभाषा। नित्यः ईश्वरसङ्केतः शक्तिः। इति॥

सेयमभिधाशक्तिः पदे एव वर्तते, न तु पदसमुदायात्मकसमासादाविति व्यपेक्षावादिनो नैयायिका व्यवस्थापयन्ति। एकार्थीभाववादिनो वैयाकरणास्तु समासे शक्तिरस्तीति वदन्तः समास शक्तिव्यवस्थापनार्थं बह्व्यः युक्तयः प्रदर्शयन्ति।

**वैयाकरणमतम्**

समासे शक्तिस्वीकार आवश्यकः। समासघटकपदवृत्त्या समस्तपदाद् अर्थबोधो न सम्भवति। 'चित्रगु'रिति बहुव्रीहि-

समासः। [1]'अनेकमन्यपदार्थे' इति सूत्रेण बहुव्रीहिसमासो विधीयते। अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः इत्यर्थः। चित्रगुपदस्य चित्रगोस्वामिरूपान्यपदार्थप्रतिपादकत्वाभावे अनेकसुबन्तस्य तत्प्रतिपादकत्वाभावेन तत्सूत्राप्रवृत्तिः। समासप्रयोजकसामर्थ्याभावश्च। 'चित्रगु'रित्यत्र गोपदस्यैव चित्रगोस्वाम्यर्थकत्वे घट इत्यत्राप्यन्त्य [2]वर्णस्यैव घटादिरूपार्थवाचकतापत्तिः। घकारादिपूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वसम्भवाद्। अतः तादृशपत्तिनिवारणार्थं समासे शक्तिः स्वीकर्तव्या।

एवं 'प्राप्तोदको[3] ग्राम' इत्यत्र, समासे शक्त्यनङ्गीकारे, उदककर्तृकप्राप्तिकर्मरूपार्थबोधो न सम्भवति। उदकशब्दस्य उदककर्तृकप्राप्तिकर्मरूपार्थे लक्षणा, प्राप्तपदं तात्पर्यग्राहकमित्यर्थस्वीकारे तात्पर्यग्राहकपदस्य स्ववाच्यार्थघटितार्थे लक्षणातात्पर्यग्राहकत्वमिति नियमभङ्गः, तात्पर्यग्राहकप्राप्तिपदार्थस्य प्राप्तिकर्तृरूपस्य उदककर्तृकप्राप्तिकर्मरूपार्थेऽघटकत्वाद्।

एवं पञ्चगवधन इत्यत्र धनशब्दस्यैव पञ्चगवाभिन्नधनस्वामिनि लक्षणास्वीकारे पञ्चपदार्थगोपदार्थयोरभेदान्वयबोधविरहेण पञ्चगोपदयोस्सामानाधिकरण्याभावेन कर्मधारयत्वाभावाद् टच् न स्याद्। अतः पञ्चगवधन इति समुदायस्यैव पञ्चगवाभिन्नधनस्वामीत्यर्थवाचकत्वं वाच्यम्।

राजपुरुष इत्यादितत्पुरुषेऽपि राजपदलक्ष्यस्य राजसम्बन्धिनः पुरुषपदार्थे अभेदान्वये राजपुरुषपदयोस्सामानाधिकरण्येन कर्मधारयत्वापत्तिः राज्ञः पुरुष इति विवरणवाक्यसमानार्थकत्वाभावापत्तिश्च।

राजपदस्य राजसम्बन्धे लक्षणा इति मणिकारमतप्यसम्भवि, विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयस्य व्युत्पत्तिसिद्धत्वेन राजसम्बन्धाभिन्नः पुरुष इति बोधप्रसङ्गः।

---

1 पा. सू. २-२-२४.

2 वै. भू. सा. (समासशक्तिनिर्णये) पृष्ठम् २८०

3 तत्रैव पृष्ठम् २७२

प्रणमतीत्यादौ प्रशब्दद्योत्यस्य प्रकर्षस्य धात्वर्थनमनविशेषणतया अन्वयबोधाद् द्योत्यार्थविशेषणकशाब्दबुद्धावेव द्योत्यार्थोपस्थितेर्हेतुत्वं स्वीक्रियते। अत 'उपकुम्भमित्यत्र कुम्भपदस्य कुम्भसमीपे लक्षणास्वीकारे उपशब्दद्योत्यस्य सामीप्यस्य कुम्भविशेष्यतया बोधात् द्योत्यार्थविशेष्यकशाब्दबोधे द्योत्यार्थोपस्थितेः हेत्वन्तरकल्पने गौरवम्।

'चित्रगु'रिति सुबन्तपदसाधुत्वायापि समासे शक्तिस्वीकार आवश्यकः। चित्रगुपदस्य शक्त्यनङ्गीकारे, तस्य अर्थवत्त्वाभावेन, 'अर्थवद[1]धातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण विधीयमानयाः। प्रातिपदिकसंज्ञायाः असिद्धेः सुबुत्पत्तिर्न स्याद्। तस्माद् समासस्य प्रातिपदिकसंज्ञासिद्धये समासे शक्तिः स्वीकरणीयाः।

नैयायिकः पङ्कजशब्दस्य पद्मत्वावच्छिन्ने शक्ति स्वीकरोति। अवयवशक्त्या पङ्कजनिकर्तृत्वेन बोधसम्भवेऽपि पद्मत्वेन रूपेण बोधः समुदायशक्ति विना न सम्भवतीति, समुदायशक्तिस्वीकारे हेतुमपि वदति। समासे शक्तिमनङ्गीकुर्वतः नैयायिकस्य पङ्कज पदेऽपि लक्षणया पद्मत्वविशिष्टबोधः सम्भवतीति कुतस्तत्र समुदायशक्तिस्वीकारः? तस्माद् पङ्कजपदात् पद्मत्वविशिष्टोपस्थितये तत्पदस्य तत्र शक्तिरिव समासेऽपि तत्र तत्र शक्तिस्वीकार आवश्यकः।

किञ्च 'ब्राह्मणः पण्डित' इति वाक्याद् ब्राह्मणोद्देश्यकाभेदसंसर्गकपण्डितविधेयकोबोधो जायते। एतादृशबोधोऽत्र उद्देश्यस्य विधेयस्य च पदाभ्यां पृथगुपस्थितेरेव जायते। समासे शक्तिमनङ्गीकुर्वतां मते 'पण्डितब्राह्मण' इति समासादपि तादृशबोधापत्तिः। तथान्वयप्रयोजिकायाः पृथगुपस्थितेः सत्त्वात्। समासशक्तिस्वीकारे तु तयोः पृथगुपस्थितेरभावात् न तथान्वयबोधः। अतः समासशक्तिस्वीकारः आवश्यकः।

**नैयायिकमतम्**

समासे शक्तिग्राहकप्रमाणाभावेन अनन्तसमासपदानाम् अप्रामाणिकानन्तशक्तिकल्पना न युक्ता। [2]'चार्थे द्वन्द्व' इत्यादिसूत्रमेव

1 पा. सू. १-२-४५ 2 पा. सू. २. २. २९

शक्तिग्राहकमस्तीति न शङ्क्यम्। तेन सूत्रेण अर्थविशेषबोधकत्वं द्वन्द्वसंज्ञा चेत्युभयविधाने वाक्यभेदापत्तेः तस्य सूत्रस्य द्वन्द्वसंज्ञामात्र-विधायकत्वमिति वैयाकरणैरेवोक्तम्।

समासे शक्त्यभावे विवक्षितार्थबोधानुपपत्तिर्न्नाशङ्कनीया समास-घटकपदवृत्त्या विवक्षितार्थबोधसम्भवात्।

चित्रगुरित्यादौ गोपदस्य चित्रगोस्वामिनि लक्षणा, चित्रपदं तात्पर्यग्राहकम्। अत्र चित्रगोस्वामिविषयकशाब्दबोधे चित्रपद-गोपदयोः समभिव्याहार आकाङ्क्षा। अतोऽत्र चित्रपदस्य अन्य-पदार्थौपयिकाकाङ्क्षाघटकत्वं वर्तत इति अन्यपदार्थे विद्यमानत्वं चित्रपदस्यापि (तात्पर्यग्राहकत्वेऽपि) सम्भवति। वैयाकरणमतेऽपि अन्यपदार्थवाचकत्वम् अनेकसुबन्तानां न सम्भवति, समुदायस्यैव वाचकत्वाद्। अतोऽन्यपदार्थवाचकघटकत्वाद् अनेकसुबन्तानामन्य-पदार्थे वर्तमानत्वमुपपादनीयम्। नैयायिकास्तु चित्रगुरित्यादौ-शाब्दबोधौपयिकाकाङ्क्षाघटकत्वेन चित्रपदस्यान्यपदार्थे वर्तमानत्व

चित्रपदस्य तात्पर्यग्राहकत्वस्वीकारे समासप्रयोजकसामर्थ्या-भावरूपदोषोऽपि न सम्भवति। चित्राभिन्नगोस्वामिविषयक शाब्दबोधस्य, चित्रपदगोपदयोः समभिव्याहाररूपाकाङ्क्षाज्ञान-जन्यतया तादृशशाब्दबोधीया चित्रविषयता बोधौपयिकाकाङ्क्षाघ-टकचित्रपदप्रयोज्या। एवं गोविषयतापि गोपदप्रयोज्येति चित्रपद प्रयोज्यविषयतानिरूपित विषयताप्रयोजकत्वं गोपदे वर्तत इति न सामर्थ्यानुपपत्तिः।

न च घटादिपदे चरमवर्णस्यैव वाचकत्वापत्तिः। घटपदस्यैव घटरूपार्थे सङ्केतितत्वाद्। समासघटकचित्रराजादिपदानि स्वस्वार्थ सङ्केतितानि। अतस्तानि वाचकत्वेन क्लृप्तानि। तेषां लक्षणा-कल्पने नानौचित्यम्। चित्रगुरित्यादावन्त्यपदे लक्षणाकल्पनं तु प्रत्ययार्थान्वयसौलभ्याय।

प्राप्तोदको ग्राम इत्यादौ उदकशब्दस्य उदककर्तृकप्राप्तिकर्मणि

लक्षणा। प्राप्तशब्दः तात्पर्यग्राहकः। तात्पर्यग्राहकपदस्य स्ववाच्यार्थघटितार्थे लक्षणातात्पर्यग्राहकत्वमिति नियमो नैयायिकैर्न्नाद्रियते। परन्तु तात्पर्यग्राहकस्य स्वबोध्यघटकार्थघटितेऽर्थे लक्षणातात्पर्यग्राहकत्वनियमः। अत्र प्राप्तेतिभागबोध्यप्राप्तिकर्तृरुदकपदलक्ष्यार्थाघटकत्वेऽपि, बोध्यार्थघटकप्राप्तेः कर्तुश्च तत्र घटकत्वाद्।

राजपुरुष इत्यादौ तत्पुरुषे, पूर्वपदस्य 'राज' इत्यस्य राजसम्बन्धिनि लक्षणा तस्याभेदेन पुरुषपदार्थेऽन्वयः। राजसम्बन्ध्याभिन्नः पुरुष इति शाब्दबोधः। न च प्रातिपदिकार्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुत्वस्वीकाराद् राजपदार्थस्य राजसम्बन्धीत्यस्याभेदेन पुरुषपदार्थेऽन्वयो न स्यादिति वाच्यम्। प्रातिपदिकार्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुत्वस्वीकारस्तु तण्डुलकर्मकपाकान्वयबोधार्थं तण्डुलः पचतीति प्रयोगवारणाय। वस्तुतः तादृशकार्यकारणभावस्यावश्यकता नास्ति। तण्डुलकर्मकपाकान्वयबोधे द्वितीयान्ततण्डुलपदपचधातुसमभिव्याहार आकाङ्क्षा। तण्डुलः पचतीत्यत्र तादृशाकाङ्क्षाया अभावान्न तण्डुलः पचतीति वाक्याद् तण्डुलकर्मकपाकान्वयबोधः। अतः 'तण्डुलः पचती'ति वाक्याद् तण्डुलकर्मकपाकान्वयबोधवारणाय, प्रातिपदिकार्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुत्वस्वीकारो नावश्यकः। तादृशकार्यकारणभावस्वीकारेऽपि अभेदान्वयबोधस्थले व्यभिचाराद् कार्यतावच्छेदककोटौ भेदसम्बन्धावच्छिन्नप्रकारता निवेशनीया। 'नीलो घट' इत्यत्र नीलपदार्थस्याभेदेन घटपदार्थेऽन्वयाद्। एवञ्च प्रातिपदिकार्थनिष्ठभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति प्रत्ययजन्योपस्थितिः कारणमिति कार्यकारणभावः। 'राजपुरुष' इत्यत्र राजपदार्थस्य राजसम्बन्धिनः अभेदेनैव पुरुषपदार्थेऽन्वय इति प्रत्ययजन्योपस्थितेरपेक्षा नास्ति।

राजपदार्थपुरुषपदार्थयोरभेदान्वयबोधोपगमे राजपुरुष इत्यस्य कर्मधारयत्वापत्तिर्न सम्भवति। विना लक्षणाम् अभेदान्वयबोधजनकत्वस्यैव कर्मधारयप्रयोजकसामानाधिकरण्यरूपत्वाङ्गीकाराद्। अत्र विना लक्षणामित्यस्य विना सामासिकलक्षणामि-

त्यर्थो विवक्षितः। अन्यथा 'नीलघटः' 'नीलोघट' इत्यत्रापि नीलपदस्य नीलविशिष्टे लक्षणास्वीकाराद् तत्र नीलगुणवाचकस्य नीलशब्दस्य नीलविशिष्टे लक्षणायाः सामासिकत्वाभावाद्।

अथवा तत्तद्विभक्त्यन्तार्थविशिष्टे लक्षणां विना अभेदान्वय बोधप्रयोजकत्वमेव कर्मधारयप्रयोजकसामानाधिकरण्यम्। 'घनश्याम' इत्यत्र धनपदस्य घनवृत्यसाधारणधर्मे लक्षणा। तत्रापि विभक्त्य न्तार्थविशिष्टे न लक्षणेति कर्मधारयत्वप्रयोजकं सामानाधिकरण्यं वर्तत एव।

अतः अभेदान्वयबोधोपागमे, तत्पुरुषस्य कर्मधारयत्वापत्तिर्न वर्तते।

राजपदस्य राजसम्बन्धिलक्षकत्वे राज्ञः पुरुष इति विग्रह-वाक्यजन्यबोधसमानाकारबोधजनकत्वं समासस्य न स्यादिति यद्दू-षणमुक्तं तदकिञ्चित्करम्। समासस्य विग्रहवाक्यजन्यबोधसमाना-कारकबोधजनकत्वनियमाभावात्।

राजपदस्य राजसम्बन्धे लक्षणास्वीकारपक्षे निपातातिरिक्त-नामार्थयोः भेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वमिति नियमस्य समासे सङ्कोचः स्वीक्रियते। परन्तु राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकृत्य तस्याभेदेन पुरुषपदार्थेऽन्वयस्वीकारः गदाधर सम्मतः। नव्यनैयायिकास्तु राजपदशक्यार्थस्य स्वत्वसम्बन्धेन पुरुषपदार्थेऽन्वय इति वदन्ति। एषाम्मतेऽपि नामार्थयोरिति व्युत्पत्तेः समासे सङ्कोचः। मणिकारमतमपेक्ष्य एष एव साधीयानिति [1]सुब्रह्मण्यशास्त्रि महोदयः।

'उपकुम्भ'मित्यादौ कुम्भपदस्य कुम्भसमीपे लक्षणा। यद्यपि प्रणमतीत्यादौ द्योत्यार्थः प्रकर्षः विशेषणतया शाब्दबोधे भासते, तथापि सर्वत्र द्योत्यार्थः विशेषणतयैव भासत इति नास्ति। 'प्रतिष्ठत' इत्यत्र द्योत्यार्थः विशेष्यतयैव भासते। पथाहि-स्थाधातोः गतिनिरोधोऽर्थः। प्रशब्देन तु गतिर्द्योत्यते। तच्च

1 शा. त. (तृतीये तरङ्गे) पृष्ठं १११

विशेष्यतया भासते। तद्वद् उपकुम्भमित्यत्रापि उपशब्दद्योत्यस्य सामीप्यस्य विशेष्यतया भानम्।

तस्माद् समासघटकपदानां वृत्त्यैव विशिष्टार्थबोधसम्भवाद् न विशिष्टार्थबोधान्यथानुपपत्त्या समासशक्तिस्सिद्ध्यति।

समासस्य प्रातिपदिकसंज्ञासिद्धये शक्तिस्वीकार आवश्यक इति वादोऽपि निरर्थकः। समासस्य अर्थवत्वाभावेन 'अर्थवदधातुरप्रत्ययः प्रातिपदिक' इत्यनेन प्रातिपदिकसञ्ज्ञाया असिद्धावपि '[1]कृत्तद्धित समासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञा सिद्ध्यति। अर्थवच्छब्द-स्वरूपस्य प्रातिपदिकसंज्ञामुक्त्वा 'कृत्तद्धितसमासाश्चे'ति सूत्रेण पुनः प्रातिपदिकसंज्ञाविधानाद् समासो न वृत्तिमानिति स्पष्टं ज्ञायते।

पङ्कजपदप्रतिबन्द्यापि समासशक्तिर्न्न सिद्ध्यति। पद्मत्वेन रूपेणोपस्थित्यर्थं समुदायशक्तिरावश्यकी। पङ्कादिपदशक्तिज्ञानाभा-वऽपि पङ्कजपदाद् जायमानायाः पद्मत्वविशिष्टोपस्थितेः लक्षणया निर्वाहासम्भवः। शक्यार्थज्ञानाभावेन शक्यसम्बन्धरूपलक्षणाग्रहा-सम्भवाद्। समासे तु समासघटकपदशक्तिग्रहसत्त्व एव विशिष्टा-र्थबोधो जायत इति लक्षणया निर्वाहस्सम्भवति। समासे शक्ति स्वीकुर्वतामपि मते समासघटकप्रत्येकपदज्ञानमावश्यकम्। 'राज-पुरुष' इति समासघटकराजपदस्य चन्द्रार्थकत्वज्ञानदशायां नृपपुरुष-बोधानुदयाद्।

'पण्डितब्राह्मण' इति समासाद् ब्राह्मणपण्डितयोरुद्देश्यविधेय-भावेनान्वयबोधवारणाय समासे शक्तिः स्वीकरणीयेति वादोऽपि नादरणीयः। पृथगुपस्थितेरुद्देश्यविधेयभावेनान्वयबोधप्रयोजकत्वे नानार्थकहर्यादिपदात् पृथगुपस्थितानामश्वसूर्यादिपदानाम् उद्देश्यवि-धेयभावेन अन्वयबोधापत्तिः।

तस्माद् शक्तिः पदमात्रवृत्तिः, न पदसमुदायसमासादिवृत्तिः। इति।

---

1 पा. सू. १–२–४६

**लक्षणा**

शाब्दबोधौपयिकपदार्थोपस्थित्यनुकूलः पदपदार्थसम्बन्धः वृत्तिः। नैयायिकमते शक्तिर्लक्षणा चेति द्विविधा वृत्तिः। तत्र मुख्यः वृत्तिः शक्तिः। अमुख्या अथवा जघन्या वृत्तिर्लक्षणा। भक्तिरित्यपि तस्या एव नाम। भज् सेवायामिति धातोः निष्पन्ना भक्तिशब्दः। भज्यते सेव्यते अर्थान्तरम् अनयेति व्युत्पत्त्या भक्तिशब्दः लक्षणापर्यायः। अथवा भजो आमर्दने इति धातोः करणे क्तिन्। भज्यते शक्यार्थः खण्ड्यते अनयेति भक्तिर्लक्षणा।

वैयाकरणाः लक्षणानामवृत्त्यन्तरस्वीकारे विमुखाः। [1]प्राचीन-वैयाकरणाः स्पष्टमेव लक्षणा नाम वृत्यन्तरं नास्तीति वदन्ति।

तेषामयमाशयः- व्याकरणोपमानकोशादिषु शक्तिग्राहकेषु मध्ये व्यवहारः सर्वप्रधानः। स च व्यवहारः मुख्ये अर्थ इव लक्ष्येऽपि तुल्यः। प्रसिद्धचप्रसिद्धिभ्यां मुख्यलक्ष्यव्यवहारः। [2]अप्रसिद्धा शक्तिरेव लक्षणा। यथा व्यवहारादिना गङ्गादिपदानामव्यवधानेन प्रवाहादौ विशेषरूपेण शक्तिर्गृह्यते तथा तीरादावन्वयाद्यनुपपत्तिप्रतिसन्धानात्पूर्वं विशेषरूपेण शक्तिर्न गृह्यते इत्यप्रसिद्धत्वाल्लक्षणा। लक्षणाख्यवृत्यन्तरकल्पने गौरवम्। अतिरिक्तायाः लक्षणायास्स्वीकारे

---

1 "नापि लाक्षणिकोच्छेदापत्तिशिष्टत्वाच्छक्तिग्राहकव्यवहारस्य मुख्य-लक्ष्यसाधारण्याद्" वै. भू. सा. (शक्तिनिर्णये) पृष्ठम् ६२४

तत्रैव शाङ्करीव्याख्यायां — "नापीति। लक्षणोच्छेदापत्तिर्न दूषणं, किन्त्विष्टत्वाद् भूषणमेवेत्यर्थः। लक्षणोच्छेदस्येष्टत्वे हेतुमाह – साधारण्यादिति। शक्तिग्राहकशिरोमणिर्व्यवहारो यथा शक्येऽस्ति तथा लक्ष्ये तीरेऽप्यस्तीत्यर्थः। यथा जलप्रवाहविशेषेऽर्थे गङ्गापदप्रयोगात्मको वृद्धव्यवहारस्तथा गङ्गातीररूपार्थेऽपि गङ्गापदप्रयोगस्य वृद्धव्यवहारे दर्शनेन शक्यलक्ष्ययोरुभयोरपि गङ्गापदप्रयोगस्य समानत्वाच्छक्यजलप्रवाह इव लक्ष्ये तीरेऽप्यस्तु गङ्गापदस्य शक्तिः। भवतु च लक्षणोच्छेदो न कापि हानिः। सर्वे सर्वार्थवाचका इति भाष्येण सर्वेषामपि शब्दानां सर्वार्थनिरूपितशक्तिमत्त्वस्य वैयाकरणसम्मतत्वादिति भावः।"

2 भूषणसारे शांकरीव्याख्यायां – पृष्ठम् ३२४

शाब्दबोधं प्रति शक्तिजन्योपस्थितेः लक्षणाजन्योपस्थितेश्च कारणत्वस्य वाच्यतया परस्परव्यभिचारवारणाय तत्तदुपस्थित्यव्यवहितोत्तरत्वस्य तत्तदुपस्थितिकार्यतावच्छेदके निवेशनीयतया गौरवम्। प्रवाह इव तीरेऽपि गङ्गापदस्य शक्तिरेवेति वादिनां वैयाकरणानाम्मते शाब्दबोधं प्रति शक्तिजन्योपस्थितित्वेनैव हेतुत्वं वाच्यमिति लाघवम्। किञ्च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुतेति व्यभिचारः गौरवञ्च। अतः लक्षणा नाम वृत्यन्तरं नास्ति।

अपभ्रंशा अपि वाचकाः। यद्यप्रभ्रंशेषु शक्तिर्न कल्प्यते, तर्हि तेभ्योऽर्थबोधो न स्याद्। अर्थबोधस्तु जायते। अतः अपभ्रंशानामपि वाचकत्वम्। न च साधुपदस्मरणाद् अपभ्रंशेभ्यो बोध इति वाच्यम्। पामराणामप्यपभ्रंशाद् बोधो जायत इत्यनुभवसिद्धम्। न च शक्तिभ्रमाद् तेभ्यो बोधः। 'नायं तदर्थबोधक, इत्याकारकबाधज्ञाननिश्चयाभावाद् अपभ्रंशेषु बोधजनकत्वशक्तेरबाधेनापभ्रंशे बोधजनकत्वग्रहस्य भ्रमत्वासम्भवाद्। तथा च संस्कृतवद् भाषाशब्दा अपि शक्ताः। परन्तु तेषां न साधुत्वम्। साधुत्वाभावादेव पर्यायतया कोशादौ गणनाभावः। साधूनामेव पर्यायतया कोशादिषु गणना।

एवञ्चापभ्रंशानामपि वाचकत्वस्य वैयाकरणसिद्धान्तसिद्धतया, तत्र शक्तिज्ञाने भ्रमत्वोपपादनस्यानावश्यकत्वेन नानापदार्थ सम्बन्धत्वादिकल्पनागौरवस्यानवकाशः। अतः सिद्ध्यतीदं यद् लक्षणाख्यवृत्यन्तरस्वीकारो नावश्यक इति। अत एव सर्वे सर्वार्थवाचका इति भाष्योक्तिश्च सङ्गच्छते। इति।

**नव्यवैयाकरणमतम्**

नव्यवैयाकरणा नागेशभट्टाः लघुमञ्जूषायां "[1]परे तु आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्ति बोधे वा लक्षणेति व्यवहारः।" इति लक्षणारूपमाहुः।

---

1 ल. म. (लक्षणानिरूपणम्) पृष्ठं ११२

'छत्रिणो यान्ति' इत्यादावच्छत्रिषु साहचर्यात् छत्रित्वारोपः। 'काकेभ्यो दधि रक्ष्यता'मित्यादौ दध्युपघातकमात्रे काकत्वारोपः। [1]'कमलानि कमलानि' इत्यादौ कमलत्वेनैव व्यक्तिविशेषबोधः।

न च गङ्गायां घोष इत्यादौ आरोपितगङ्गात्वेन तीरस्य बोधेऽपि तस्य ज्ञानस्य भ्रमत्वाद्, शास्त्रज्ञानवतां सर्वथा भ्रमत्वेन ग्रहाच्च तदुत्तरं गङ्गागतशैत्यपावनत्वादिप्रतीतिरूपं फलं न सिद्ध्येदिति वाच्यम्। 'गङ्गायां घोष' इति वाक्याद् प्रथमं 'प्रवाहवृत्तिर्घोष' इति बोधः, ततोऽनुपपत्तिप्रतिसन्धानं, ततो 'वक्तुः प्रवाहवृत्तिर्घोष इति बोधयितुं न तात्पर्य'मिति ज्ञानं, ततश्च गङ्गात्वेन लक्ष्यतीरशाब्दबोधः, ततः व्यञ्जनया तीरे मुख्यगङ्गाभेदप्रतीतिः। अतः शैत्यपावनत्वादिग्रहः सम्भवति। व्यञ्जनाजन्यज्ञाने च बाधज्ञानेन नाप्रामाण्यग्रहः। वस्तुतस्तु शाब्दानुपपत्तिमूलकारोपितार्थबोधे बाधज्ञानेन नाप्रामाण्यग्रहो जायते।

[2]'कुन्ताः प्रविशन्ति' इत्यादौ कुन्तसंयोगविशिष्टपुरुषाणां कुन्तत्वेन प्रतीतिरित्यजहत्स्वार्थात्वोपपत्तिः। 'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा' इति तु कस्यचित् प्रमादोक्तिः।

लक्ष्यस्य शक्यतावच्छेदकरूपेणैव बोधस्वीकार उचितः। 'गङ्गायां मीनघोषौ स्तः' इत्यत्र द्वन्द्वस्य साधुता सर्वैरङ्गीकृता। देवदत्तस्याजधनत्वस्य, यज्ञदत्तस्याविधनत्वस्य चान्वयतात्पर्येण 'अजाविधनौ देवदत्तयज्ञदत्तौ' इति प्रयोगो न प्रामाणिकः। एवं नीधात्वर्थे व्यापारेऽजायाः, संयोगे ग्रामस्य चान्वयतात्पर्येण 'अजाग्रामौ नयती'-

---

1 तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि॥
इति पूर्णं पद्यम्।

2 अत्र नागेशः कैयटमुद्धरति। यथा – "कैयटोऽप्याह – 'आरोप्यते ताद्रूप्यं न तु मुख्यम्। बालेषुमश्चत्वारोपान्मश्चपदप्रवृत्तिः' 'हसन्ति इति पदान्तरप्रयोगाद्विज्ञायते।" इति'।

ति प्रयोगोऽप्यनुपपन्नः। एतादृशप्रयोगवारणार्थं द्वन्द्वार्थस्य एकधर्मावच्छिन्नान्वय एव द्वन्द्वसमासस्य साधुतेति स्वीकरणीयम्। एवञ्च 'गङ्गायां मीनघोषौ स्त' इत्यत्र गङ्गाशब्दाद् लक्षणया तीरत्वेन तीरबोधे, मीनस्य गङ्गात्वावच्छिन्नेन, घोषस्य तीरत्वावच्छिन्नेन चान्वयाद् द्वन्द्वार्थस्य एकधर्मावच्छिन्नान्वयाभावाद् द्वन्द्वस्य साधुता न स्याद्। गङ्गात्वेनैव तीरस्यापि बोधे उभयोरपि द्वन्द्वार्थयोः गङ्गात्वरूपैकधर्मावच्छिन्नान्वयाद् समाससाधुता निर्वहति।

महाभाष्यकारोऽपीदृशं बोधमनुमन्यते। [1]'पुंयोगादाख्यायाम्' इति सूत्रे भाष्ये चतुर्भिः प्रकारैरतस्मिन् स इत्येतद्भवति, तात्स्थ्यात्' ताद्धर्म्याद्, तत्सामीप्याद्, तत्साहचर्याद् मञ्चा हसन्ति, सिंहो माणवकः, गङ्गायां घोषः यष्टीः प्रवेशय' इति वचनाद्।

'आरोप्यते ताद्रूप्यं, न तु मुख्यम्। बालेषु मञ्चत्वारोपाद् मञ्चपदप्रवृत्तिः हसन्तीति पदान्तरप्रयोगाद् विज्ञायते' इति वदन् कैयटोऽपि आरोपं सुव्यक्तं वदति।

"..........[2] अतद्भावेपि तदुपचार' इति सूत्रयतो न्यायसूत्रकर्तुर्गौतमस्यापि तदभावेऽपि तदुपचारस्सम्मतः। तदुपचार इत्यस्य तच्छब्दव्यवहार इत्यर्थः। स च तद्धर्मारोपेण। आरोपनिमित्तानि सहचरणादीनि। 'यष्टीः प्रवेशय' इत्यादीन्युदाहरणानि। ब्राह्मणे यष्टित्वारोपस्साहचर्याद्। बालेषु मञ्चत्वारोपः तात्स्थ्याद्।

---

1 पा. सू. ४–२–४८

2 "सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यः ब्राह्मणबालकटराजसक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावेऽपि तदुपचारः" (न्या. सू. २. २. ३४) इति पूर्णं सूत्रम्।

न्या. भा – 'अतद्भावेऽपि तदुपचार इति – अतच्छब्दस्य तेन शब्दे नाभिधानमिति। सहचरणाद् 'यष्टिकां भोजय' इति यष्टिकासहचरित ब्राह्मणोऽभिधीयत इति। स्थानाद् – मञ्चाः क्रोशन्तीति मञ्चस्थाः पुरुषाः अभिधीयन्ते। तादर्थ्याद् - कटार्थेषु वीरणेषु व्यूह्यमानेषु कटं करोतीति भवति। वृत्ताद् – यमो राजा कुबेरो राजेति तद्वत् वर्तत इति। मानाद् – आढकेन मिताः सक्तवः आढकसक्तव इति। धारणाद् – तुलायां

एवञ्च शक्यार्थप्रवाहेणात्यन्तसामीप्ये गङ्गाया तीरधर्मं घोषाधारत्वमारोप्य 'गङ्गायां घोष' इति प्रयोगः। व्यवहितसामीप्ये तु तीरे गङ्गात्वमारोप्य गङ्गायां घोष इति प्रयोगः।

सा लक्षणा द्विविधा – गौणी शुद्धा चेति। स्वसादृश्याधिकरणत्वसम्बन्धेन शक्यार्थसम्बन्ध्यर्थप्रतिपादिका गौणी। सादृश्यभिन्न संबन्धेन शक्यार्थ संभन्ध्यर्थ प्रतिपादिका शुद्धा। 'गौर्बाहीका इति गौणीस्थलेऽपि बाहीकस्य शक्यतावच्छेदकगोत्वेनैव बोधः।

गौणीस्थले एव परम्परासम्बन्धस्य लक्षणानियामकत्वम्। न शुद्धायाम्। शैत्यपावनत्वादौ परम्परासम्बन्धस्य सत्त्वेऽपि 'प्रयोजनं न लक्ष्यं सम्बन्धाभावाद्' इति काव्यप्रकाशोक्तेः।

अतः द्विरेफपदाद् स्ववाच्यरेफद्वयवद्भ्रमरपदवाच्यत्वरूपपरम्परासम्बन्धेन भ्रमरबोध इति मतन्न समीचीनम्। शुद्धायां परम्परासम्बन्धस्य लक्षणानियामकत्वाभावाद्। अपि तु द्विरेफपदस्य भ्रमरे रूढिशक्तिरेव। 'त्वचा ज्ञात'मित्यत्र चर्मणि शक्तस्य त्वक्पदस्य त्वगिन्द्रिये निरूढलक्षणा।

जहत्स्वार्था, अजहत्स्वार्था चेति लक्षणेयं प्रकारान्तरेण द्विविधा। यत्र शक्यार्थस्य धर्मिणः केनपि रूपेण लक्ष्यार्थान्वयिना अनन्वयः तत्र जहत्स्वार्था लक्षणा, यथा 'गङ्गायां घोष' इत्यादौ। शक्यार्थस्य धर्मिणः येन केनापि रूपेण लक्ष्यार्थान्वयिनान्वयेऽजहत्स्वार्था, यथा 'काकेभ्यो दधि रक्ष्यताम्' 'छत्रिणो यान्ती'त्यादौ।

उपर्युक्तप्रकारेण लघुमञ्जूषाकारो लक्षणास्वरूपं यद्यपि वदति तथापि लक्षणाख्यवृत्यन्तरस्वीकारे तस्य तात्पर्यन्नास्तीति सयुक्तिकं, [1]श्रीसुब्रह्मण्यशास्त्रिभिश्शाब्दतरङ्गिण्यां समर्थितम्। "आरोपित-

---

घृतं चन्दनं तुलाचन्दनमिति। सामीप्यात् – गङ्गायां गावश्चरन्तीति देशोऽभिधीयते सन्निकृष्टः। योगाद् – कृष्णेन रागेण युक्तः शाटकः कृष्ण इत्यभिधीयते। 'साधनाद् 'अन्नं प्राणा' इति। आधिपत्याद् अयं पुरुषः कुलम् 'अयं गोत्रम्' इति। (न्या. भा. पृ. १७०–१७१

1 "परे तु' इत्यादिना लक्षणास्वरूपनिरूपणोपक्रमे 'शक्त्यैव बोधे लक्षणाव्यवहार' इत्युक्तेः, उपसंहारेऽपि हरिरप्याह–

शक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे व्यक्तिविशेषबोधे वा लक्षणेति व्यवहार" इति वदद्भिर्लघुमञ्जूषाकारैः 'शक्त्यैव बोधे लक्षणाव्यवहार' इत्येव स्वीकृतम्। तथा चान्यैर्लक्षणाव्यापारेण बोध इति यत्र स्वीक्रियते, तत्रापि शक्त्यैव बोधः। गङ्गादिपदवाच्यता भगीरथखातावच्छिन्नप्रवाहत्वावच्छिन्ने प्रसिद्धा, तटादौ त्वप्रसिद्धा।

[1]'अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः' इति हरिणाप्युक्तम्। तस्माद् शक्तिविशेष एव लक्षणाव्यवहारविषयः। लक्षणास्थले शाब्दबोधः शक्यतावच्छेदकरूपेण लक्ष्यार्थविषयकः।

शक्यत्वेन प्रसिद्धान्यव्यक्तिबोधौपयिकी शक्तिः, व्यक्तिविशेषबोधौपयिकी च शक्तिः लक्षणापदेन व्यवह्रियत इति मञ्जूषापङ्क्त्याशयः। तथा चाप्रसिद्धार्थबोधौपयिकशक्तेरेव लक्षणापदेन व्यवहृतायाः शक्यतावच्छेदारोपमूलशक्यसम्बन्धभेदात् गौणीत्वादिना विभागः कृतः।

यद्यपि 'आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव प्रसिद्धान्य' व्यक्तिबोधे-' इत्यादिलघुमञ्जूषापङ्क्तिः, तथापि 'गङ्गायां घोष इत्यादौ नारोपितगङ्गात्वेन तीरशाब्दबोधः, परन्तु गङ्गात्वेनैव। आरोपितत्वविशिष्टगङ्गात्वं न शक्यतावच्छेदकम्। अतः आरोपितगङ्गात्वेन शाब्दबोधो न सम्भवति। आरोपितत्वबोधकं पदञ्च नास्ति। तथा च 'आरोपितशक्यतावच्छेदकरूपेणे'त्यस्य

---

एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः।
निमित्तभेदादेकस्य सार्वार्थ्यं तस्य भिद्यते ॥
सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः।
प्रसिद्धिभेदाद्गौणत्वं मुख्यत्वं चोपचर्यते ॥

इति इत्यभिधानाद्, सर्वेषां शब्दानां सर्वार्थवाचकत्वस्याङ्गीकृतत्वाद्। तस्माद् लक्षणाख्यवृत्यन्तरस्वीकारो व्यर्थः।"

शा. त. (चतुर्थे तरङ्गे) पृष्ठं १२१

1 वा. प. (द्वि. का) कारिका. २५७

वस्तुत आरोपविषयत्वं यस्य वर्तते, तादृशशक्यतावच्छेदकरूपेणेत्यर्थः। आरोपितत्वस्य शाब्दबोधे भानं नेति यावत्।

यत्र यत्र लक्षणाव्यवहारः प्रामाणिकः, तत्र सर्वत्र यथाकथञ्चिदारोपो वर्तत इत्यत्रैव ग्रन्थकारस्य तात्पर्यम्।

निरूढलक्षणाव्यतिरिक्ता लक्षणा प्रयोजनवतीति व्यवहार उत्सर्गः। निरूढेतरलक्षणास्थले सर्वत्र प्रयोजनं न सम्भवति। 'अयमर्थ इति वाक्यम् 'अयमाशय' इति विवृण्वन्ति। तत्रार्थशब्दः आशये लाक्षणिकः। अत्र न किमपि प्रयोजनमस्ति। एवं भावप्रधाननिर्देशस्थलेपि। तेषु स्थलेषु काव्यदोष एव। आयुरेवेदमित्यत्र प्रयोजनान्तराभावेन शक्यार्थात्यन्ताभेदप्रतीतिरेव प्रयोजनं मन्यन्ते। 'त्वचा ज्ञात'मित्यादौ शक्यार्थचर्मात्यन्ताभेदप्रत्ययं प्रयोजनं नाभिधीयते। तत्र प्रयोजनं नास्तीत्यालङ्कारिका। [1]तेषां मतमेव मञ्जूषाकारोऽप्यनुवर्तते।

**मीमांसकमतम्**

मीमांसका लक्षणामङ्गीकुर्वन्ति। तत्र केचन मीमांसका शक्यनिष्ठः अशक्यसम्बन्धः लक्षणेति वदन्ति[2]। सा च लक्षणः न पदवृत्तिः, परन्तु पदार्थवृत्तिः। शक्त्या गङ्गापदेन स्मृतः प्रवाहा स्वसम्बन्धि तीरं स्मारयति। अतः शक्यार्थः लक्ष्यार्थस्मारकः। शक्यादशक्योपस्थितिर्लक्षणेति वदतां वृद्धतार्किकाणामपि अयमेवाभिप्रायः। तथा चैषाम्मते गङ्गापदशक्यार्थप्रवाहनिष्ठः तीरसंयोगः लक्षणा।

[3]केषाञ्चन मीमांसकानां मते बोध्यसम्बन्धो लक्षणा। मीमांसकाः वाक्यलक्षणावादिनः। तदनुसारेणैव ते बोध्यसम्बन्धो लक्षणेति वदन्ति। तेषामयमाशयः गभीरायां नद्यां घोष इत्यत्र गभीरनदीतीरवृत्तिर्घोष इति बोधो जायते। तच्च पदलक्षणया न निर्वहति। अत्र नदीपदस्य नदीतीरे लक्षणस्वीकारे गभीरपदार्थस्यानन्वयापत्तिः,

---

1 शा. त. (चतुर्थे तरङ्गे) पृष्ठम् १२७.

2 शा. त. (चतुर्थे तरङ्गे) पृष्ठम् १३४.

3 मुक्तावलीव्याख्यायां दिनकर्याम् (लक्षणानिरूपणप्रकरणे) पृष्ठम् २९०–२९१

गभीराभेदस्य तीरेऽभावाद्। नदीपदलक्ष्यार्थैकदेशे नद्यां गभीर-पदार्थस्यान्वये, 'पदार्थः पदार्थेनान्वेति, न पदार्थैकदेशेने'ति व्युत्पत्तिविरोधः। गभीरपदस्यापि तीरे लक्षणास्वीकारो नोचितः नदीपदार्थस्यानन्वयापत्तेः। नदीपदस्य गभीरनदीतीरे लक्षणा गभीरपदं तात्पर्यग्राहकमिति स्वीकर्तुं नोचितं विनिगमनाविरहेण गभीरपदस्य गभीरनदीतीरे लक्षणा, नदीपदं तात्पर्यग्राहकमित्यपि सुवचत्वाद्। 'विनिगमनाविरहेण सिद्धं चेदुभयमपि सिद्ध'मिति न्यायेन उभयोः पदयोर्लक्षणा स्याद्। अतः 'गभीरायां नद्यां घोष' इत्यत्र गभीरायां नद्यामिति वाक्ये एव लक्षणा स्वीकर्तुमुचिता। वाक्यबोध्यसम्बन्धस्य तीरे सत्त्वाद्।

गागाभट्टाः[1] भाट्टचिन्तामणौ 'स्वशक्यसम्बन्धवत्त्वं लक्षणा, तस्याश्च पदनिष्ठत्वं स्वाश्रयसम्बन्धिवाचकत्वसम्बन्धेने'ति वदन्ति। 'गङ्गायां घोष' इत्यादौ गङ्गापदशक्यप्रवाहसम्बन्धो लक्षणा। 'तज्ज्ञानकार्यतावच्छेदकञ्च गङ्गासम्बन्धवत्तीरत्वप्रकारकतीरविशेष्यकशाब्दत्वम्। गङ्गासम्बन्धस्य सम्बन्धत्वेन भानं संयोगत्वादिना वा। गङ्गासम्बन्धितीरे घोषः, गङ्गासंयुक्ततीरे घोष इत्युभय-विधानुभवाद्। एवं 'सिंहो देवदत्त' इत्यत्रापि परम्परासम्बन्धेन सिंहसम्बन्धी देवदत्त इति बोधे लक्षणैव। यदा तु सिंहनिष्ठ-क्रौर्यसजातीयक्रौर्यवत्त्वेन देवदत्तप्रतीतिस्तदा गौणी। इति।

भाट्टमतानुसारेण[2] लक्षणालक्षणं 'शक्यसम्बन्धो लक्षणा' इति तन्त्रसिद्धान्तरत्नावल्यां श्रीपट्टाभिरामशास्त्रिभिरुपदर्शितमिति श्रीरघुनाथाचार्यः। 'नील घटमानय'[1] इत्यत्र नीलगुणवाचकस्य नीलशब्दस्य नीलविशिष्टे लक्षणा। गङ्गायां घोष इत्यत्र गङ्गापद-शक्यः प्रवाहः। तत्सम्बन्धिनि तीरे गङ्गापदस्य लक्षणा।

मीमांसकैः गौणी नाम वृत्यन्तरं स्वीक्रियते। [3]सादृश्यरूप-शक्यसम्बन्धो गौणी। अर्थाद् स्वशक्यसम्बन्धिगुणसजातीयगुणवदु-

---

1 भा. चि. पृष्ठं ५७.

2 "शक्यसम्बन्धो लक्षणेति तल्लक्षणम्। (..................तन्त्रसि-द्धान्तरत्नावली. ६. ६.)" न्या. मी. द. प्रा. वि. पृष्ठम् २५५

3 न्या. मी. द. प्रा. वि. पृष्ठम् २५६-२५७.

पस्थितिहेतुवृत्तिः गौणी वृत्तिरिति भाट्टसिद्धान्तः। शक्यार्थनिष्ठो गुणसजातीयगुणयोगो गौणीति तन्त्रसिद्धान्तरत्नावल्याम्। सिंहो माणवक इत्यत्र सिंहत्वैकार्थसमवेतक्रौर्यादिसजातीयगुणवत्प्रकारके अथवा गुणप्रकारके माणवकादिविशेष्यके च शाब्दबोधे सिंहपदजन्यायाः गुणवदुपस्थितेः, गुणोपस्थितेर्वा कारणत्वम्। 'एकसम्बन्धिज्ञानमपर-सम्बन्धिस्मारक'मिति न्यायेन सिंहगुणानां तत्सजातीयगुणानाञ्च सिंहपदेनैव लक्षणयोपस्थितिः।

**प्राभाकरमतम्**

प्राभाकरमीमांसकैः लक्षणास्वरूपमित्थं स्वीक्रियते —

[1]"वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः।
तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते॥"

[2]वाच्यस्यार्थविशेषस्य वाक्यार्थे सम्बन्धो नोपपद्यत इति तत्सम्बन्धवशेन प्राप्तेऽर्थेऽन्वयः लक्षणाव्यापारेण भवतीति भावः। यथा गङ्गायां घोष' इत्यादिवाक्ये श्रुतस्य गङ्गापदार्थस्य वाक्यार्थेऽन्वय-स्यानुपपद्यमानतया इदं, परित्यज्य तत्सम्बन्धवशाद् बुद्धिमुपगतस्य कूलादेः वाक्यार्थान्वयित्वमुपगम्यते।

मुख्यार्थं सम्यगवगतानामेव लक्षणा ज्ञातुं शक्यत इत्यपि शालि-कानाथः प्रकरणपञ्चिकायां प्रत्यपीपदत्।

**नवीनालङ्कारिकमतम्**

[3]"मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनाद्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥"

इति काव्यप्रकाशे लक्षणालक्षणमुक्तम्। शब्देन मुख्यभिन्नोऽर्थ स्तटादिः यया वृत्त्या प्रतिपाद्यते सा वृत्तिर्लक्षणा। 'गङ्गायां घोष इत्यत्र गङ्गापदं मुख्यार्थप्रवाहाद् भिन्नं तटरूपमर्थं प्रतिपाद्यते। तच्च लक्षणया। प्रथमं गङ्गायां घोष इत्यादौ, गङ्गावृत्तिर्घोष

---

1 शालिकानाथकृतायां प्रकरणपञ्चिकायां (३५८)"

2 न्या. मी. द. प्र. वि. पृष्ठम् २६०

3 का. प्र. (द्वि. उ.) कारिका ९

इति ज्ञाने जाते गङ्गायाः घोषाधारत्वं न सम्भवतीत्यतः मुख्यार्थ बाधे गङ्गापदात् प्रवाहसम्बन्धिनस्तीरस्य (तीरत्वविशिष्टस्य) स्मृतिर्ज्जायते। तदनन्तरं गङ्गात्वेन तीरविषयकं 'गङ्गावृत्तिर्घोषः' इति बोधो जायते। गङ्गात्वेन तीरशाब्दबोधे सत्येव तीरे गङ्गा वृत्तिशैत्यपावनत्वादिप्रतीतिः स्याद्। अत एव तीरे घोष इत्य-प्रयुज्य 'गङ्गायां घोष' इति प्रयुज्यते। काव्यप्रकाशे, 'तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजन-संप्रत्ययः।' इत्युक्तेरयमेवार्थः। तत्त्वप्रतिपत्तौ = गङ्गात्वेन प्रतिपत्तौ।

इत्थञ्चानुभवानुरोधाद् शक्यतावच्छेदकप्रकारकलक्ष्यार्थविषयक-शाब्दबोधे लक्षणाज्ञानस्य कारणत्वं कल्प्यते। तस्मात् लक्षणया गङ्गापदात् तीरत्वेनोपिस्थितस्यापि तीरस्य गङ्गात्वेनैव शाब्दबोधः।

**नव्यनैयायिकमतम्**

यश्शब्दः यस्मिन्नर्थे प्रचुरप्रयोगेण प्रसिद्धः स शब्दः तस्यार्थस्य वाचक इति व्यवह्रियते। यथा घटशब्दः कम्बुग्रीवादिमत्यर्थे प्रचुरप्रयोगेण प्रसिद्धः, तस्य वाचक इति व्यवह्रियते। यथा वा गङ्गापदं भगीरथखातावच्छिन्नप्रवाहे प्रचुरप्रयोगेण प्रसिद्धः, अतः स शब्दः तादृशप्रवाहस्य वाचकः। यश्शब्दः प्रचुरप्रयोगाभावाद् तस्मिन्नर्थेऽप्रसिद्धोऽपि सामीप्यादिरूपसम्बन्धसत्वाद् तस्मिन्नर्थे प्रयु-ज्यते, स शब्दः लक्षक इति व्यवह्रियते। यथा 'गङ्गायां घोष' इत्यत्र गङ्गाशब्दः तीररूपमर्थं लक्षयति। अतः गङ्गाशब्दोऽत्र लक्षक इति व्यवह्रियते। एवं प्रामाणिकव्यवहारानुरोधात् वाचको लक्षक इति वाचकत्वलक्षकत्वरूपधर्मभेदेन शब्दभेदस्सर्वैरङ्गीकृतः। अतस्सर्वे सर्वार्थवाचका इत्युक्तिर्न सम्यग्। गङ्गापदस्य प्रवाहवा-चकत्वमेव। न तीरादिवाचकत्वम्। तीरादौ गङ्गापदस्य प्रचुर-प्रयोगाभावात्। अपि च 'गङ्गा' इति पदश्रवणे गङ्गात्वाव-च्छिन्नस्य प्रवाहस्यैवोपस्थितिः नियमेन जायते। यदा तु गङ्गायां घोष इति वाक्यं प्रयुज्यते, तदैव शक्यार्थान्वयानुपपत्तिज्ञानाद् तात्पर्यानुपपत्तेर्वा गङ्गापदस्य वाक्यार्थबोधानुकूलं कमप्यर्थं कल्पयति।

योऽर्थः यस्मिन् शब्दे उच्चारिते नियमेनोपस्थितो भवति सोऽर्थो वाच्य इत्युच्यते। वाच्यार्थोपस्थितिजनकः शब्दः वाचकः। शक्तिश्चानयोर्वाच्यवाचकयोस्सम्बन्धः। तथा च शक्तिप्रतियोगिकत्वाद् पदं शक्तमिति, शक्त्यनुयोगिकत्वादर्थं शक्यमिति च प्रामाणिका व्यवहरन्ति। सा च शक्तिः बोधकत्वरूपं न सम्भवति। शक्तेर्बोध-कत्वरूपत्वस्वीकारे एव गङ्गापदस्य तीरबोधकत्वं वर्तत इति लक्षणाख्यवृत्यन्तरास्वीकारः। शक्तेर्बोधकत्वरूपास्वीकाराद् गङ्गा-पदस्य तीरबोधकत्वोपपत्यर्थं लक्षणाख्यवृत्यन्तरस्वीकारआवश्यकः।

न च ईश्वरसङ्केतश्शक्तिरिति वादिनाम्मतेऽपि गङ्गापदस्य तीरे शक्तिस्सिद्धैव, गङ्गादिपदजन्यबोधविषयत्वप्रकारकेच्छायायाः तीरेऽपि सत्त्वाद्, भगवदिच्छायास्सन्मात्रविषयकत्वेन गङ्गापदाल्लक्षणया तीरबोधस्यापि जायमानत्वेन तद्विषयत्वस्यापीश्वरेच्छायामावश्य-कत्वाद्। तथा च लक्षणोच्छेदापत्तिरिति वाच्यम्। 'तीरं गङ्गापद-वाच्यम्' इति व्यवहारो नास्ति। अतः ईश्वरेच्छायां गङ्गापदजन्य-बोधविषयस्तीरं भवत्वि'त्याकारता न स्वीक्रियते। परन्तु विषयता गङ्गापदजन्य बोधीया भवतु' 'तीरं विषयतावद्भवतु' इत्येवंरीत्या विशकलितव्यपदेशेन विषयतात्वेनैव गङ्गापदजन्यबोधविषयतायास्तीरे भगवदिच्छाया अवगाहनात् तीरादौ गङ्गापदजन्यबोधविषयतात्वा-वच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन नेश्वरेच्छावत्त्वमिति तीरादौ गङ्गापदशक्यत्वाभावात् तीरादिविषयकशाब्दबोधनिर्वाहाय लक्षणाङ्गीकार आवश्यकः।

गङ्गायां घोष' इति वाक्याद् जायमाने बोधे गङ्गापदोपस्थापित-तीरस्य भानमनुभवसिद्धम्। शाब्दबोधे तीरभानं तीरोपस्थितिं विना न सम्भवति, पदार्थोपस्थितेश्शाब्दबोधं प्रति हेतुत्वाद्। तीरोप-स्थितिश्च गङ्गापदतीरयोस्सम्बन्धग्रहं विना नोपपद्यते। एक-सम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्यैव पदज्ञानस्य पदार्थो-पस्थितिं प्रति हेतुत्वाद्। तथा च शाब्दबोधौपयिकपदार्थस्मृत्यौ-पयिकत्वेन संप्रतिपन्नः स्वतःसिद्धसम्बन्धभावश्शक्यसम्बन्धस्तादृश-स्सम्बन्ध इति सैव लक्षणा। 'गङ्गायां घोष' इत्यत्र गङ्गापदस्य स्व-

शक्यप्रवाहसामीप्यं लक्षणा। तादृशलक्षणाग्रहादेव तत्र तीरोपस्थितिः, तीरशाब्दबोधश्च। अतः लक्षणावश्यमङ्गीकर्तव्या।

[1]शक्यसम्बन्धिप्रतीतीच्छया उच्चरितत्वमित्यर्थकं शक्यसम्बन्धिनि तात्पर्यं लक्षणेति वक्तुन्न शक्यते। पदार्थोपस्थितौ सत्यामेव प्रकरणादिना वक्तृतात्पर्यज्ञानं जायते। तात्पर्यग्रहादनन्तरं शाब्दबोधः। तात्पर्यग्रहार्थं पदार्थोपस्थितिरपेक्षिता। तत्रैव लक्षणा ज्ञानस्योपयोगः। तात्पर्यस्य लक्षणात्वे तज्ज्ञानं पदार्थस्मृतेः प्राक् न। सम्भवतीति तस्य वृत्तित्वमेव न स्यात्। किञ्च तात्पर्यानुपपत्तेर्लक्षणाबीजत्वं न स्याद् स्वानुपपत्तेः स्वबीजत्वासम्भवाद्। अपि चैवं रीत्या वक्तुः प्रवाहादावर्थे तात्पर्यं गङ्गादिपदस्य शक्तिरित्यपि स्याद्। अत्रेष्टापत्तिर्वक्तुन्न शक्यते तादृशतात्पर्यस्य शक्तित्वे लक्षणाया एवासिद्धिप्रसङ्गाद्। यदि तात्पर्यनिर्वाहकतया तात्पर्यातिरिक्ता शक्तिस्स्वीकरणीया तदा लक्ष्यार्थतात्पर्यनिर्वाहकतया तात्पर्यातिरिक्ता लक्षणावृत्तिः स्वीकरणीया।

तात्पर्यस्य लक्षणात्वेऽपरोपि दोषः। नैयायिकमतरीत्या शाब्दबोधे एकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते। संसर्गमर्यादा चाकाङ्क्षा। यदि तात्पर्यं लक्षणा स्याद् तर्हि संसर्गांशे तात्पर्यस्य शाब्दबोधप्रयोजकत्वेन, संसर्गे लक्षणाभास्यत्वमङ्गीकरणीयं स्याद्। तच्च न्यायसिद्धान्तविरुद्धम्।

स्वा[2]र्थसम्बन्धेन गङ्गापदं तीरं बोधयिष्यतीति प्रयोक्तुरभिप्रायो लक्षणेत्यपि न सम्यक्। प्रयोक्तुरभिप्रायस्य तथा प्रयोगे निमित्तत्वं सम्भवति, परन्तु सा लक्षणा न सम्भवति। यथा "गङ्गायां मीन' इत्यत्र गङ्गापदं भगीरथखातावच्छिन्नप्रवाहं बोधयिष्यतीति वक्तुरभिप्रायः गङ्गायां मीन इति प्रयोगे निमित्तं, न तु तादृशाभिप्रायः शक्तिः, तथा 'गङ्गायां घोष' इत्यत्र गङ्गापदं तीरबोधं जनयिष्यतिति वक्तुरभिप्रायः 'गङ्गायो घोष' इति प्रयोगे निमित्तं, परन्तु तादृशाभिप्रायो न लक्षणा। किञ्च 'स्वार्थसम्बन्धेन गङ्गापदं तीरं बोधयिष्यतीति वक्तुरभिप्रायो लक्षणेति कथने शक्यसम्बन्धेन

1 शा. त. (चतुर्थ. तरङ्गे) पृष्ठम् १३४

2 शाब्दतरङ्गिण्यां श्रीसुब्रह्मण्यशास्त्रिभिरेवं 'प्रदीप'कारमतं खण्डितम्।

लक्ष्यस्मारकत्वस्य गङ्गापदे सिद्धत्वाद्, क्लृप्तस्य शक्यसम्बन्धस्यैव लक्षणात्वकल्पनमुचितम्।

मुकुलभट्टः[1] शक्यादशक्योपस्थितिर्लक्षणेति वदन्ति। तदपि न समीचीनम्। पदतदर्थसम्बन्ध एव वृत्तिः। 'उपस्थितिहेतुर्हि वृत्तिः नतूपस्तितिरेवे'त्यभियुक्तोक्त्या यथा पदजन्या अर्थोपस्थितिर्न शक्तिः, परन्तु पदजन्यार्थोपस्थित्यनुकूलः सम्बन्घ शक्तिः, तथैव अशक्यतीराद्युपस्थितिर्न शक्तिःपरन्तु अशक्योपस्थित्यनुकूलः, पदस्याशक्यस्य च सम्बन्धात्मकः शक्यसम्बन्ध एव लक्षणा।

किञ्च शाब्दबोधे पदजन्यस्यैवार्थस्य बोधो भवतीत्यनुभवसिद्धः। अत एव तद्विषयकशाब्दबोधं प्रति पदजन्यतदुपस्थितेर्हेतुत्वमङ्गीकृतम्। शक्यादशक्योपस्थितिर्लक्षणेति स्वीकारे अशक्यस्य तीरस्य गङ्गापदादनुपस्थितत्वेन (गङ्गापदार्थरूपप्रवाहात्मकशक्यादेवोपस्थितत्वमित्यङ्गीकाराद्) शाब्दबोधे भानं न स्याद्।

अपि च 'प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्व' मिति व्युत्पत्तिर्वर्तते। अतः 'गङ्गायां घोष' इत्यत्र गङ्गापदोत्तरं वर्तमानायास्सप्तमीविभक्तेः अर्थस्याधारतात्वस्य तीरान्विताधारताबोधकत्वन्न स्याद्, तीरस्य प्रकृत्यर्थत्वाभावाद्। 'शक्यादशक्योपस्थितिर्लक्षणेति वदतामेषाम्मते 'गङ्गायां घोष' इत्यत्र गङ्गापदस्य योऽर्थः प्रवाहः स शक्यः, तेनैवाशक्यस्य तीरस्योपस्थितिरिति गङ्गापदस्न तीरोपस्थापकं, परन्तु गङ्गापदार्थप्रवाह एवोपस्थापकः। 'प्रत्ययानां प्रकृतितात्पर्यविषयार्थान्वितस्वार्थबोधकत्व'मित्येव व्युत्पत्तिः स्वीक्रियत इति चेत् – वह्नितात्पर्येण 'धूमोऽस्ती'ति प्रयोगो वर्तते। तत्र धूमशब्दो न वह्निलक्षकः, धूमशब्दोपस्थितेन धूमेन वह्नेरनुमातुं शक्यत्वाद्, अनन्यलभ्यस्यैव शब्दार्थत्वाद्। अत्र धूमपदोत्तरवर्तिप्रत्ययार्थस्य धूमपदतात्पर्यविषयवह्निनान्वयबोधस्स्याद्। अतः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वंमित्येव

---

1 'यस्य तु शब्दव्यापारगम्यार्थपर्यालोचनया अवगतिः, तस्य लाक्षणिकत्व'ममिति निरूपयन्तो मुकुलभट्टाः शक्यादशक्योपस्थितिर्लक्षणेति पक्षमनुसरन्ति'। शा. त. पृष्ठम् २.३३

व्युत्पत्तिस्स्वीकरणीया। तत्स्वीकारे च, 'गङ्गायां घोष' इत्यादि शक्यादशक्योपस्थितिर्लक्षणेत्यङ्गीकारपक्षे तीरान्विताधारताबोधो न स्यादित्युक्तमेव।

शक्यनिष्ठोऽशक्यसम्बन्धः लक्षणा पदार्थवृत्तिरिति [1]मतमपि उपर्युक्तसरण्या एव परास्तम्।

वाक्ये लक्षणानुरोधेन 'बोध्यसम्बन्धो लक्षणे'ति [2]मतमपि न युक्तम्।

'गभीरायां नद्यां घोष' इत्यत्र गभीराभिन्ना नदीति बोधानन्तरं, नदीपदं गभीरपदं वा गभीरनदीतीरं लक्षयति। विनिगमनविरहाद् पदद्वये लक्षणास्वीकारेऽपि नान्यतरपदवैयर्थ्यम्। नदीपदेन गभीरनदीतीरबोधे जननीये गभीरपदसमभिव्याहारो नियामकः। गभीरपदेन गभीरनदीतीरबोधे जननीये नदीपदसमभिव्याहारो नियामक इति तयोः परस्परतात्पर्यग्राहकत्वाद्। वस्तुतस्तु नदीपदस्यैव गभीरनदीतीरे लक्षणा। गभीरपदं तात्पर्यग्राहकम्। विशेषणपदशक्यार्थेन लक्ष्यार्थस्य परम्परासम्बन्ध एव, विशेष्यपदशक्यार्थेन तु साक्षात्सम्बन्ध इति विशेष्यवाचकपदस्यैव लक्षकत्वमुचितम्। अतः पदलक्षणाया एवोचितत्वाद् वाक्ये लक्षणा नावश्यकी। किञ्च वाक्ये लक्षणास्वीकारे पदविशेषघटितानुपूर्व्याः लक्षकतावच्छेदकत्वकल्पनं; तच्च गौरवावहम्। अपि च 'स्वबोध्यसम्बन्धो लक्षणे'तिमते 'शक्त्या स्वजन्योपस्थितिविषयत्वं स्वबोध्यत्वमिति स्वीकरणीयम्। तथा च शक्तिप्रयोज्यस्वजन्योपस्थितिविषयसम्बन्धः लक्षणेत्युक्तं भवति। तदपेक्षया शक्यसम्बन्धस्यैव लक्षणात्वमुचितम्।

'गङ्गायां घोष' इत्यत्र गङ्गापदज्ञाने सति, 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारक'मिति रीत्या शक्यसम्बन्धरूपसम्बन्धेन सम्बद्धस्य तीरस्य स्मृतिर्जायते। गङ्गापदस्य येन येनार्थेन सम्बन्धग्राहो जातः, तस्य सर्वस्यापि स्मरणे स्मृतशक्यार्थप्रवाहस्य घोषपदार्थ-

1 केषाञ्चित मीमांसकानां मतम्। (शा. त.पृष्ठम् १३४)

2 मीमांसकैकदेशिनां मतम् (मुक्तावलीव्याख्यायां दिनकर्यां लक्षणानिरूपणावसरे एतन्मतं खण्डयति।)

न्वयानुपपत्तिप्रतिसन्धाने सति, वृत्युपस्थापिते तीरे प्रकरणादिना तात्पर्यज्ञानमुदेति। ततस्तीरान्वितविषयकश्शाब्दबोधो भवति। न च प्रवाहवृत्तिर्घोष इति बोधाजनने कथं तत्रानुपपत्तिप्रतिसन्धानं सम्भवतीति वाच्यम्। वाक्यार्थस्यापूर्वत्वेऽपि शाब्दबोधात्पूर्वं तात्पर्यज्ञानस्येव तत्तत्पदार्थस्मरणे सति अनुपपत्तिप्रतिसन्धानस्यापि सम्भवविरोधात्।

यद्रूपवत्वेन गृहीते सम्बन्धज्ञानं, एकसम्बन्धिज्ञानेन तेनैव रूपेणापरसम्बन्धिनः स्मृतिरनुभवसिद्धा। यदा तीरत्वावच्छिन्नतीर-विशेष्यको लक्षणाग्रहस्तदा तीरत्वप्रकारकतीरविशेष्यकस्मृत्यनन्तरं तीरत्वविशिष्टे तीरे शाब्दबोधो भवति। यदा तु गङ्गातीर-त्वावच्छिन्नतीरविशेष्यको लक्षणाग्रहो भवति, तदा गङ्गातीरत्वा-वच्छिन्नतीरविशेष्यकस्मृत्यनन्तरं गङ्गातीरत्वविशिष्टे तीरे शाब्द-बोधो भवति। समानप्रकारकयोरेव पदार्थोपस्थितिशाब्दबोधयोः कार्यकारणभावात्।

न च गंगात्वेन तीरस्याभाने गङ्गागतशैत्यपावनत्वादीनां न तीरे प्रतीतिरिति प्रयोजनं न लभ्येतेति वाच्यम्। तीरस्य गङ्गापदप्रतिपाद्यत्वज्ञानाद् मानसाद् गङ्गागतशैत्यपावनत्वादीनां तीरे प्रतीतिस्सम्भवति।

लाक्षणिकवाक्यजन्यः शाब्दबोधः न भ्रमः, तीरत्वादिनैव लक्ष्यतीरावगाहनाद्। 'आयुर्घृतम्' इति वेदवाक्यजन्यशाब्दबोधः प्रमैवेति, शाब्दबोधसमानाकारज्ञानवतः वेदकर्तुः भ्रमवत्वन्नापादयितुं शक्यते। अन्यथा आयुष्ट्वेन घृतशाब्दबोधस्य भ्रमत्वाद् प्रयोग-हेतुभूततत्समानाकारज्ञानवतः वेदकर्तुरीश्वरस्य भ्रमवत्त्वमापद्येत।

'कमलानि कमलानी'त्यत्र लाक्षणिककमलपदाद् सौरभविशिष्ट कमलत्वेन बोधः। 'दण्डवान् रक्तदण्डवान्' इत्यत्रैव विधेयांशे अधिकावगाहि बोधजननाद् न व्युत्पत्तिविरोधः। 'वृक्षः महीरुहः' इति व्याख्यानवाक्ये वृक्षशब्दस्य वृक्षपदप्रतिपाद्ये लक्षणा। वृक्षपदप्रतिपाद्यत्वमहीरुहत्वयोः उद्देश्यतावच्छेदकविधेयतावच्छेद-कयोर्भेदात् अन्वयबोध उपपद्यते।

'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा'। इत्यभियुक्तोक्तिः। अतः गङ्गात्वेन तीरबोधो न युज्यते।

एवञ्च शक्यसम्बन्धः लक्षणा। सम्बन्धश्च साक्षात्परम्परा-साधारणः। 'गङ्गायां घोष' इत्यत्र तीरे शक्यार्थस्य साक्षात्सम्बन्धः। 'इन्द्रा स्थूणा' इत्यादौ [1]परम्परासम्बन्धः।

केचित्तु उपचाराख्या अपरा जघन्या वृत्तिरस्तीति वदन्ति। अनियतसम्बन्धेनान्यत्र वृत्तिरुपचारः। नियतसम्बन्धेन अन्यत्र वृत्तिर्लक्षणा। 'मञ्चाः क्रोशन्ती'त्यादौ मञ्चस्य पुरुषस्य च न नियतः सम्बन्धः। अतस्तत्र मञ्चपदस्य पुरुषे उपचारः। 'गङ्गायां घोष' इत्यादौ गङ्गापदस्य तीरे लक्षणा। शक्यार्थस्य प्रवाहस्य लक्ष्यार्थस्य तीरस्य च नियतसम्बन्धसत्वाद्।

परन्तु शक्यसम्बन्धस्योभयत्र तुल्यत्वाद् उपचारस्यातिरिक्तवृत्तित्वकल्पने मानाभावः। तस्य लक्षणायामेवान्तर्भावो युज्यते।

एवं गौण्यपि नातिरिक्ता वृत्तिः। सादृश्यविशिष्टानुयोगिकः शक्यसम्बन्धः गौणी वृत्तिः। 'सिंहो माणवक' इत्यादौ सिंहशब्दस्य सिंहसादृश्यविशिष्टे लक्षणा। सादृश्यञ्च सिंहवृत्तिशौर्यादिगुणवत्त्वम्। सादृश्यपर्यवसितशौर्यादिगुणैः स्वावच्छिन्नानुयोगिकत्वसम्बन्धाद् सा गौणीति व्यवह्रियते। 'लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता'। इत्यस्यायमेवार्थः। गुणानां लक्ष्यमाणत्वकथनं लक्ष्यतावच्छेदकत्वाभिप्रायकम्। अतो गौणी नातिरिक्ता वृत्तिः।

**निरूढलक्षणा**

अनादितात्पर्यविषयीभूतार्थनिष्ठा लक्षणा निरूढलक्षणा।

**स्वारसिकलक्षणा**

सादितात्पर्यवती लक्षणा स्वारसिकलक्षणा। सा आधुनिकलक्षणा सांप्रतिकलक्षणा इत्यादिभिरपि नामभिर्व्यवह्रियते।

---

1 इन्द्रकर्मकपूजाप्रयोजनकत्वादिकं परम्परासम्बन्धः।

**लक्षणाविभागः**

[1]तर्कसंग्रहदीपिकायां अन्नंभट्टः लक्षणां त्रिधा विभजते — जहल्लक्षणा, अजहल्लक्षणा जहदजहल्लक्षणेति। यत्र वाच्यार्थस्यान्वयाभावः तत्र जहल्लक्षणा। यथा मञ्चाः क्रोशन्तीति। यत्र वाच्यार्थस्याप्यन्वयः तत्राजहल्लक्षणा। यथा 'छत्रिणो गच्छन्ती'ति। यत्र वाच्यैकदेशत्यागेन एकदेशान्वयस्तत्र जहदजहल्लक्षणा। यथा 'तत्त्वमसी'त्यत्र।

मुक्तावलीकारैः लक्षणाविभागस्तु व्यक्ततया न क्रियते। मुक्तावलीव्याख्यायां दिनकर्यान्तु जहत्स्वार्था, अजहत्स्वार्था चेति लक्षणाया द्वैविध्यं सुव्यक्तं प्रतिपाद्यते। अत्र जहदजहल्लक्षणा न स्वीक्रियते। लक्षितलक्षणां जहत्स्वार्थायामन्तर्भावयन्ति। स्वत्राच्यरेफद्वयघटित-पदवाच्यत्वरूपपरम्परासम्बन्धेन द्विरेफपद भ्रमररूपार्थलक्षकम्।

प्राभाकरमीमांसकानाम्मते लाक्षणिकं पदं नानुभावकम्। शाब्दबोधे शक्तपदज्ञानमेव हेतुः। गङ्गादिपदं यदि तीरादिविषयकशाब्दबोधजनकं स्याद्, तर्हि तत्तीरादौ शक्तमिति वक्तव्यम्। तेन च तस्य लाक्षणिकत्वं व्याहतं स्याद्। तस्माद् लाक्षणिकं पदं न शाब्दबोधजनकम्। लाक्षणिकार्थस्य शाब्दबोधे तु तल्लाक्षणिकपदसन्निहितं शक्तं पदान्तरमेव कारणम्। 'गङ्गायां घोष' इत्यत्र गङ्गापदं लाक्षणिकम्। घोषपदं शक्तम्। अत्र गङ्गापदस्य लक्षणया गङ्गातीरस्य, घोषपदस्य शक्त्या घोषस्य चोपस्थितिः भवतीति अत्र गङ्गापदस्य लक्ष्यार्थो गङ्गातीरः, घोषपदस्य शक्यार्थो घोषः। गङ्गातीरवृत्तिर्घोष इति शाब्दबोधे शक्तं घोषपदमेव समर्थं, न तु लाक्षणिकं गङ्गापदम्।

प्राचीननैयायिकानां मते लाक्षणिकपदज्ञानं स्मरणात्मकशाब्द-बोधस्य कारणं न त्वनुभवात्मकशाब्दबोधस्य। [3]लाक्षणिकपदे स्मारिका शक्तिर्विद्यते, न त्वानुभाविकी शक्तिः। अतः वाक्ये आनुभाविकीशक्तिविशिष्टस्य पदस्याभावे सति शाब्दबोधे लाक्षणिकार्थस्य भानं न सम्भवति।

---

1 त. सं. दी. पृ. ३२४ 2 न्या. द. वि. पृष्ठम् २१८

3 'तथा च लाक्षणिके पदे स्मारिका शक्तिरेव, नानुभाविकीति भावः'। रामरुद्री पृष्ठम् २८९

[1]नव्यनैयायिकास्तु लाक्षणिकपदे अपि आनुभाविकीं शक्ति-मङ्गीकुर्वन्ति। वाक्यान्तर्गतानां सर्वेषां पदानां लाक्षणिकत्वे अपि अनुभवात्मकश्शाब्दबोधो भवति। 'कुमतिः पशु'रिति वाक्ये कुमति शब्दः पशुशब्दश्च लाक्षणिकः। कुमतिशब्दे बहुव्रीहित्वाद् उत्तरपदे कुत्सितज्ञानवति लक्षणा। पूर्वपदस्य तात्पर्यग्राहकत्वम्। कुमतौ पशुत्वस्य बाधितत्वेन पशुसदृशे लक्षणा। अस्मिन् वाक्ये शक्तं पदं नास्ति। लाक्षणिकस्याननुभावकत्वे अत्र शाब्दबोधो न स्याद्। अतोऽत्र शाब्दबोधोपपत्त्यर्थं लाक्षणिकपदेऽपि आनुभाविकीं शक्तिमव-श्यमङ्गीकरणीयम्।

**लक्षणाबीजम्**

नैयायिकमतानुरोधेन तात्पर्यानुपपत्तिः लक्षणाबीजं, न त्वन्व-यानुपपत्तिः। यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्याद् तदा गङ्गातीरे घोषः इति बोधतात्पर्येणोच्चारिते गङ्गायां घोष इति वाक्ये गङ्गापदस्य तीरे, 'गङ्गाजले मत्स्य' इति बोधतात्पर्येणोच्चारिते 'गङ्गायां घोष' इति वाक्ये घोषपदस्य मत्स्यादौ लक्षणेति नियमो न स्याद्। गङ्गापदलक्षणया घोषपदलक्षणया वान्वयानुपपत्तेर्निवृत्तिः भवतीति एकतरपदे लक्षणास्वीकारेणैवोपपत्तेः। वक्तृतात्पर्यानुसारेणैव लक्षणास्वीकाराद्, तात्पर्यानुपपत्तिरेव लक्षणाबीजम्।

---

1 (i) 'न च शक्तपदस्यैव स्वसाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थ धर्मिकान्वयबोधं प्रति हेतुत्वाद् अन्वयबुद्धौ लक्ष्यार्थस्याप्रवेशः, कुन्ताः प्रविशन्तीत्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविशेष्यत्वानुपपत्तेः, कुमतिः पशुरित्यादौ लक्ष्यार्थयोर्मिथोऽन्वयबोधस्याप्यानुभविकत्वाच्च'। (शब्द शक्तिप्रकाशिका पृष्ठं १५८ – १५९)

(ii) ''मञ्चाः क्रोशन्तीत्यादौ लक्ष्यार्थमञ्चस्थपुरुषादेः शाब्दबोधविषयतायाः आवश्यकत्वाद्, अन्यथा पूर्वाननुभूतस्य पुरुषादेः प्रतीत्यनिर्वाहात्'' — शक्तिवादे पृष्ठम् २४ – २७।

'.......... पदार्थोपस्थितिद्वारा शक्यार्थानुभवे शक्तस्येव लक्ष्यार्थबोधे लाक्षणिकस्यापि हेतुतया दुर्वारत्वाद् तत्रापि शक्तेरावश्यकतया' ... (शक्तिवादे पृष्ठं २३)

**पदे एव लक्षणा, न समासे**

वाक्ये इव समासेऽपि पदलक्षणयैव शाब्दबोधो भवति। बहुव्रीहौ 'चित्रगु'रित्यादौ, 'पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेने'ति व्युत्पत्तिर्न स्वीक्रियते चेद् [1]गोपदस्य गोस्वामिनि लक्षणा। चित्रपदार्थः 'गोस्वामि' रूपपदार्थैकदेशे गवि अभेदसम्बन्धेनान्वेति। उपर्युक्तव्युत्पत्तेरङ्गीकारे तु गोपदस्य [2]चित्रगोस्वामिनि लक्षणा। चित्रपदं तात्पर्यग्राहकम्। तत्पुरुषे तु पूर्वपदे लक्षणा। 'राजपुरुष' इत्यत्र राजपदस्य राजसम्बन्धिनि लक्षणा। राजसम्बन्धिरूपार्थस्याभेदेन पुरुषपदार्थेऽन्वयः। 'धवखदिरौ छिन्धि' इत्यादावितरेतरयोग द्वन्द्वे धवश्च खदिरश्चेति द्वित्वविशिष्टधवखदिरयोर्बोधस्तत्र न लक्षणा। 'अहिनकुल'मित्यादिसमाहारद्वन्द्वे उत्तरपदस्याहिनकुलसमाहारे लक्षणा पूर्वपदं तात्पर्यग्राहकमिति प्राचीनाः। नवीनास्त्वहिन-कुलमित्यादौ अहिर्नकुलश्च बुद्ध्यते। प्रत्येकमेकत्वान्वयः। यत्रैकत्वं नपुंसकत्वञ्च '[3]...प्राणितूर्यसेनाङ्गानामि'ति सूत्रेणोक्तं तत्रैव समाहारसञ्ज्ञा। अन्यत्रैकवचनमसाध्विति वदन्ति। कर्मधारयस्थले 'नीलोत्पल'मित्यादौ अभेदसम्बन्धेन नीलपदार्थः उत्पलपदार्थे। प्रकारीभूय भासते। तत्र न लक्षणा। उपकुम्भमित्यादावव्ययीभावसमासे परपदे तत्सम्बन्धिनि लक्षणा। एवं पूर्वपदार्थप्रधान-तत्पुरुषे 'अर्धपिप्पली'त्यादावपि परपदे तत्सम्बन्धिनि लक्षणा।

एवञ्च समासे न क्वापि लक्षणा, समासे शक्तेरनङ्गीकारात्। समासघटकीभूतपदशक्तिलक्षणाभ्यामुपपत्तेः। इति।

**व्यञ्जना**

व्यञ्जना नाम वृत्यन्तरं वर्तत इत्यालङ्कारिकाः। तेषामयमाशयः — सङ्केतितार्थमात्रबोधनविरताया अभिधाया न वस्त्वलङ्कारादिबोधने सामर्थ्यम्। रसादिर्व्यङ्ग्यार्थो न सङ्केतितः। न हि विभावाद्यभिधानं रसाद्यभिधानं सम्भवति, विभावादे रसादि-

---

1 जगदीशमतम्। शब्दशक्तिप्रकाशिकायां बहुव्रीहिसत्रासप्रकरणें-पृष्ठम् २४२–२४३

2 मणिकारमतम्। शब्दशक्तिप्रकाशिकायां बहुव्रीहिसमासप्रकरणे जगदीशः मणिकारमतमेतद् खण्डयति। 3 पा. सू, २–४–२

भिरैकरूप्यस्यानङ्गीकाराद् । यस्मिन् स्थले रसस्य स्वशब्देनाभि-धानं तत्र रसप्रतीतिर्नास्ति । नानार्थस्थले तु —

[1]नानार्थशब्दात् यावत्स्वर्थेषु शक्तिर्गृहीता तावतां सर्वेषा-मुपस्थितिर्जायते । ततः प्रकरणादिभिरर्थविशेषतात्पर्यनिर्णये ता-त्पर्यविषयार्थस्यान्वयबोधो जायते, नान्यस्य अर्थस्य । शक्तिप्रयो-ज्यशाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वाद् । प्राकरणिकार्थबोधानन्तरं तस्मादेव शब्दाद् जायमानः अप्राकरणिकार्थविषयकश्शाब्दबोधो न शक्तिसाध्यः । परन्तु व्यञ्जनासाध्य एव ।

[2]'गङ्गायां घोष' इत्यादौ गङ्गागतशैत्यपावनत्वादिविषयक-प्रतीतिं जनयितुमेव लाक्षणिकस्य गङ्गापदस्य प्रयोग उपपद्यते : अन्यथा 'गङ्गातटे घोष' इत्येव प्रयुञ्जीत । अतः लक्षणासिद्धि-र्व्यञ्जनासिद्धिमाश्रित्यैव भवति । व्यञ्जनाया अनङ्गीकारे लक्षणापि न सिद्ध्येत् । लाक्षणिकस्य शब्दस्य शैत्यपावनत्वादिषु प्रयोजनेषु लक्षणैवास्तु इति नापादयितुं शक्यते । मुख्यार्थबाधः, मुख्यार्थसम्ब-न्धः रूढिप्रयोजनयोरन्यतरदिति त्रयं लक्षणाहेतुः, तस्य त्रयस्यापि, हेतोरत्राभावाद् । यथा गङ्गाशब्दः 'गङ्गायां घोष' इति वाक्ये प्रवाहरूपेऽर्थे सबाध इति तस्य गङ्गाशब्दस्य गङ्गातटरूपम् मुख्यार्थ-प्रवाहसम्बद्धमर्थं स्वीकरोति, न तथा गङ्गाशब्दस्य शैत्यपावनत्वादि-रूपप्रयोजने लक्षणेति वक्तुं शक्यते, न च तटं मुख्योऽर्थः, गङ्गा-शब्दः तटरूपेऽर्थे न सबाधः, गङ्गाशब्दार्थस्य तटस्य पावनत्वा-द्यैर्लक्षणीयैर्न सम्बन्धः, पावनत्वादिप्रयोजनस्य लक्ष्यत्वे किञ्चित् प्रयोजनञ्च नास्ति । एवमपि प्रयोजनं लक्ष्यते चेद्, तत् प्रयोज नान्तरेण, तदपि प्रयोजनान्तरेणेति अनवस्था भवेत् ।

---

1 अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥ (का. प्र. द्वि. उ. का. १९)

2 यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ॥ (का.प्र.द्वि.उ.का.१४)

[1]गङ्गाशब्दः शैत्यपावनत्वादिविशिष्टं तटं लक्षयति, 'गङ्गाया-स्तटे घोष' इत्यतोऽधिकस्यार्थस्य प्रतीतिश्च प्रयोजनमिति विशिष्टे लक्षणा तत्कि व्यञ्जनयेति नापादनीयम्। यथा ज्ञानस्य विषयः ज्ञानादन्यो भवति, तथा ज्ञानस्य फलमपि ज्ञानादन्यद् भवति। एवं लक्षणाजन्यज्ञानाद् तत्फलस्य पावनत्वादिज्ञानस्यान्यत्वमवश्य-मेषितव्यम्।

रसः काव्यस्य जीवितं भवति। तत्प्रतीतिश्चमत्कारकारिणी। रसस्य प्रतीतिर्व्यञ्जनयैव भवति, नाभिधया, लक्षणया वा। अभि-धया यदि रसप्रतीतिः स्याद् तर्हि 'रस' इति पदश्रवणे रसस्य प्रतीतिर्भवतीति वक्तव्यम्। रस इति पदाश्रवणेऽपि रसप्रतीति-र्भवत्येवेति अन्वयव्यतिरेकाभ्यां रसप्रतीतिरभिधया न भवतीति ज्ञातुं शक्यते। लक्षणयापि रसप्रतीतिर्न सम्भवति। लक्षणानि-मित्तानां मुख्यार्थबाधादीनामसम्भवाद्। रसानुभवस्यानन्दमयसंविद्-विश्रान्तिरूपतया प्रयोजनान्तरं न सम्भवति। रसप्रतीतेर्लक्ष्यत्वे, प्रयोजनं वक्तव्यं स्याद्।

[2]न्यायमञ्जरीकारः जयन्तभट्टः तात्पर्याख्यया वृत्त्या पदार्थ-संसर्गबोधो भवतीत्यङ्गीकुर्वन्ति। तस्याः वृत्तेरपि रसादीन् बो-धयितुं न सामर्थ्यं, शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति नियमाद्।

---

1 प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥ १७ ॥
ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्।
विशिष्टे लक्षणा नैवं ....... (का. प्र. द्वि. उ.)

2 "पदान्यन्वितं प्रत्याययन्ति, नान्वितमभिदधति। नाभिधात्री शक्तिरन्वितविषया, किन्त्वन्वयव्यतिरेकानुगतनिष्कृष्टस्वार्थविषयैव। तात्पर्यं शक्तिस्तु तेषामन्विताvगमपर्यन्ता सह व्यापाराद्, व्यापारस्यैतदीयस्य निराका-ङ्क्षप्रत्ययोत्पादनपर्यन्तत्वाद्।' (न्या. म. (ष. आ) पृष्ठम्. २१६-२१७.)

"अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता।
तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः" ॥ इति च (न्या. म. पृ. २१८)

भट्टलोल्लटादयश्शब्दश्रवणानन्तरं यावानर्थः प्रतीयते, तत्र सर्वत्रापि शब्द एव निमित्तं; शब्दस्य च व्यापारोऽभिधा। सा दीर्घदीर्घतरा। यथा बलवता प्रेरितः इषुः एकेनैव वेगाख्येन व्यापारेण वर्मच्छेदम्, उरोभेदं प्राणहरणञ्च रिपोर्विधत्ते, तथा शब्दः एकनैवाभिधाव्यापारेण पदार्थस्मरणं, वाक्यार्थानुभवं व्यङ्ग्यत्वाभिमतोऽर्थप्रतिपत्तिञ्च विधत्ते। अतः व्यङ्ग्यत्वाभिमतोऽर्थः वाच्य एव, तात्पर्यविषयस्यैव शब्दार्थत्वाद्। अतः व्यञ्जनावृत्तिर्नास्तीति वदन्ति।

तन्न सम्यक्। अभिधायाः पदार्थोपस्थितावेव हेतुत्वम्। वाक्यार्थानुभवः नाभिधाव्यापारसाध्यः। अतः वाक्यार्थबोधानन्तरजन्यव्यङ्ग्यार्थप्रतीतौ अभिधायाः सुतरां न हेतुत्वम्। वेगव्यापारस्य दीर्घदीर्घतरत्वसम्भवेऽपि अभिधाया ज्ञाताया एवार्थप्रतिपत्तिजनकत्वाद्, पूर्वं व्यङ्ग्यत्वाभिमतनिष्ठत्वेन तज्ज्ञानाभावाद् अभिधया व्यङ्ग्यत्वाभिमतार्थबोधो न सम्भवति। सङ्केतग्रहसापेक्षा एवाभिधा अर्थबोधं जनयति। व्यङ्ग्ये सङ्केतग्रहाभावेनाभिधया व्यङ्ग्यार्थसिद्धिर्न सम्भवति।

**व्यञ्जनाया अनभ्युपगमेऽनुपपत्तयः**

व्यञ्जनाया अनभ्युपगमे असाधुत्वादयो नित्यदोषाः, कष्टत्वादयोऽनित्यदोषा इति विभागो न स्याद्। वाच्यार्थस्याविशेषेण कष्टत्वादीनां सर्वत्र दुष्टत्वस्यादुष्टत्वस्य वा प्रसङ्गाद्। व्यञ्जनाया अभ्युपगमे तु व्यञ्जनीयस्य बहुविधत्वेन रौद्रादौ व्यञ्जनीये कष्टत्वस्यानुकूलता, शृङ्गारादौ व्यञ्जनीये तस्य प्रतिकूलतेति विभागव्यवस्था युज्यते। एवं पर्यायेषु मध्ये कस्यचिदेव कुत्रचिदेव काव्यानुगुणत्वम्। [1]"द्वयं गत संप्रति शोचनीयतां समागमप्रार्थनया कपालिन' इत्यत्र कपालिपदस्यैव व्यञ्जनीयायाः जुगुप्सायाः अनुकूलत्वं, न पिनाकिपदस्ये ति व्यवस्थानिर्वाहायापि व्यञ्जनावृत्तिरवश्यमङ्गीकरणीया।

---

1 कुमारसम्भवे पञ्चमे सर्गे।

वाच्यार्थो व्यङ्ग्यार्थश्च परस्परं भिन्नः। 'गतोऽस्तमर्कं' इति वाक्ये वाच्यार्थस्सर्वान् प्रत्येक एव। व्यङ्ग्यार्थस्तु तत्तत्पुरुषभेदेन भिन्नः। एवं वाच्यार्थस्य व्याकरणकोशादिमात्रेणावगमः। व्यङ्ग्यार्थस्य तु प्रतिभानैर्मल्यादिना। वाच्यार्थेन व्युत्पन्नसामान्यस्य प्रतीतिमात्रं जायते; व्यङ्ग्येन तु सहृदयस्य चमत्कृतिर्जायते। अतः सङ्ख्याभेदेन ज्ञापकभेदेन कार्यभेदेन च वाच्यार्थो व्यङ्ग्यार्थाद्भिन्नः।

व्यञ्जनावृत्तिमनङ्गीकुर्वन्तः केचन, शब्दव्यापारजन्यशाब्दबोधानन्तरं व्यङ्ग्यत्वाभिमततत्तदर्थविषकमानसप्रत्ययो जायते, स एव चमत्कारकारणं, तथा च चमत्कारजनकप्रतीतिविषयस्य न शब्दव्यापारबोध्यतेति तद्भानाय व्यञ्जनावृत्तिः नापेक्षणीयेति वदन्ति। परन्तु तन्न सम्यक्। 'अनेन वाक्येनेममर्थमवगच्छामी'ति व्यङ्ग्यत्वाभिमतार्थविषयकोऽबाधितोऽनुभवः सर्वसिद्धः। सर्वसिद्धोऽनुभव अपलपितुमशक्यः। अतो व्यङ्ग्यार्थश्शब्दव्यापार गम्य एवेति व्यञ्जनाव्यापारोऽवश्याभ्युपेयः।

अन्यथा 'गौरस्ती'त्यादावपि गवि अस्तित्वान्वयबोधो मानस एव, न शाब्द इत्यपि वक्तुं शक्यत्वाद् शाब्दात्मकप्रमित्यन्तरासिद्धौ शब्दप्रमाणस्यैव विलोपापत्तिः। यदि गोरस्तितां शाब्दयामीत्यबाधितानुव्यवसायबलाद् अन्वयानुभवः शाब्दबोधात्मकः, अनुभवस्य व्याख्यानानपेक्षत्वादित्युच्यते, तर्हि चमत्कारकारणीभूता व्यङ्ग्यत्वाभिमतार्थसिद्धिरपि शाब्द इत्यबाधितानुभवसत्त्वेन तदर्थप्रतिपत्तये व्यञ्जनावृत्तिरवश्यमङ्गीकरणीया।

व्यङ्ग्यव्यञ्जकभावोऽनुमेयानुमापकभाव एव पर्यवस्यति। वाक्यादसम्बद्धो न प्रतीयते, सर्वस्माद् सर्वोपलब्धिप्रसङ्गाद्। सम्बन्धेन च नियतेन भाव्यम्। नियतसम्बद्धमपि स्वाधिकरणत्वेनाज्ञाते न व्यङ्ग्यं प्रतिपादयति। अन्यथा सर्वत्र तत्प्रतीतिप्रसङ्गः। इत्थञ्च व्यञ्जकस्य व्यङ्ग्येन व्याप्तत्वं, पक्षधर्मत्वञ्चावश्यकमिति अनुमानेनैव व्यङ्ग्यत्वाभिमतार्थसिद्धिरिति मतमपि न समीचीनम्। अनुमितौ निर्धारितस्यैवाङ्गत्वं, व्यञ्जनायान्तु व्याप्तेः पक्षधर्मतायाश्च निर्धारणं नाङ्गम्। परन्तु सम्भावितादपि व्यङ्ग्यं प्रतीयते।

तस्मान्नानुमानेन व्यङ्ग्यत्वाभिमतार्थस्य प्रतीतिरिति व्यञ्जनावृत्ति-स्स्वीकरणीयैव।

परब्रह्मानन्दसब्रह्मचारी रसास्वादः कविवाक्याद् व्यञ्जनयैव जायते। आज्ञादिकं विना कर्तव्योपदेशं व्यङ्ग्यमर्यादया कुर्वती कविभारती श्रुतिपुराणादिभ्यो विशिष्यते। [1] व्यङ्ग्यार्थगर्भितत्वादेव महाकवीनां वाणी सर्वतो विजयते। तस्मात् कविभारतीनां समुत्कर्षकारिणी व्यञ्जनावृत्तिरवश्यमङ्गीकरणीया। सा च न केवलं पदवृत्तिः अपितु पदार्थवृत्तिः, वाक्यादिवृत्तिरपि। इति॥

**नैयायिकमतम्**

शाब्दबोधजनकपदार्थोपस्थितिजनकज्ञानविषयः पदतदर्थसम्बन्धो वृत्तिः। शाब्दविषयस्य पदार्थस्य पदाद् शक्तिरूपसम्बन्धज्ञानेन यथोपस्थितिः, न तथा व्यञ्जनारूपपदतदर्थसम्बन्धज्ञानेन शाब्दविषय तादृशपदार्थोपस्थितिर्भवति। अतः व्यञ्जनायाः वृत्तिलक्षणमेव नास्ति।

नानार्थस्थले प्रकृताप्रकृतयोरर्थयोः शक्त्यैव बोधे बाधकाभावाद् न प्राकरणिकार्थबोधानन्तरं अप्राकरणिकार्थबोधानुरोधेन व्यञ्जनावृत्तिः स्वीकार्या।

प्रकृतार्थान्वयबोधानन्तरं जायमान एव प्रत्ययः चमत्कारजनक इत्यनुभवोऽपि उपनयवशेन जायमानमानसविशिष्टप्रत्ययेनोपपद्यते। चमत्कारजनकबोधेन शाब्देनैव भवितव्यमिति नियमो नास्ति।

आलङ्कारिकैः यत्र लक्षणामूलव्यञ्जना उदाह्रियते तत्र लक्षणयैव निर्वाहः। अन्वयानुपपत्तिरूपलक्षणाबीजाभावाद् तत्र लक्षणा न सम्भवतीति वादो न सम्यक्। यतः लक्षणाजन्यान्वयबोधं प्रति सर्वत्र अन्वयानुपपत्तेर्हेतुत्वन्नास्ति। 'यष्टीः प्रवेशय' 'काकेभ्यो दधि रक्ष्यताम्' इत्यादावन्वयानुपपत्तेरभावाद्।

---

1 ''प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तद् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥''

[1]'गच्छ, गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवा' इत्यादौ 'तव गमने मम मरणं भविष्यती'ति प्रत्ययोऽनुमानेनैव। मरणं विना पुनर्जन्मासम्भवाद्। नियतं सम्बन्धमवलम्ब्यैव शब्दोऽर्थविशेषव्यञ्जक इति व्यञ्जनावादिनापि स्वीकरणीयम्। स एव नियतस्सम्बन्धः अनुमानहेतुभूता व्याप्तिः। अवश्याश्रयणीयसम्बन्धविशेषमूलकेनानुमानेनैव विवक्षितप्रतीतिनिर्वाहात् व्यञ्जना नाश्रयणीया।

एवं चमत्कारानुभवोऽपि सर्वत्र मानसः। चमत्कारजनकबोधो मानस इति स्वीकारे न गौरवम्। अतः व्यञ्जनाया अङ्गीकारो नावश्यकः। मानसस्य चमत्कारजनकत्वकल्पनायां गौरवं भवतीत्यारोपो न युज्यते। व्यञ्जनाङ्गीकर्तृपक्षेऽपि व्यञ्जनाख्याया अतिरिक्तायाः वृत्तेः कल्पनं, अज्ञाताया एव तस्याः शाब्दबोधकारणताकल्पनं चावश्यकम्। एवं शाब्दबोधं प्रति पदवृत्तिज्ञानजन्या पदार्थोपस्थितिर्हेतुः। तत्र व्यङ्ग्यार्थस्य पदवृत्तिज्ञानजन्योपस्थितिविरहेण व्यभिचारवारणाय पदार्थोपस्थितिनिष्ठायां कारणतायां कार्यतावच्छेदककोटौ व्यञ्जनावृत्त्यजन्यत्वं निवेशनीयम्। व्यङ्ग्यार्थबोधे तात्पर्यज्ञानस्य कारणत्वाभावात् तात्पर्यज्ञानकार्यतावच्छेदककोटावपि व्यञ्जनावृत्त्यजन्यत्वं निवेशनीयमिति गौरवम्। एतादृशगौरवापेक्षया मानसज्ञानस्य चमत्कारजनकत्वकल्पनं लघ्वेव। तस्माद् मुख्यजघन्यभेदेन पदतदर्थसम्बन्धरूपा वृत्तिः द्विविधैव। इति।

नव्यवैयाकरणाः नागेशभट्टाः लघुमञ्जूषायां वृत्तिनिरूपणावसरे व्यञ्जनावृत्तिं निरूपयन्ति। अतस्तेषां व्यञ्जनावृत्तिरभिमतेति ज्ञातुं शक्नुमः।

[2] वेदन्तिनोऽपि व्यञ्जनानिराकरणे निर्भररहिताः।

---

1 गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयात् यत्र गतो भवान्॥"
इति पूर्णः श्लोकः।

2 यतः श्रीमधुसूदनसरस्वत्यः वेदान्तकल्पलतिकायां 'व्यञ्जनाख्या अपरा वृत्तिरित्यालङ्कारिकाः' इत्यादिना तन्मतमुपन्यस्य, 'तत्र तस्या अर्था-

नैयायिकैर्व्यञ्जना निरस्ना परन्तु 'तर्कसंग्रह'व्याख्याने नीलकण्ठीये टीकाकर्तारो नीलकण्ठमहाशयाः व्यञ्जनाविचारावसाने "यदि पुनरानुभाविकी लोकानां स्वरसवाही शब्दादमुमर्थं प्रत्येमीत्यनुभवस्तदा वैयञ्जनिकी वृत्तिः गीर्वाणगुरुणाप्यशक्यवारणेति व्यञ्जनावृत्तिसिद्धिर्निष्प्रत्यूहैवेति मन्तव्यम् ।" इति वदन्ति ।

एवं [1]'शक्तिवादमाधवीयविवृतिः व्यञ्जनाप्रस्तावे पक्षद्वयं निरूप्य पक्षयोरनयोर्युक्तता सुधीभिर्विभावनीयमिति ब्रूते' इति श्रीसुब्रह्मण्यशास्त्रिमहोदयाः शाब्दतरङ्गिण्यां व्यञ्जनानिरूपणावसाने, केषाञ्चन नैयायिकानां व्यञ्जनानिराकरणे नातीव तात्पर्यमिति सूचयन्ति ।

**अपराः पदवृत्तयः**

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति"रिति भरतसूत्रव्याख्यानावसरे, भट्टनायकमते अभिधाविलक्षणः भावकत्वभोजकत्वोभयरूपो व्यापारोऽस्ति शब्दस्येति काव्यप्रकाशे चतुर्थोल्लासे सूचना वर्तते । एतौ शब्दव्यापारौ काव्यनाट्ययोरेव । तत्र काव्यार्थबोधसमनन्तरमेव, भावकत्वव्यापारेण विभावादिरूपसीतादयो रामसम्बन्धिनी रतिश्च सीतात्वरामत्वसम्बन्धांशमपहाय सामान्यतः कामिनीत्वरतित्वादिनैवोपस्थाप्यते । भोजकत्वव्यापारेण तु साधारणीकृतविभावादिसहकृतेन सा रतिः सामाजिकैरास्वाद्यते ।

न्यायमञ्जरीकारेण जयन्तभट्टेन तु वाक्यार्थसंसर्गः तात्पर्यशक्त्या प्रतीयत इति स्वीक्रियते ।

परन्तु सर्वैरपि नैयायिकैः अनुमते पदवृत्ती द्वे एव । अभिधा लक्षणेति द्वे एव पदवृत्ती इति नैयायिकदर्शितः पन्थाः ॥

---

पत्तावन्तर्भावस्य व्यक्तिविवेके महिम्ना दर्शितत्वाद्' इत्यादिना दूषयित्वा पुनरन्ते यदि च नार्थापत्तावन्तर्भवतिर्हि अस्तु सापि वर्ता शब्दवृत्तिरिति न काप्यस्माकं क्षति'रिति उपसंहरन्ति । शा. त. (पञ्चमे तरङ्गे) पृष्ठं १५७

1 शा. त. पृष्ठम् ५४७.

# ॥ चतुर्थोऽध्यायः ॥

## वाक्यार्थज्ञानहेतवः ।

वक्त्रा वाक्ये उच्चारिते सति तस्य वाक्यस्य श्रवणानन्तरं श्रोतुः वाक्यार्थबोधो जायते । वक्त्रा उच्चारितस्य वाक्यस्य श्रवणे श्रोतुः यो बोधो जायते तस्य बोधस्योत्पत्यर्थं कानिचन घटकान्यपेक्षितानि । तानि घटकान्येव वाक्यार्थज्ञानहेतव इति पदेनोद्दिश्यन्ते ।

तर्कसंग्रहकाराः अन्नम्भट्टाः [1]'आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः'इत्यभिप्रयन्ति । त एव स्वेनैव विरचितायां तर्कसंग्रहव्याख्यायां 'तर्कसंग्रहदीपिका'यां आकाङ्क्षादीनां ज्ञानं वाक्यार्थज्ञानहेतुरिति तर्कसग्रहोक्तस्याशयस्य [2]स्फुटनं करोति । अतः आकाङ्क्षाज्ञानं योग्यताज्ञानं सन्निधिज्ञानञ्च वाक्यार्थज्ञानहेतुरिति फलति । [3]विश्वनाथास्तु—

"आसत्तिर्योग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ।
कारणं,........................... ॥"

इति कारिकया तात्पर्यज्ञानस्यापि वाक्यार्थज्ञानहेतुत्वं वदन्ति । अन्येऽपि बहवो नैयायिका तात्पर्यज्ञानस्य वाक्यार्थज्ञानहेतुत्वमङ्गीकुर्वन्ति । अतः आकाङ्क्षाज्ञानं, योग्यताज्ञान सन्निधिज्ञानम् अथवा आसत्तिज्ञानं तात्पर्यज्ञानञ्च वाक्यार्थज्ञानहेतव इति सर्वैरङ्गीकृतम् ।

उच्चारितस्य वाक्यस्यान्वयबोधजनकत्वं भवितव्यञ्चेत्, तादृशवाक्ये क्रियाकारकपदानि भवितव्यानि ; तेषां पदानामर्थस्य

---

1 त. सं. पृष्टं ६६-६७.

2 "आकाङ्क्षेति ॥ आकाङ्क्षादिज्ञानमित्यर्थः । अन्यथा आकाङ्क्षादिभ्रमाद् शाब्दभ्रमो न स्याद् ।" त. सं. दी. . ३३९(पृ)

3 न्या. सि. मु. पृष्ठं ६०२. (कारिका २-८ उत्तरार्धम्)

परस्परमन्वये बाधः न भविता, उच्चरन्ति पदानि अविलम्बेनै-वोच्चारयितव्यानि च।

यद्यपि पदसमूहो वाक्यमिति वाक्यनिर्वचनं, तथापि येषां केषाञ्चिद् पदानां समूहस्य वाक्यत्वं न सम्भवति। "गौरश्वः पुरुषो हस्ती"ती पदसमूहो भवति, परन्तु न वाक्यम्, अन्वयाननु-भावकत्वाद्। परन्तु 'घटमानय' 'पुस्तकं पश्य' 'अश्वमारोह' इत्यादीनि, 'देवदत्तः तण्डुलं पचति', 'चैत्रेण तण्डुलः पच्यते' इत्यादीनि च वाक्यानि भवन्ति, अन्वयानुभावकत्वाद्। एव 'घटम्' इति पद 'घट' इति प्रातिपदिकेन 'अम्' इति द्वितीयैक-वचनात्मकप्रत्यययुक्तं भवति। 'घटम्' इत्यस्य 'घटकर्मकम्' इति 'घटीया कर्मता' इति वार्थः। 'आनये'ति पद 'आङ्पूर्वकणीञ्धातोः लोटि मध्यमपुरुषैकवचनम्। आनयनं कर्तव्यमित्यर्थः। परन्तु घटकर्मकमानयनं कर्तव्यमित्यर्थबोधे जननीये 'घटकर्मकमानय' इति, 'घटमानयनं कृति'रिति वा प्रयोगो न साधुः। 'घटमानय' इत्येव प्रयोक्तव्यम्।

'वह्निना सिञ्चती'ति वाक्ये क्रियापदं कारकपदञ्च वर्तते। अत्र सिच्धात्वर्थसेचनक्रियायां वह्नेः करणत्वं प्रतिपाद्यते। परन्तु सेचने वह्निकरणकत्वं बाधितम्। सेचनस्य जलकरणकत्वाद्। अतोऽर्थस्य बाधितत्वाद् अत्र वाक्यार्थबोधो न भवति।

'घटमानये'ति वाक्याद् श्रोतुः घटकर्मकानयनस्य बोधो भवि-तुमिच्छति चेद् वाक्यघटके 'घटम्' 'आनय' इति पदे विलम्बं विना उच्चारणीये। 'घट'मित्युक्त्वा एकस्मिन् यामे अतीते सति 'आनये' त्युच्यते चेद् उद्दिष्टस्य वाक्यार्थस्य बोधो न भविष्यति।

नानार्थकपदप्रयोगस्थले कमर्थमुद्दिश्य वक्त्रा अत्र पदप्रयोगः कृत इति ज्ञात एव शाब्दबोधो भविष्यति। अतः वक्तुस्तात्पर्यं किम् इति श्रोत्रा ग्रहीतव्यम्। अन्यथा वक्तुद्दिष्टः वाक्यार्थबोधः श्रोतुर्न स्याद्। अतः वाक्यार्थबोधं प्रति तात्पर्यज्ञानमपि हेतुः।

तथा चाकाङ्क्षादीनां ज्ञानं वाक्यार्थबोधे कारणं भवति।

**नैयायिकमते आकाङ्क्षालक्षणम् ।**

'पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा' इत्यन्नंभट्टः तर्कसंग्रहे आकाङ्क्षालक्षणं वदति । जगन्नाथशास्त्रिमहोदयः स्वेन रचितायां तर्कसंग्रहटीकायां 'निरुक्तौ' उपर्युक्तां तर्कसंग्रह-पंक्तिमेवं विशदयति — 'यत्पदस्य यत्पदव्यतिरेकप्रयुक्तं = यत्पदा-भावप्रयोज्यम् अन्वयाननुभावकत्वं, तत्पदस्य तत्पदेन सहाकाङ्क्षेत्यर्थः। यथा गामानयेत्यादिवाक्यघटकीभूतगोपदस्याम्पदव्यतिरेकप्रयुक्त-मन्वयाननुभावकत्वं वर्तते । न ह्यम्पदव्यतिरेके सति गोपदमन्वय-मनुभावयति, 'गो आनये'त्यत्र शाब्दबोधानुदयात् । अतः गोपदस्याम्पदेन सहाकाङ्क्षा' । इति

न्यायबोधिन्यां गोवर्धनमिश्रः, वाक्यवृत्तौ मेरुशास्त्रिश्चैवंविधं प्रत्यये प्रकृत्युत्तरत्वरूपस्यैवाकाङ्क्षात्वं वदतः । परन्तु 'आकाङ्-क्षादिरहितं वाक्यमप्रमाणम् । यथा 'गौरश्वः पुरुषो हस्ती'ति वाक्यं न प्रमाणं आकाङ्क्षाविरहात् ।' इति वदतस्तर्कसंग्रहकारस्य क्रियाकारकपदानां सन्निधानमाकाङ्क्षेत्येव आकाङ्क्षालक्षणकथने तात्पर्यमिति प्रतिभाति ।

श्रीविश्वनाथपञ्चाननः,

'[1]यत्पदेन विना यस्याननुभावकता भवेत् ।
आकाङ्क्षा........................ ।।'

इति कारिकाभागेनाकाङ्क्षालक्षणमुक्त्वा, मुक्तावल्यां 'येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षे-त्यर्थ' इति तां कारिकां व्याकरोति । तदनन्तरं 'वस्तुतस्तु क्रिया-कारकपदानां सन्निधानमासत्या चरितार्थम् । परन्तु घटकर्मता-बोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं कारण'मिति प्रत्यये प्रकृत्युत्तरत्वरूपत्वमाकाङ्क्षेति मतमङ्गीकरोति ।

'तत्पदविशिष्टत्वं तत्पदस्येत्यर्थ' इति पङ्क्त्या दिनकर्यां आ-काङ्क्षालक्षणं वदति । शक्तं पदमिति मतमनुसृत्य न्यायमते प्रकृतेः,

---

1 का. मु. (कारिका) ८४

प्रत्ययस्य च पदसंज्ञा वर्तते। अतः तत्पदस्य तत्पदविशिष्टत्वरूप-लक्षणं प्रत्यये प्रकृत्युत्तरत्वरूपमेव।

पदस्य पदवैशिष्ट्यञ्च अव्यवहितपूर्ववृत्तित्वाव्यवहितोत्तरवृत्तित्वान्यतरसम्बन्धेन। घटमानयेत्यत्र घटपदं विनाम्पदस्यान्वयाननुभावकत्वाद् घटपदविशिष्टत्वमम्पदे आकाङ्क्षा। 'घटः कर्मत्वमानयनं कृति'रित्यादौ कर्मत्वपदे घटपदवत्त्वन्तु नाकाङ्क्षा, कर्मत्वपदे घटीया कर्मतेति शाब्दबोधाननुभावकत्वस्य घटपदविरहाप्रयुक्तत्वाद्।

अत्र यद्यपि, येन पदेन विना यत्पदस्य यादृशशाब्दबोधाजनकत्व अव्यवहितपूर्ववृत्तित्वाव्यवहितोत्तरवृत्तित्वान्यतरसम्बन्धेन तत्पदविशिष्टतत्पदत्वं तादृशशाब्दबोधप्रयोजकाकाङ्क्षेति, मुक्तावल्युक्तदिशा आकाङ्क्षालक्षणं वक्तव्यं, तथापि दिनकर्युक्त्यनुसारेण अव्यवहितपूर्ववृत्तित्वाव्यवहितोत्तरवृत्तित्वान्यतरसम्बन्धेन तत्पदविशिष्टतत्पदत्वमाकाङ्क्षेत्याकाङ्क्षालक्षणम्। येन पदेन विना यत्पदस्य यादृशशाब्दबोधाजनकत्व'मित्यंशो नाकाङ्क्षास्वरूपान्तर्गतम्। तदुक्तिस्तु अम्पदघटपदादीनां विशिष्य ज्ञानार्थम्। अम्पदे घटपदाव्यवहितोत्तरत्वज्ञानसत्त्वे शाब्दबोधो जायते। अत्राम्पदं घटपदं विना शाब्दबोधाजनकम् इति ज्ञानं नापेक्षितम्।

परन्तु जनितान्वयबोधात् वाक्याद् पुनरन्वयबोधवारणाय अन्वयाननुभावकत्वांशस्यापि आकाङ्क्षास्वरूपान्तर्गतत्वं स्वीकर्तुमुचितम्। शाब्दबोधे तस्य स्वरूपत एवोपयोगः। तत्पदजन्यशाब्दबोधं प्रति तत्पदजन्यशाब्दबोधाभावो हेतुः। परन्त्वेवं स्वीकारे 'घटमानये'ति वाक्याद् प्रथमं 'घटीया कर्मते'ति खण्डवाक्यार्थबोधानन्तरं 'घटकर्मकमानयनं मदिष्टसाधन'मिति महावाक्यार्थबोधो न स्याद् तत्पदजन्यशाब्दबोधाभावरूपाकाङ्क्षाया अभावादिति ना शङ्कनीयम्। 'तत्पदजन्यशाब्दबोधाभाव इति पदेन तात्पर्यविषयमहावाक्यार्थबोधाभावस्यैव विवक्षितत्वाद्। [1]'खले कपोतन्यायेन शाब्दबोधो भवतीति मते तु न काप्यनुपपत्तिः, पूर्वमवान्तरवाक्या-

---

1 वृद्धा युवानः शिशवः कपोता खले यथामी युगपत्पतन्ति।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति॥

र्थानुभवाभावाद्। एकपदे अपरपदवत्त्वांशश्च ज्ञात एवोपयुज्यते। अम्पदे अव्यवहितोत्तरत्वसम्बन्धेन घटपदविशिष्टत्वे सत्यापि, तदज्ञाने शाब्दबोधो न स्याद्।

**क्रियाकारकपदयोर्नाकाङ्क्षा**

तत्पदस्य तत्पदवैशिष्ट्यमाकाङ्क्षेति, वैशिष्ट्यञ्चाव्यवहितपूर्ववृत्तित्वाव्यवहितोत्तरवृत्तित्वान्यतरसम्बन्धेनेति चोक्तम्। प्राचीनमते पदयोरव्यवधानमासत्तिः। अतोऽव्यवधानांशस्यासत्त्यैव लाभः। उत्तरपूर्ववृत्तित्वान्यतरस्य क्रियाकारकपदेष्वनुपयोगः। 'चैत्रः पचति' 'पचति चैत्र' इति वाक्यद्वयादपि उक्ताकाङ्क्षाविरहेऽपि समानाकारकशाब्दबोधो जायते। नवीनमते तु पदज्ञानयोरव्यवधानमासत्तिः। न तु पदयोरव्यवधानम्। एवञ्चैतन्मतेऽव्यवधानांशस्यासत्या चरितार्थत्वाभावेऽपि 'चैत्रः पचति पचति चैत्र' इत्यादौ नाकाङ्क्षाज्ञानस्योपयोगः। क्रियाकारकपदज्ञानयोरव्यवधानेन। शाब्दबोधनिर्वाहकं क्रियाकारकपदयोरव्यवधानम्। क्रियाकारकपदयोश्च पौर्वापर्यरूपाव्यवधाने न नियमः। अतः उभयविधेऽपि मते क्रियाकारकपदयोः आकाङ्क्षा नास्ति। प्रकृतिप्रत्ययोरेवाकाङ्क्षा। अत्राप्यव्यवधानांशस्यासत्त्यैव लाभात् प्रत्यये प्रकृत्युत्तरत्वं भवत्याकाङ्क्षा।

परन्तु, अत्र सामान्यत एवं कार्यकारणभावे 'घटः कर्मत्वमानयनं कृति'रित्यादितोऽपि शाब्दबोधापत्तिः, तत्रापि प्रकृत्युत्तरप्रथमादिसत्त्वाद्। अतोऽम्पदत्वावच्छिन्नविशेष्यतानिरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नघटपदत्वावच्छिन्नप्रकारताशालिनिश्चयत्वादिना प्रत्येकमेव कारणत्वं वाच्यम्। बहुगुडमित्यादौ गुडपदाव्यवहितपूर्ववृत्तिबहुच्प्रत्ययत्वादिरूपाकाङ्क्षाज्ञानस्यैव हेतुत्वम्।

'अयमेति पुत्रो राज्ञः पुरुषोपसार्यता'मिति वाक्ये अजनितान्वयबोधदशायां राजपदस्य पुत्रपदेनेव पुरुषपदेनाप्याकाङ्क्षासत्त्वाद् 'राज्ञः पुरुष' इत्यन्वयबोधः स्यादिति तु नाशङ्कनीयम्। तत्र तात्पर्याभावाद्। वक्तुः पुत्रराज्ञोः सम्बन्धबोधेच्छायां पुत्रेण सहैव राजपदार्थस्यान्वयबोधः। यदा तु वक्तुः पुरुषराज्ञोः सम्बन्धबोधेच्छा, तदा पुरुषराज्ञोः अन्वयबोधो भवत्येव। तथा चेदमायात,

यत् राज्ञः कदाचित् पुत्रेण, कदाचिद् पुरुषेण, सहान्वयबोध इत्यत्र तात्पर्यमेव नियामकं, न त्वाकाङ्क्षेति। यत्र तु पुरुषे पुत्रे च राजसम्बन्धबोधो भवत्विति वक्तुस्तात्पर्यज्ञानं, 'राज्ञ इति पदं पुत्रपदार्थेनान्वयबोधेच्छयोच्चरितं, न तु पुरुषपदार्थेनान्वयबोधेच्छयोच्चरितम्' इति च ज्ञानं श्रोतुर्वर्तते तदा 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इति वाक्ये राज्ञः पुरुष इत्यन्वयबोधः स्यादिति नापादनीयम्[1]। यत्पदं विनेत्यस्य समभिव्याहृतयत्पदं विनेत्यर्थकत्वात्। 'इदं पदमेतत्पदेन सहान्वयबोधं जनयत्विति पदतात्पर्यमेव समभिव्याहारः। अत्र 'राज्ञ इति पदं पुत्रपदेन सहान्वयबोधं जनयतु' इत्येव वक्तुः तात्पर्यं, न तु राज्ञ इति पदं पुरुषपदेन सहान्वयबोधं जनयत्विति।

समभिव्याहारस्य स्वातन्त्र्येणैव शाब्दबोधे हेतुता, न त्वाकाङ्क्षाशरीरप्रविष्टत्वेनेति केचित्।

नवीनास्तु पदतात्पर्यरूपस्य समभिव्याहारस्य हेतुत्वं नाङ्गीकुर्वन्ति, राजपदं पुत्रविषयकराजसंसर्गकप्रतीतीच्छयोच्चरितमित्याकारकार्थतात्पर्यज्ञानस्य हेतुत्वादेवातिप्रसङ्गवारणाद्। अर्थतात्पर्यज्ञानसत्त्वे पदतात्पर्यरूपसमभिव्याहारस्य संशये व्यतिरेकनिश्चये वा शाब्दबोधो भवत्येवेत्याहुः।

वस्तुनस्तु, येन पदेन विना यत्पदस्यान्वयाननुभावकत्वम्, अव्यवहितपूर्ववृत्तित्वाव्यवहितोत्तरवृत्तित्वान्यतरसम्बन्धेन तत्पदे तत्पदवत्त्वमाकाङ्क्षा इत्याकाङ्क्षालक्षणे तत्पदं तत्पदज्ञानपरम्। मौनिश्लोकानुरोधात्। मौनिश्लोके पदं नास्ति। लिप्यादिनानुमितस्य पदस्य ज्ञानमेवास्ति। तत्रापि शाब्दबोधो जायत इत्यतस्तत्राप्याकाङ्क्षा वर्तत इति वक्तव्यम्। येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तत्पदज्ञाने तत्पदज्ञानवत्वमाकाङ्क्षेति लक्षणकथने तु मौनिश्लोकेऽप्यनुपपत्त्यभावः।

---

1 निरुक्ताकाङ्क्षायाः सत्वाद्।

अत एवाध्याहृतपदेनापि आकाङ्क्षानिर्वाहः।

आ[1]काङ्क्षा च न केवलं प्रकृतिप्रत्यययोः पौर्वापर्यम्, अभेदसंसर्गकनीलादिप्रकारकघटादिविशेष्यकबोधे नीलादिपदाव्यवहितोत्तर घटादिपदत्वं, नीलादिघटादिपदयोस्समानविभक्तिकत्वं वा। एवं कर्तृत्वाद्यर्थकषष्ठ्या शाब्दबोधजनने कृदन्तपदसमभिव्याहारोऽप्याकाङ्क्षा। एवमाख्यातयोः भावकर्मत्वयोर्विवक्षायां यगात्मनेपदसमभिव्याहारोऽप्याकाङ्क्षा।

'वस्तुत आकाङ्क्षाज्ञानस्य शाब्दबोधं प्रति हेतुत्वं किमर्थम्? 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यत्र राजपदार्थस्य पुरुषपदार्थेनान्वयाभावो नाकाङ्क्षाविरहाद् परन्तु तात्पर्याभावाद्। 'घटः कर्मत्वमानयनं कृति'रित्यादौ शाब्दबोधाभावो स्वरूपायोग्यत्वाद्, न त्वाकाङ्क्षाभावाद् जनितान्वयबोधे च वाक्ये परोक्षज्ञानत्वावच्छेदेनानुमितौ सिद्धेः प्रतिबन्धकत्वकल्पनाद् अन्वयानुभवस्यैव प्रतिबन्धकत्वाद्, अन्वयाननुभवोपपत्तेः'। इति चेद्, न। सिद्धेः प्रतिबन्धकत्वं न साक्षाद्, ग्राह्याभावानवगाहित्वात्। ततश्च शाब्दज्ञानजनकीभूतान्वयानुभवाभावरूपाकाङ्क्षाज्ञानविघटकतयैव प्रतिबन्धकत्वं वाच्यमित्याकाङ्क्षाज्ञानस्य हेतुत्वमङ्गीकार्यम्। सिद्धौ जातायामपि तदनिश्येन सिद्ध्यभावज्ञानसम्भवाद्, सिद्धेः कथमाकाङ्क्षाज्ञानप्रतिबन्धकत्वमिति चेद् — योग्यानामात्मविशेषगुणानां स्वरूपसतां स्वविषयसंशयविपर्ययविरोधित्वाद्। यथानुमितौ सिद्ध्यभावरूपा पक्षता स्वरूपसत्येव हेतुः, तथा शाब्दसिद्ध्यभावरूपाकाङ्क्षापि स्वरूपसत्येव हेतुः। आकाङ्क्षाभ्रमात् शाब्दज्ञानानुपपत्तिरिति चेद् [2]इष्टापत्तिः।

## वेदान्तिमतम्

वेदान्तिमते 'पदोपस्थितयोरन्वयप्रतियोग्यनुयोगिनोः [3]परस्परजिज्ञासाविषयत्वयोग्यतैवाकाङ्क्षा' इति आकाङ्क्षालक्षणं वदन्ति।

---

1 सुबोधिनी। 2 राजचूडामणिमखी मणिदर्पणे।

3 'परस्परजिज्ञासाविषययोग्यत्वमाकाङ्क्षा'

वे. प. (धर्मराजाध्वरीन्द्रकृता)

'घटमानये'त्यादौ घटपदाम्पदोपस्थितयोः घटत्वकर्मत्वाद्योः कर्मत्वानयनाद्योश्च परस्परजिज्ञासाविषयत्वयोग्यता वर्तते ।

घटपदोत्तरद्वितीयाविभक्त्यर्थकर्मत्वज्ञाने जाते कर्मत्वान्वयिनं प्रातिपदिकार्थं, प्रातिपदिकार्थान्वयि कर्मत्वम्, एतत्प्रातिपदिकार्थान्वयिनीं क्रियाम्, एतत्क्रियान्वयिकारकं वा जानीयामित्याकारिका जिज्ञासा जायते । सा च जिज्ञासा न सर्वत्र शाब्दबोधस्थले नियता, क्वचिदजिज्ञासितानामप्यर्थानां शाब्दबोधो जायत एव, अतश्च जिज्ञासाविषयत्वयोग्यत्वपर्यन्तानुधावनम् ।

वस्तुतस्तु तत्तद्वाक्यजन्यबोधेच्छाविरहविशिष्टतत्तद्वाक्यजन्यबोधाभावस्यैवाकाङ्क्षात्वम्, तस्या एव चाकाङ्क्षाया स्वरूपत एव कारणत्वम् । इति ।।

**नैयायिकैः वेदान्तिमततिरस्कारः ।**

नैयायिकास्तु — आकाङ्क्षाज्ञानस्यैव शाब्दबोधकारणत्वाद् तस्य स्वरूपतः कारणत्वं न सम्भवति । किञ्च तस्याः अभावात्मकत्वे उत्थितोत्थाप्याकाङ्क्षयोरुत्कर्षापकर्षौ न स्यातामिति हेतोः वेदान्ति मतं नाङ्गीकुर्वन्ति ।

प्राभाकरास्तु —

यत्किञ्चित्पदार्थोपस्थितिसत्त्वे तत्सहकृतपदजन्यपदार्थस्मरणाद् शाब्दबोधो जायते । अवान्तरवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधे अवान्तरवाक्यार्थस्मरणं कारणं, न तु समूहालम्बनस्मृतिः । शाब्दबोधं प्रति पदार्थोपस्थितित्वेनैव हेतुत्वं, न तु पदजन्यपदार्थोपस्थितित्वेन । 'द्वारम्' इत्यादौ न 'पिधेही'ति पदाध्याहारः किन्तु अर्थाध्याहार एव । प्रत्यक्षादिना उपस्थितानां पदार्थानां सति तात्पर्यज्ञाने शाब्दबोधो इष्ट एव । अतः शाब्दबोधं प्रति पदार्थोपस्थितित्वेन हेतुत्वे न दोषः । द्वारकर्मकपिधानानुकूलकृतिबोधे 'द्वारम्' इत्यानुपूर्वीज्ञानस्य 'पिधेहि' इत्यानुपूर्वीज्ञानस्य च हेतुत्वस्वीकाराद् न 'द्वारम् कर्मत्वं पिधानं कृति'रिति वाक्याच्छाब्दबोधः ।

प्रतिपत्तुर्जिज्ञासा एवाकाङ्क्षा। सा च पुरुषनिष्ठैव। 'द्वार' मित्येकपदप्रयोगस्थले द्वारकर्मत्वान्वयि किमिति जिज्ञासायां पिधान-रूपस्यार्थस्याध्याहारः।

अन्विताभिधानानुपपत्तिः अर्थाध्याहारेणैव शाम्यति। अतोऽप्यत्र पदाध्याहारस्यावश्यकता नास्ति। दिवाभुञ्जानो देवदत्तः पीन इति वाक्ये अनेकपदप्रयोगेऽपि अभिहितोऽर्थो न शाब्दबोधाय पर्याप्तः। अत्र च रात्रिभोजनस्य जिज्ञासायां रात्रिभोजनरूपार्थाध्याहारे 'दिवाभुञ्जानः पीनो देवदत्तो रात्रिभोजनवानि'ति बोधो जायते।

'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामि'त्यत्र राजपुरुषस्य पुत्रा पसर्पणे निराकाङ्क्षत्वाद् 'राज्ञ' इति पदान्वयि किमिति जिज्ञा-सायां तात्पर्यज्ञानबलाद् पुत्रपदस्य सम्बन्धो ज्ञायते। अतश्च यथा अर्थविषयिणी जिज्ञासा शाब्दबोधे कारणं, तथा पदविष-यिण्यपि। इति वदन्ति।

वृत्या पदजन्यपदार्थोपस्थितेः शाब्दबोधं प्रति हेतुत्वं स्वीकुर्व-न्तो नैयायिकाः पदाध्याहारवादिनः। 'स्पृहेरीप्सित' (२-४-३३) इति सूत्रेण स्पृहयतियोगे कर्मत्वार्थकचतुर्थी विधीयते। अतः पुष्पेभ्य इति चतुर्थ्यन्तप्रयोगे स्पृहयतीति पदाध्याहारं विना बोधो नोपपद्यते।

मुक्तावलीव्याख्यायां [1]दिनकर्यान्तु अर्थाध्याहारपक्ष एवोचित इति कथनं वर्तते।

**योग्यता (नैयायिकमते)।**

[2]'पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता'। इति श्रीविश्व-नाथपञ्चाननः योग्यतास्वरूपं निर्वक्ति। किन्तु स्वस्मिन् स्वाधि-

---

1 अस्त्वेवं रीत्या क्वचित् पदाध्याहारः तावतापि तज्जन्यपदार्थो-पस्थितित्वेन न शाब्दबोधहेतुत्वं, लाघवेन पदार्थोपस्थितित्वस्यैव जनकता-वच्छेदकत्वाद्, तथा च द्वारमित्यादौ कथञ्चिदुपस्थितस्य पिधानादेर्बोधे बाध-काभावाद् अर्थाध्याहारपक्ष एवोचित इति। न्या. सि. मु. (दि) पृष्ठम् ३०६

2 न्या. सि. मु. (कारिका - ५३ उत्तरार्धम्)

करणत्वाभावाद् तत्तत्पदार्थे तत्तत्पदार्थवत्त्वं योग्यतेत्यर्थकथनमसङ्गतम्। अतः स मुक्तावल्याम् 'एकपदार्थे अपरपदार्थसम्बन्धो योग्यतेत्यर्थं' इति कारिकायाः आशयं व्यनक्ति। योग्यतायाः ज्ञानं शाब्दबोधे कारणम्। 'वह्निना सिञ्चती'त्यत्र योग्यताज्ञानाभावाद् न शाब्द-बोधः।

एकपदार्थानुयोगिकापरपदार्थप्रतियोगिकसंसर्गो वाक्यार्थः। वाक्यार्थश्चापूर्वः। अतः वाक्यार्थबोधात् पूर्वं एकपदार्थे अपरपदार्थ-सम्बन्धरूपाया योग्यतायाः ज्ञानं कारणमिति वक्तु न युक्तमित्याशङ्का भवेद्। परन्तु साशङ्का नैव युक्ता। यतः शाब्दबोधस्य प्रमारूपतया योग्यताज्ञानस्य संशयनिश्चयसाधारणज्ञानत्वेन कारणतया च शाब्द-बोधात्पूर्वं संशयात्मकस्य योग्यताज्ञानस्य सद्भावे न काचित् क्षतिः। क्वचित् 'भूतले घट' इति प्रात्यक्षिकनिश्चयोत्तरभाविनि शाब्दबोधे च निश्चयात्मकस्य योग्यताज्ञानस्य सम्भवः। इदञ्च प्राचीनमतानुसारेण।

नवीनास्तु योग्यताज्ञानस्य शाब्दबोधं प्रति हेतुत्वं नाङ्गी-कुर्वन्ति। परन्त्वयोग्यतानिश्चयस्य शाब्दबोधं प्रति प्रतिबन्धकत्वाद् तदभावस्य प्रतिबन्धकाभावविधया हेतुत्वम्। तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वाद् शाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम्। अतः पृथक् हेतुत्व-कल्पनाप्रयुक्तगौरवं नास्ति।

तेषामयमाशयः— तद्वत्ताबुद्धिं प्रति तदभाववत्ताबुद्धिः प्रति-बन्धकः। तदभाववत्ताबुद्धिरेव बाधज्ञानम्। बाधज्ञाने सति तद्वत्ताबुद्धिर्नोदेति। परन्तु सर्वत्र बाधबुद्धेः तद्वत्ताबुद्धिं प्रति प्रतिबन्धकत्वन्नास्ति। 'घटाभाववद्भूतल'मिति बाधज्ञानसत्त्वेऽपि लौकिकसन्निकर्षवशाद् घटवद्भूतलमिति प्रत्यक्षं जायते। अतः लौकिकसन्निकर्षाजन्यतद्वत्ताबुद्धिं प्रत्येव बाधज्ञानस्य प्रतिबन्धकत्वं सिद्ध्यति। एवं 'शङ्खो न पीत' इति निश्चयदशायामपि पित्तादिदोषवशाद् 'शङ्खः पीत' इति बुद्धिरुदेति। अतः दोष-विशेषजन्यतद्वत्ताबुद्धिं प्रत्यपि बाधज्ञानस्य प्रतिबन्धकत्वन्नास्तीति ज्ञातुं शक्यते। तथा च लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिं

प्रति बाधज्ञानं प्रतिबन्धकम्। तथा च लौकिकसन्निकर्षाजन्यदोष-विशेषाजन्यतद्वत्ताबुद्धौ शाब्दबोधोऽपि घटकः। अयोग्यता च बाधरूपा। अतः अयोग्यताज्ञानस्य शाब्दबोधे प्रतिबन्धकत्वकल्पन-मधिकन्न। प्रतिबन्धकाभावविधया चायोग्यतानिश्चयाभावस्य हेतुत्वम्। अतः योग्यताज्ञानस्य शाब्दबोधहेतुत्वस्वीकारो नावश्यक इति।

परन्तु नवीनैरुक्तरीत्या लौकिकसन्निकर्षाजन्यदोषविशेषाजन्य-तज्ज्ञानमात्रं प्रति तदभाववत्ताबुद्धेः सामान्यतः प्रतिबध्यप्रतिबन्धकभावो वर्तत इति वक्तुन्न शक्यते। यतः 'घटाभाववद्भूतल'मिति निश्चय-दशायामपि 'घटवद्भूतल'मिति चाक्षुषं मे जायता'मितीच्छाबलेन ज्ञानलक्षणाप्रत्यासत्त्या घटवद्भूतलमिति ज्ञानमुत्पद्यते। अत्र घटाभाव-प्रकारकभूतलविशेष्यकबाधज्ञानदशायां लौकिकसन्निकर्षाजन्यदोषवि-शेषाजन्यं तद्वत्ताज्ञानं जातम्। अतो व्यभिचारवारणाय प्रत्यक्षत्वावच्छिन्नं प्रति प्रत्यक्षेच्छाविरहविशिष्टबाधज्ञानं प्रतिबन्धकमिति विशिष्यैव प्रतिबध्यप्रतिबन्धकभावो वक्तव्यः। एवञ्च शाब्दत्वावच्छिन्नं प्रत्ययोग्यतानिश्चयस्य प्रतिबन्धकत्वं स्वीकृत्य तदभावस्य हेतुत्व-कल्पनापेक्षया योग्यताज्ञानस्य हेतुत्वकल्पनमेवोचितमिति।

न च प्रत्यक्षान्यतद्वत्ताबुद्धित्वावच्छिन्नं प्रति तदभावनिश्चयस्य प्रतिबन्धकत्वस्वीकारे न पृथक् प्रतिबन्धकत्वकल्पनाप्रयुक्तगौरवमिति वाच्यम्। अत्र प्रतिबध्यतावच्छेदककुक्षौ लौकिकसन्निकर्षाजन्यत्वस्य दोषविशेषाजन्यत्वस्य च विरहाद् लाघवे सत्यपि प्रत्यक्षान्यत्वस्य बुद्धित्वस्य च विशेष्यविशेषणभावे विनिगमनाविरहाद् प्रत्यक्षान्य-त्वविशिष्टबुद्धित्वं, बुद्धित्वविशिष्टप्रत्यक्षान्यत्वञ्चेति द्वयस्य प्रतिबध्य-तावच्छेदकत्वकल्पने गौरवम्। अतः तत्प्रकारकशाब्दत्वावच्छिन्नं प्रति तद्विधेयकानुमितिं प्रति च तदभाववत्तानिश्चयस्य पृथक् प्रतिबन्धकत्वं वाच्यम्। अतोऽयोग्यतानिश्चयस्य प्रतिबन्धकत्वं स्वीकृत्य तदभावस्य शाब्दबोधहेतुतास्वीकारापेक्षया योग्यताज्ञानस्य शाब्दबोधहेतुत्वं कल्पयितुमेवोचितम्।

अयोग्यतानिश्चयस्य प्रतिबन्धकत्वं स्वीकृत्य तदभावस्य शाब्दबोधं प्रति हेतुत्वं वदन्तो नव्यास्त्वेवमाह—

यत्र संशयनिश्चयसाधारणं ज्ञानं हेतुस्तत्राप्रामाण्यनिश्चय एव कारणताविघटकः। यत्र तु निश्चयात्मकं ज्ञानं हेतुस्तत्राप्रामाण्यज्ञानं संशयनिश्चयसाधारणमेव कारणताविघटकम्। अतः संशयनिश्चयसाधरणस्य योग्यताज्ञानस्य हेतुत्वं वदताम्मते अप्रामाण्यनिश्चयस्यैव कारणताविघटकत्वम्।

तथा हि – 'घटवद्भूतल'मित्यत्र संयोगेन घटप्रकारकं भूतलविशेष्यकं योग्यताज्ञानम्। अत्राप्रामाण्यसन्देहस्त्वित्थम् — 'इदं ज्ञानं संयोगेन घटाभाववति घटप्रकारकं न वे'ति। अप्रामाण्यनिश्चयाकारस्तु 'इदं ज्ञानं संयोगेन घटाभाववति घटप्रकारक'मिति। योग्यताज्ञानदशायाम् अप्रामाण्यसंशयोत्पत्तावपि, अप्रामाण्यसन्देहेन विषयसन्देहस्यैव जननाद् 'भूतलं घटवन्न वे'ति ज्ञानजननेऽपि तस्य संशयात्मकयोग्यताज्ञानत्वेन तस्य शाब्दबोधे हेतुत्वमेव। अतोऽत्र 'भूतलविशेष्यकं घटप्रकारकं योग्यताज्ञानं घटाभाववति घटप्रकारक'मित्यप्रामाण्यनिश्चयैव योग्यताज्ञाननिष्ठकारणताविघटकत्वम्। एवञ्चाप्रामाण्यनिश्चयानास्कन्दितयोग्यताज्ञानस्यैव शाब्दबोधं प्रति हेतुत्वमिति वक्तव्यम्। तथा च कारणतावच्छेदककोटौ निश्चयाभाव एव निवेशनीय इति निश्चयत्वांशप्रयुक्तगौरवम्।

अयोग्यतानिश्चयस्य प्रतिबन्धकत्वं बदताम्मते तु, अप्रामाण्यज्ञानाभावविशिष्टायोग्यतानिश्चयाभावस्यैव हेतुत्वमिति निश्चयत्वानिवेशप्रयुक्तलाघवं वर्तते।। इति।

परन्तु, वस्तुतः योग्यताज्ञाने अप्रामाण्यनिश्चयेऽपि शाब्दबोधो भवति। अत एव 'मुखं चन्द्र' इत्यादिरूपकस्थले शाब्दबोधः। 'मुखे चन्द्राभेदो ने'ति अप्रामाण्यनिश्चयसत्त्वाद् न चन्द्राहरणादौ प्रवृत्त्यापत्तिः। अतोऽप्रामाण्यज्ञानस्य प्रवृत्तिं प्रत्येव प्रतिबन्धकत्वं न तु शाब्दबोधं प्रति। अतः योग्यताज्ञाननिष्ठकारणतावच्छेदककोटौ अप्रामाण्यनिश्चयाभावविशिष्टत्वं न निवेशनीयम्। अतो न योग्यताज्ञानस्य शाब्दबोधं प्रति हेतुत्वं वदताम्मते निश्चयत्वांशप्रवेशनप्रयुक्तगौरवम्।

एवं यत्र यदभावनिश्चयः प्रतिबन्धकस्तत्र तदभावव्याप्यवत्तानिश्चयः, तदभावावच्छेदकत्वेन गृहीतो यो धर्मस्तन्निश्चयश्च प्रतिबन्धक इति तादृशनिश्चयाभावस्य कारणता अयोग्यत्वनिश्चयाभावस्य शाब्दबोध प्रति हेतुतावादिना कल्पनीया। योग्यताज्ञानस्य शाब्दबोधं प्रति हेतुतावादिना तु न कल्पनीया। तादृशान्यतमनिश्चयसत्त्वे योग्यताज्ञानरूपकारणविरहादेव शाब्दबोधवारणसम्भवाद्।

एवमयोग्यतानिश्चयाभावस्य शाब्दबोधकारणत्वपक्षे, 'एकपदार्थे अपरपदार्थप्रकारकज्ञानाभाववानह'मिति मानसप्रत्यक्षं प्रति भूतलं घटवदि'ति शब्दसामग्र्याः प्रतिबन्धकत्वं वक्तव्यम्। भिन्नविषयकशाब्दसामग्र्याः बलवत्त्वाद्। योग्यताज्ञानास्य शाब्दबोधहेतुत्वं वदताम्मते तु योग्यताज्ञानघटितशाब्दसामग्रीसत्त्वे, एकपदार्थे अपरपदार्थप्रकारकज्ञानसत्त्वाद् न एकपदार्थे अपरपदार्थप्रकारकज्ञानाभाववानहमिति मानसप्रत्यक्षं, सामग्र्यभावाद्। योग्यताज्ञानाभावे तु शाब्दसामग्र्यभावाद् तादृशमानसप्रत्यक्षे इष्टापत्तिः।

अथ एकपदार्थे अपरपदार्थप्रकारकज्ञानाभाववानहमिति मानसप्रत्यक्षस्य सामग्र्यां सत्यामपि चाक्षुषानुमित्यादिसामग्रीसत्त्वे मानसानुदयाद्, मानसप्रत्यक्षं प्रति सामान्यतः भिन्नविषयकज्ञानसामग्र्याः प्रतिबन्धकत्वकल्पनं योग्यताज्ञानकारणतावादिनां, अयोग्यतानिश्चयाभावस्य कारणतावादिनाञ्च द्वयोरपि तुल्यमिति, शाब्दसामग्र्याः योग्यताज्ञानाभावमानसप्रत्यक्षं प्रति प्रतिबन्धकत्वकल्पनाप्रयुक्तगौरवं नेति चेन्नाशाब्दसामग्रीप्रतिबन्धकतायां 'अशाब्दज्ञानं मे जायता'मितीच्छायाः उत्तेजकत्वानुरोधेन विशिष्य शाब्दसामग्रीत्वादिनैव प्रतिबन्धकत्वस्य वक्तव्यत्वाद्। योग्यताज्ञानस्य कारणतावादिमतेऽपि योग्यतां जानामी'ति मानसं प्रति प्रतिबन्धकत्वं कल्पनीयमिति साम्यमिति न च वाच्यम्। शाब्दबोधात् प्राक् कदाचिद् योग्यताज्ञानसम्भवाद् दर्शितप्रतिबन्धकत्वस्योभयवादिसिद्धत्वाद्। अतः अयोग्यतानिश्चयस्य प्रतिबन्धकत्वं स्वीकृत्य अयोग्यतानिश्चयाभावस्य शाब्दबोधं प्रति कारणत्वं वदताम्मते विभिन्नविषयकप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमित्यतो गौरवम्।

योग्यताज्ञानस्य हेतुतावादिमते तु गुरुभूतायाः शाब्दसामग्रीप्रतिबन्धकतायाः अकल्पनाप्रयुक्तं लाघवं वर्तत इति तदनुरोधेन योग्यताज्ञानस्य शाब्दबोधहेतुतासिद्धौ विशिष्टपरामर्शविलम्बेनानुमितिविलम्बवद् योग्यताज्ञानविलम्बेन शाब्दबोधविलम्बोऽप्यङ्गीकरणीय एव।

**नागेशमतम्**

शाब्दबोधं प्रति नायोग्यतानिश्चयरूपबाधज्ञानस्य प्रतिबन्धकत्वं, न वा अयोग्यतानिश्चयाभावस्य हेतुत्वम्। सत्यपि बाधनिश्चये [1]'एष वन्ध्यासुतो याति' 'वह्निना सिञ्चती'त्यादिवाक्याद् शाब्दबोधो भवत्येव। शब्दोऽनित्य इति बाधनिश्चये सति शब्दो नित्य इति यदा मीमांसको वदति तदा नैयायिकस्य शाब्दबोधो न भवति चेद् कथं वादकथा प्रवर्तेत? बाधनिश्चयकाले उक्तवाक्याद् शाब्दबोधो न जायते, परन्तु पदार्थस्मरणमेव जायते इति कथनमसङ्गतम्। तथा सति सर्वत्रैव पदार्थस्मरणेनैवोपपत्तौ शाब्दबोधोच्छेदापत्तिः।

प्रवृत्तिं प्रति विशिष्टज्ञानं कारणं भवति। अतः यत्र प्रवृत्तिस्तत्र विशिष्टज्ञानं वर्तत इत्यनुमातुं शक्यते। यत्र प्रवृत्त्यभावः तत्र न विशिष्टज्ञानम्। 'वह्निना सिञ्चती'त्यादौ प्रवृत्त्यभावाद् तत्र न शाब्दबोधात्मकविशिष्टज्ञानमिति वादस्तु न युक्तिसहम्।

यथा प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वं, तथा दुःखद्वेषादिकं प्रत्यपि विशिष्टज्ञानस्य हेतुत्वं, वर्तते। बाधनिश्चयस्य सत्त्वेऽपि मिथ्याभिशापादिविषयबोधजनकवाक्यैः दुःखादिदर्शनाद् योग्यताविरहितार्थबोधकवाक्यस्थलेऽपि शाब्दविशिष्टबोधो जायत एव। तथा च प्रवृत्तिसामर्थ्यादेव विशिष्टज्ञानं कल्पनीयमिति वादो निर्युक्तिकः। दुःखद्वेषादिकं प्रति विशिष्टज्ञानस्याहेतुत्वे 'मुखं चन्द्र'

1 एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः॥ इति पूर्णः श्लोकः
(प्रकाशवर्षकवेरिदम्)

इति वाक्यादिव मुखत्वमाश्रयः चन्द्रत्वमाश्रय इति वाक्यादपि चमत्कारापत्तिः। किञ्च क्वचित् वक्तृतात्पर्याभावात् दैववशाद् कलहसदृशवाक्यश्रवणादपि नैव दुःखं जायते। किञ्च रजते 'नेदं रजत'मिति भ्रमवतः पुरुषस्य ततो निवृत्तौ सत्यां केनचिदाप्तेन 'इदं रजतमेवे'ति प्रयुक्ते प्रवृत्तिर्दृश्यते। अत्र बाधनिश्चयकालेऽपि शाब्दबोधात् प्रवृत्तिर्जाता। अतः बाधनिश्चयस्य शाब्दबोधं प्रति प्रतिबन्धकत्वं सर्वथा निर्युक्तिकमेव। अतः शाब्दबोधं प्रत्ययोग्यतानिश्चयरूपबाधज्ञानस्य प्रतिबन्धकत्वकल्पनम्, अयोग्यतानिश्चयाभावस्य हेतुत्वकल्पनञ्चासमञ्जसमिति ।।

## आलङ्कारिकमतम्

शाब्दबोधं प्रति न योग्यताज्ञानं कारणं, न वा अयोग्यताबनिश्चयः प्रतिबन्धकः। ाधनिश्चयसत्त्वेऽपि 'मुखं चन्द्र' इत्यादितः शाब्दबोधोदयात्। तत्र पदार्थस्मरणमेव जायते, न तु शाब्दबोध इति चेद् सर्वत्रापि पदार्थस्मरणमेवास्तु शाब्दबोधो मास्तु इत्यापादयितुं शक्यते। अतः 'एष वन्ध्यासुतो याती'त्यादौ शाब्दबोधोऽस्त्येवेति वक्तव्यम्। प्रवृत्तिश्चाप्रामाण्यज्ञानशून्यज्ञानेनैव भवति। काव्यादिना बोधकाले रामादीनामभावेऽपि नाट्यनैपुण्येन अविद्यमानैरपि विभावादिभिर्नर्तके सीतादिविषयिणी अनुरागरूपा रामरतिर विद्यमानापि तस्मिन् स्थितेव प्रतीयमाना रसिकानां हृदये चमत्कारं समर्पयन्ती विभावादिभिस्सहैव रसपदमधिरोहति। यथा असत्यपि सर्पे सर्पतयावलोकिताद् रज्जुविशेषाद् भीरुदेति तथैवात्रापि। तथा च बाधनिश्चयसत्त्वेऽपि योग्यताज्ञानविरहेऽपि रामादिसम्बन्धि विशेषराहित्येन शाब्दबोधोदयेन न योग्यताज्ञानं कारणं, न वा अयोग्यतानिश्चयः प्रतिबन्धकः। इति।

## नैयायिकाः समाधत्ते

'न योग्यताज्ञानं कारणं, न वा अयोग्यतानिश्चयः प्रतिबन्धक' इत्युक्तिरसङ्गता। एवं सति, अयोग्यतवाक्यमेव नेति स्याद्। 'चन्द्रो मुख'मित्यादौ आलङ्कारिकाणां बोधे सत्यपि पामराणां बोधानुदयः। अतोऽत्र वासनाविशेषस्योत्तेजकत्वं वाच्यम्। तथा च

उत्तेजकाभावविशिष्टस्य बाधनिश्चयस्य प्रतिबन्धकत्वं प्रकल्प्य तदभावस्य शाब्दबोधे हेतुत्वं कल्पनीयम्। तत्तु गौरवावहम्। तदपेक्षया योग्यताज्ञानस्य कारणत्वकल्पनमेवोचितम्। 'चन्द्रो मुख'मिति रूपकस्थले चन्द्रपदस्य चन्द्रसदृशे लक्षणा। 'वन्ध्यासुतो याती'त्यत्र मानस एव बोधः।

नाट्यादीनां दर्शनकाले रत्यादीनामुत्पत्तिरभिव्यक्तिर्भुक्तिर्वा नैव जायते, परन्तु तत्रानुमितिरेव। रामोऽयं सीताविषयकरत्यादिमान् सीताद्यात्मकविभावादिसम्बन्धित्वाद्, यन्नैवं तन्नैवं, यथा चैत्र इति।

प्राभाकराणां मते योग्यत्वं नाम सम्बन्धार्हत्वम्। सम्बन्धार्हत्वञ्च सम्बन्धित्वेन दृष्टत्वादवगम्यते।

[1]भाट्टानां मते अन्वयप्रयोजकधर्मवत्त्वमेव योग्यत्वम्। पयसा सिञ्चतीत्यत्र सेकान्वयप्रयोजकधर्मस्य जलत्वस्य पयसि सत्त्वाद् योग्यता सङ्घटते। 'वह्निना सिञ्चती'त्यत्र सेकान्वयप्रयोजकजलत्वादिधर्मस्य वह्नावभावात् न तत्र योग्यता।

भाट्टचिन्तामणौ गागाभट्टाः 'एकपदार्थतावच्छेदके तात्पर्यविषयापरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावो वा योग्यते'ति अपरं योग्यतालक्षणमुक्त्वा, तदनन्तरं [2]'वस्तुतस्त्वि'त्यादिना नवीननैयायिकमतानुसारेण अयोग्यतानिश्चयस्य प्रतिबन्धकत्वं स्वीकृत्य तदभावस्य शाब्दबोधहेतुतां स्वीकुर्वन्ति॥

**तात्पर्यज्ञानम्। (नैयायिकमतम्)**

'वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्'। इति श्रीविश्वनाथपञ्चाननः कारिकावल्यां तात्पर्यस्य लक्षणं वदति। 'घटमानये

---

1 भा. चि. पृष्ठम् ५०

2 'वस्तुतस्तु न योग्यताज्ञानस्य कारणता किन्तु वह्निना सिञ्चेदित्यादौ बोधादर्शनेनायोग्यतानिश्चयः प्रतिबन्धकः'।

भा. चि. पृष्ठम् ५१

का. मु. (कारिका ८४ - उत्तरार्धम्)

त्यादौ कर्मत्वविशेष्यकाधेयतासंसर्गकघटप्रकारकप्रतीतीच्छा वक्तुस्तात्पर्यं, तादृशेच्छयोच्चरितमिदं वाक्य'मिति श्रोतुः तात्पर्यज्ञानं शाब्दबोधे कारणम्। 'इदं वाक्यं स्वप्रयोज्योच्चरितत्वसम्बन्धेन इच्छारूपतात्पर्यविशिष्ट'मिति ज्ञानाकारः। अत्रोच्चरितत्वमित्यस्य ज्ञापितमित्यर्थो बोध्यः, अन्यथा मौनिश्लोकाद् शाब्दबोधानुपपत्तेः।

'सैन्धवमानये'त्यतः कुत्रचिदश्वानयनस्य कुत्रचिद् लवणानयनस्य च बोधो भवति। वक्तुस्तात्पर्यं प्रकरणादिना ज्ञात्वैव तादृशबोधो जायते। एवं 'श्वेतो धावती'ति वाक्याद् कदाचिद् श्वेतवर्णविशिष्टो धावतीति बोधः, कदाचित्तु कुक्कुरः इतो धावतीति बोधः। तात्पर्यज्ञानस्य शाब्दबोधं प्रति हेतुत्वाभावे एतन्न युज्यते।

किञ्च तात्पर्यसंशये तात्पर्याभावनिश्चये च शाब्दबोधो न सम्भवति। अतः तात्पर्यसंशयः तात्पर्याभावनिश्चयश्च शाब्दबोधोत्पत्तिप्रतिबन्धकौ। अतस्ता[1]त्पर्यज्ञानं शाब्दबोधं प्रति हेतुः।

'सैन्धवमानये'त्यत्र सैन्धवपदस्य लवणे तात्पर्यग्रहो जातश्चेद्, तर्हि 'सैन्धवमानये'ति वाक्यं लवणकर्मकानयनतात्पर्यकमिति वाक्यार्थतात्पर्यग्रहो भवति। तथा च पदार्थतात्पर्यग्रहो वाक्यार्थतार्त्यग्रहे हेतुः। 'सैन्धवं कलयति' इत्यत्र लवणभक्षणाश्वदर्शनतात्पर्ये सति लवणदर्शनाश्वभक्षणविषयकशाब्दबोधवारणाय वाक्यतात्पर्यज्ञानस्य शाब्दबोधे कारणत्वम्। एवञ्च पदार्थतात्पर्यं, वाक्यतात्पर्यमिति द्विविधं तात्पर्यं वर्तते, तत्र पदार्थतात्पर्यस्य वाक्यार्थतात्पर्यग्रहे, वाक्यतात्पर्यस्य शाब्दबोधे च हेतुत्वम्।

'गङ्गायां घोष' इत्यत्र गङ्गापदस्य प्रवाहेऽर्थे उद्दिष्टे, घोषपदार्थस्य प्रवाहवृत्तित्वं न सम्भवतीत्यतः, अत्र वक्तुस्तात्पर्यं न भविष्यतीति कृत्वा गङ्गापदस्य तीररूपार्थे वक्तुस्तात्पर्यमिति जानाति।

---

1 'यत्संशयव्यतिरेकनिश्चयौ यदुत्पत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतुरनुमितौ व्याप्तेरिव' इति चिन्तामणौ।

तथा च नानार्थकपदस्थले, लाक्षणिकपदस्थले च तात्पर्यज्ञानस्य हेतुत्वं वर्तते। परन्तु 'घटमानये'त्यादौ तात्पर्यज्ञानस्य हेतुत्वं नास्ति। अतः शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य हेतुत्वन्नास्तीत्येके वदन्ति। एतेषाम्मते गृहीतनानार्थवृत्तिकपदजन्यानुभवत्वं प्रति तात्पर्यज्ञानस्य हेतुत्वम्। तथा च तात्पर्यज्ञानजन्यतावच्छेदकं गृहीत-नानार्थवृत्तिकपदजन्यानुभवत्वं, न तु पदजन्यानुभवत्वमिति। तात्पर्यज्ञानस्य हेतुतावादिनस्तु पदजन्यानुभवत्वस्यैव तात्पर्यज्ञान-जन्यतावच्छेदकत्वकल्पने लाघवं, गृहीतनानार्थवृत्तिकपदजन्यानुभवत्व-स्वीकारे गौरवम्, अतः लाघवाद् तात्पर्यज्ञानस्य शाब्दबोधत्वा-वाच्छिन्नं प्रति हेतुत्वं लभ्यत इति वदन्ति।

अपरञ्च — 'घटमानये'त्यादावपि घटस्य जलाहरणादिप्रयोजन-वत्त्वेन, जलाहरणादौ सच्छिद्रघटस्यानुपयोगाद् छिद्रेतरघटे एव वक्तुस्तात्पर्यम्। 'घटोऽपसारणीय' इत्यादौ वक्तृसमीपस्थे घटे तात्पर्यम्। 'घटमत्रानये'त्यादौ घटपदस्य दूरस्थे घटे तात्पर्यम्। 'घटं पटञ्चानये'त्यादौ घटपटपदयोरेकदेशवृत्तिघटपटयोस्तात्पर्यम् इत्यादिकस्यापि तात्पर्यस्य सम्भवाद् सर्वत्रैव शब्दबोधे तात्पर्यज्ञानस्य हेतुत्वस्वीकार एव युक्तः।

तात्पर्यग्राहकाः संयोगा[1]दयः। तेषां शाब्दबोधं प्रति न हेतुत्वम्। शाब्दबोधजनकतात्पर्यज्ञानं प्रत्येव तेषां हेतुत्वम्। तेषां शाब्दबोधं प्रति हेतुत्वकल्पने तु परस्परजन्यशाब्दबोधे परस्परव्य-भिचारः स्याद्। अतः शाब्दबोधं प्रति प्रयोजकत्वमेवैषाम्।

वेदस्थलेऽपि तात्पर्यज्ञानार्थं ईश्वरः कल्प्यते। मूर्खपठितवेदस्थ-लेऽयं मूर्ख इति विशेषदर्शनसद्भावाद् तात्पर्यभ्रमासत्वेऽपि परमे-श्वरतात्पर्यज्ञानं कारणम्। अथवा तत्प्रतीतिजनकत्वप्रकारकेच्छयो-च्चरितसजातीयत्वमेव तात्पर्यम्। सजातीयत्वञ्च तत्प्रतीतिजनकत्व-

---

1 संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥

प्रकारताकेच्छयोच्चरिता यादृशानुपूर्वीमच्छब्दास्तादृशानुपूर्वीमत्त्वम् । तथा च शुकोच्चरितवाक्यस्यलेऽपि तादृशतात्पर्यसत्त्वेन न बोधानुपपत्तिः ।

[1]मुक्तावलीकृद्भिस्तु वेदस्थले इव संवादिशुकवाक्यजन्यशाब्दबोधे च परमेश्वरतात्पर्यज्ञानस्य हेतुत्वं स्वीकृतम् ।

यद्यपि 'शुकादिवाक्यादयमर्थः श्रुत' इति सर्वानुभवो विरुध्येत, तथापि तद्वाक्यस्यापि शाब्दबोधप्रयोजकत्वस्वीकारेण तादृशविरोधोऽपाकरणीयः ।

समभिव्याहाररूपा, आनुपूर्वीरूपा चेति द्विविधा आकाङ्क्षा तत्र समभिव्याहारस्य [2]'इदं पदमेतत्पदेन सहान्वयबोधं जनयतु' इति पदतात्पर्यरूपत्वात् समभिव्याहाररूपाकाङ्क्षाज्ञानस्य शाब्दबोधे कारणत्वं वदताम्मते तात्पर्यज्ञानस्य हेतुत्वाभावेऽपि आनुपूर्वीरूपाकाङ्क्षाया शाब्दबोधे हेतुत्वं वदताम्मते तात्पर्यज्ञानस्य हेतुत्वं सम्भवत्येव। तात्पर्यज्ञानस्य च स्वरूपसतो न हेतुत्वं, तात्पर्यभ्रमादपि शाब्दबोधस्य सिद्धान्तसिद्धत्वाद् ।

## वेदान्तिमतम्

तदन्यमात्रार्थप्रतीतिजननेच्छया अनुच्चारितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं तात्पर्यमिति तात्पर्यलक्षणम् । तादृशस्य तात्पर्यस्य ज्ञान शाब्दबोधहेतुः ।

सैन्धवमानय' इत्यादिवाक्यं यदा लवणानयनप्रतीतीच्छय प्रयुक्तं, तदापि अश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वाद् लवणपरत्वज्ञानदशायामप्यश्वादिसंसर्गज्ञानापत्तिवारणाय लक्षणे तदितरप्रतीतीच्छयानुच्चरितत्वस्य निदेशः । यत्र तदर्थप्रतीतिजननेच्छयो-

---

1 'इत्थञ्च शुकवाक्येपीश्वरीयतात्पर्यज्ञानं कारणम्' ।

(न्या. सि. मु. पृष्ठं ३१६.)

2 'समभिव्याहारश्चेदं पदं एतत्पदेन सहान्वयबोधं जनयतु' इति पदतात्पर्यमेव' (दिनकरी. पृष्ठम् ३१४.)

च्चरितत्वज्ञानमात्रं तत्रापि तदन्यार्थप्रतीतिजननेच्छयानुच्चरितत्वाज्ञानं कल्पनीयम् । मूर्खपठितवेदस्थले शुकपठितवाक्यस्थले च तात्पर्यज्ञानं विनापि शाब्दबोधस्यानुभवसिद्धत्वाद् विशेषदर्शनेन तात्पर्यभ्रमासम्भवाद् शुके मूर्खशिक्षितत्वग्रहेऽपि मूर्खशिक्षकवाक्यतात्पर्यग्रहस्यासम्भवाच्च न तत्प्रतीतिजनकत्वप्रकारकेच्छयोच्चरितत्वरूपतात्पर्यज्ञानस्य कारणत्वम् । इति ।

## वेदान्तिमतनिरसनम्

परन्त्वेतन्मते तदन्यमात्रार्थप्रतीतिजननेच्छयानुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वस्य तात्पर्यरूपत्वस्वीकारेण तदपेक्षया तत्प्रतीतिजनकत्वप्रकारकेच्छयोच्चरितत्वरूपस्यैव तात्पर्यरूपतास्वीकारे लाघवम् । वेदस्य पौरुषेयत्ववादिनैयायिकमते वेदस्थले इव शुकादिवाक्ये अपि लाघवादीश्वरज्ञानकल्पने न काचित् क्षतिः । विसंवादिशुकवाक्यस्थले तु परमेश्वरेच्छायां विसंवादित्वाभावेऽपि शिक्षयितुरेव तात्पर्यज्ञानकल्पने न काचिदनुपपत्तिः ।

## भाट्टमतम्

भाट्ट[1]मतानुयायिभिः सर्वैः तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वं नाङ्गीक्रियते । भाट्टचिन्तामणिकारो गागाभट्टः तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वं स्वीकुर्वत्येव । अन्ये च लाक्षणिकनानार्थस्थलीयशाब्दबोध एव तात्पर्यज्ञानं कारणं, न तु शाब्दबोधमात्रे गौरवादिति वदन्ति । भाट्टसारकर्ता श्रीकृष्णातातार्योऽपि तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वं स्वीकरोति । मानमेयोदयकर्ता नारायणस्तु तात्पर्यज्ञानस्य हेतुत्वं नाङ्गीकरोति ।

'तत्प्र[2]तीतीच्छया वक्त्रानुसंहितत्वं तात्पर्य'मिति गागाभट्टाः भाट्टचिन्तामणौ । तत्र पदार्थतात्पर्यनिश्चयः संसर्गतात्पर्यनिश्चयश्च तादृशशाब्दबोधे हेतुः । तात्पर्यसन्देहे शाब्दबोधो न जायते । तात्पर्यभ्रमे

---

1 रघुनाथाचार्यकृते 'न्यायमीमांसादर्शनयोः प्रमाणविचारः' इति ग्रन्थे पृष्ठम् २२९

2 भा. चि. ५२

चाहार्यशाब्दबोधो जायते। शुकवाक्ये वेदवाक्ये चेश्वरतात्पर्यग्रहेण, अध्यापकतात्पर्यग्रहेण वा शब्दबोधः। अननुगतत्वाद् प्रकरणादीनां शाब्दबोधं प्रति हेतुत्वन्न सम्भवति। अतः लाघवाद् तात्पर्यज्ञानमेव कारणमिति।

परन्तु शाब्दबोधस्यानुमितेश्चाहार्यत्वासम्भवाद्, तात्पर्यभ्रमादपि शाब्दबोधस्यानुभवसिद्धत्वाच्चैषाम्मतं न शोभनम्।

**नागेशमतम्**

नागेशभट्टास्तु[1] — तात्पर्यज्ञानं शब्दबोधे न कारणम्; न वा-अन्यार्थतात्पर्यज्ञानं प्रतिबन्धकम्। श्लिष्टवाक्यस्थले च उभयार्थे एव तात्पर्यस्य सत्त्वेनोभयबोधस्येष्टत्वाद्। तत्र स्थले च वाक्य-भेदभियोपमानोपमेयभावसम्बन्धेनैकमुख्यविशेष्यक एव बोधः। 'सैन्धवमानये'त्यादौ एकार्थतात्पर्यग्रहे अन्यार्थस्यापि बोधस्सम्भ-वत्येव। अन्यथा उपहासानुपपत्तेः। 'सकृदुच्चरितः शब्दः सकृदे-वार्थं गमयतीति नियमश्च न प्रामाणिकम्। बोधे प्रामाण्याप्रामा-ण्यावधारणे एव तात्पर्यज्ञानस्योपयोपयोगः। इति वदन्ति॥

**नागेशमतनिरसनम्।**

परन्तु प्रवृत्तिं प्रति न प्रामण्यनिश्चयस्य हेतुत्वं, किन्तु इष्टसाधनताज्ञानमात्रस्य। शुक्तौ 'इदं रजत'मिति ज्ञानदशायां 'रजतं मदिष्टसाधनम्' इति ज्ञानसहकारेण प्रवृत्तिर्जायते इत्यनुभवसिद्धम्। किञ्च प्रवृत्तिं प्रति प्रामाण्यनिश्चयस्य हेतुत्वे कुत्राप्यसफला प्रवृत्तिर्न स्याद्। अतः प्रवृत्तिं प्रति प्रामाण्यनिश्चयः कारणं, प्रामाण्यनिश्चयं प्रति तु तात्पर्यज्ञानं कारणमिति वदतां नागेशभट्टानां मतं न युज्यते। तथा च तात्पर्यज्ञानस्य शाब्दबोधं प्रति हेतुत्वं सिद्धयति।

---

1 '...तन्न। शुकादिवाक्याद्देवताप्रसादेन, पूर्वजन्मसंस्कारेण वा मूर्खबालकृतोत्तमकाव्याद्वक्तृतात्पर्यकाव्यातिरेकनिश्चयेऽपि बोधोदयेन तस्य बोधे हेतुत्वासम्भवाद्।" ल. म. (पृष्ठम् ८३२)

**आसत्तिः । (नैयायिकमतम्) ।**

'सन्निधानं तु पदस्यासत्तिरुच्यते ।'

इति कारिकार्धेन श्रीविश्वनाथपञ्चाननः कारिकावल्याम् आसत्तेर्लक्षणं वदति । पदस्य सन्निधानमासत्तेर्लक्षणमिति कारिकार्थः । परन्त्वेतल्लक्षणं न युज्यते । 'गिरिर्भुक्तमग्निमान् देवदत्तेने'त्यत्र गिरिपदभुक्तपदयोः एतादृश्याः आसत्तेः सत्त्वाद् । अतः यत्पदार्थेन यत्पदार्थस्यान्वयोऽपेक्षितः तयोरव्यवधानमासत्तिः इत्येवासत्तिलक्षणम् । गिरिपदार्थभुक्तपदार्थयोरन्वयस्यानपेक्षितत्वाद् न तयोः पदयोरासत्तिः । अत्र अव्यवधान-ज्ञानं नापेक्षितम् । स्वरूपसत्येवासत्तिः शाब्दबोधहेतुः ।

'नीलो घटो द्रव्यं पट' इति केनचन वक्त्रा उक्तम् । तत्र नीलपदार्थपटपदार्थयोरन्वयो वक्त्राभिप्रेतः, न तु नीलपदार्थघट-पदार्थयोः । परन्तु तात्पर्यानभिज्ञस्य श्रोतुः प्रथमं वाक्यश्रवणे 'नीलो घट' इति शाब्दबोधो भवति । तत्र नीलपदघटपदयोरासत्तिर्न स्याद्, यदि उपर्युक्तानुसारेण आसत्तिलक्षणमुच्येत । तत्रासत्तिभ्रम इति यद्युच्येत तर्हि शाब्दबोधोऽपि भ्रमात्मकः स्याद् । 'आसत्ति-भ्रमाच्छाब्दभ्रम' इति हि प्राचीनोक्तिः । इति चेद् —

अत्रोच्यते । आसत्तिभ्रमाद् न शाब्दभ्रमः । किन्तु योग्यता-भ्रमादेव शाब्दभ्रमः । अत्रासत्तिर्भ्रमात्मिकैव । परन्तु घटे नीलस्य सत्त्वेन विषयबाधाभावाद् 'नीलो घट' इति प्रमात्मकः शाब्द-बोधो भवेदेव । आसत्तिभ्रमाच्छब्दभ्रम इति प्राचीनानामुक्तिस्तु निर्युक्तिका । ययोः पदयोः परस्परमन्वयबोधजनकत्वेन वक्तु-स्तात्पर्यविषयत्वनिश्चयस्तयोरव्यवधानस्यैवासत्तितया नीलपदार्थ-घटपदार्थयोः परस्परमन्वयबोधजनने वक्तुस्तात्पर्यमस्तीति भ्रमात्मक-तात्पर्यज्ञानप्रयुक्तोऽत्रासत्तिभ्रमः ।

अत्र लक्षणे ययोः पदयोः परस्परमन्वयबोधजनकत्वेन वक्तु-स्तात्पर्यविषयत्वनिश्चयः तयोरव्यवधानमित्यत्र, तयोरित्यस्य तयोः पदज्ञानयोरित्यर्थो वक्तव्यः । एवञ्चैतत्सम्पन्नम् — पदज्ञानयोरव्य-वधानमासत्तिः इति । सा च स्वरूपसती कारणम् ।

तरङ्गिणीकाराः एवमभिप्रयन्ति — "संसर्गप्रतियोग्यनुयोगिबोधकपदज्ञानयोरव्यवधानरूपासत्तेः शाब्दबोधजनकत्वकल्पने प्रयोजनविरहः। स्वजन्यपदार्थोपस्थितिद्वारा पदद्वयज्ञानसत्वाद् शाब्दबोधोत्पत्तिसम्भवेन शाब्दबोधप्राक्क्षणे व्यवहितपदज्ञानयोरुत्पत्त्यसम्भवेनैव व्यवहितपदज्ञानाभ्यां शाब्दबोधापादनं न सम्भवति। आसत्तेरव्यवहितपूर्वत्वस्य सत्वेपि अनन्यथासिद्धित्वकल्पने प्रयोजनविरहः। तथापि यत्र प्रथमं घटपदज्ञानं, ततः पटपदज्ञानं, तदुत्तरक्षणे घटपदज्ञानजन्यघटरूपार्थविषयिणी उद्बोधकान्तरसहकारेण शुक्लपदविषयिणी च समूहालम्बनस्मृतिः, ततः शुक्लपदार्थस्मरणं, तत्र 'शुक्लो घट' इति शाब्दबोधापत्तिवारणाय उक्तासत्तेः शाब्दबोधे हेतुत्वकल्पनस्यावश्यत्वाद् न [1]दोष" इति।

अत्र [2]सुबोधिनीकारः श्रीरामवर्मपरीक्षिद्गोश्रीमहाराजः तरङ्गिणीकारस्य रामरुद्रभट्टाचार्यस्य मते स्वाभिप्रायभेदः इत्थं प्रकटयति — "इदमत्र विचार्यते — पदज्ञानयोरव्यवधानरूपासत्तिः स्वरूपसती कारणमित्यस्य कोऽर्थः? यदि शाब्दकारणयोः पदज्ञानयोरव्यवधानमपि शाब्दाव्यवहितपूर्ववृत्तीति तदा दण्डादेरपि तद् घटकारणं स्याद्। तस्य तत्रान्यथासिद्धिरिति चेत् अत्रापि सा न कुतः? खले कपोतन्यायेन शाब्दबोधमते हि सकलपदविषयकैकस्मरणस्य सत्त्वं शाब्दबोधप्राक्क्षणे नियतम्। इत्थञ्च सर्वत्र शाब्दे तादृशस्मरणकारणतयैवोपपत्तौ किं पदज्ञानाव्यवधानस्य कारणतया। मतान्तरे तु महावाक्यार्थबोधपूर्वक्षणे निखिलपदस्मरणापेक्षाभावाद् कथमासत्तिः। तदपेक्षामभ्युपगच्छाम इति चेत्तेनैव गतार्थता पूर्ववद्। यद्यपि तरङ्गिण्यां 'इदमत्रावधेय-'मित्यादिना द्वितीयमतमवलंब्य शङ्कामेतामुत्थाप्य वारणप्रकारो दर्शितः, तथापि घटपदज्ञानानन्तरं पटपदज्ञानदशायामेव घटरूपार्थोपस्थितेरवर्जनीयतया तस्याः क्षणान्तरविलम्बकल्पनमन्याय्यम्। न च घटपदज्ञानं पटपदज्ञानञ्चात्र प्रत्यक्षात्मकमेव विवक्षितम्। इत्थञ्च पटपदप्रत्यक्षसामग्र्याः स्मृतिसामग्रीतो बलवत्त्वान्न पटपदज्ञानकाले

---

1 न्या. सि. मु. (रामरुद्रीये) पृष्ठम् ३०५

2 सुबोधिन्याम् आसत्तिनिरूपणे। पृष्ठम् २१० - २११

घटरूपार्थस्मरणसम्भव इति वाच्यम्, पकारादिवर्णत्रयप्रत्यक्षानन्तरं जायमानपटपदप्रत्यक्षेण घटपदज्ञानस्य नष्टत्वाद् घटरूपार्थोपस्थितेरसम्भवप्रसङ्गाद्। इत्थञ्च पटरूपार्थोपस्थितिरेव शुक्लपदविषयिणी वक्तव्या। ततश्च तदर्थस्मृत्या शाब्दबोधः आपादनीयः। स तु न सम्भवति घटरूपार्थोपस्थितेः पूर्वं नष्टत्वादिति। अतः पदयोरव्यवधानज्ञानमेव शाब्दबोधकारणम्। गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ सत्यपि तात्पर्यग्रहे पद्य इव योजनावाक्यादेव शाब्दबोधो विशेषदर्शिनां, न तु तावद्विषयकसमूहालम्बनस्मरणेन। इत्थञ्च सांप्रदायिकपक्ष एव साधीयान्'' इति।

नव्या[1]स्तु उक्तासत्तिर्मौनिश्लोके न सम्भवति, तत्र पदाभावेन पदाव्यवधानाभावात् उक्तासत्तिज्ञानविलम्बेन शाब्दबोधविलम्बाभावाच्च। किन्तु अव्यवधानेन वृत्या पदजन्यपदार्थोपस्थितिरासत्तिः, तत्राप्यव्यवधानांशो न निवेश्यते, शाब्दबोधं प्रति पदजन्यपदार्थोपस्थितेः कारणत्वाद्, अव्यवधानेनैव तत्सम्भवाद्, तस्माद् वृत्या पदजन्यपदार्थोपस्थितिरासत्तिरित्याहुः।

यत्र 'छत्री कुण्डली वासस्वी देवदत्त' इत्युक्तं तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशाद्, अव्यवधानेन पदोपस्थितिरूपाया आसत्तेः कथं सम्भवः, तस्याः शाब्दबोधकारणत्वञ्च कथम् इति अत्राशङ्का स्याद्। साशङ्केवं समाधीयते—

वाक्यश्रवणसमये वाक्यघटकीभूताद् एकैकस्मादपि पदानुभवाद् संस्कारो जायते। चरमपदश्रवणसमये पूर्वपदजनितसंस्कारैः सहितः अन्तिमपदानुभवः तावत्पदविषयकं स्मरणं जनयति। ततः तावत्पदार्थविषयकस्मरणम्। ततश्शाब्दबोधः।

अत्र प्राचीनाः खले कपोतन्यायेन शाब्दबोधं वदन्ति।

'वृद्धा युवानः शिशवः कपोताः
खले यथामी युगपत्पतन्ति।

---

1 शाब्दखण्डे आसत्तिनिरूपणप्रकरणे मुक्तावलिव्याख्यायां दिनकर्याम् पृष्ठम् ३०४

तथैव सर्वे युगपत्पदार्थाः
परस्परेणान्वयिनो भवन्ति' ।।

इत्युक्तरीत्या आशुतरविनाशिनीनां क्रमिकाणां पदजन्यपदार्थोपस्थितीनामपि यौगपद्यासम्भवाद् शाब्दबोधे सर्वत्र पदजन्यपदार्थोपस्थितिः समूहालम्बनात्मिकैव कारणम् । एवञ्च सर्वत्र विशेष्ये विशेषणमिति रीत्यैव शाब्दबोधः, न तु विशिष्टस्य वैशिष्ट्यमिति रीत्या । विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुत्वाद्, अत्र च तदभावाद् । अत्र बुद्धयुवशिशुभिः कपोतैः चिरतर – चिर - सन्निहितकालोक्तानां पदार्थानां साम्यं बोध्यम् ।

अपरे तु राजपुरप्रवेशन्यायेनान्वयबोधं वर्णयन्ति । यथा राजपुरप्रवेशाभिलाषिपुरुषाः स्वस्वकार्यसाधकाकाङ्क्षितराजपुरुषैः सह संयुज्य राजपुरं प्रविशन्ति तथा निरूप्य निरूपकभावापन्नखण्डवाक्यार्थविषयकज्ञानानां राजपुरसदृशमहावाक्यार्थबोधे उपयोगः ।

'य[1]द्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते' ।।

स्वा[2]र्थाकाङ्क्षितं स्वार्थयोग्यं यद्यत् सन्निधानं प्रपद्यते — स्वार्थोपस्थितिविषयो भवति, तेन तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यते अनन्तरञ्च महावाक्यार्थबोधः । एवञ्चैतन्मते 'घटमानये'त्यादौ प्रथमं 'घटीया कर्मता' इति बोधः, तदनन्तरं घटकर्मकमानयनमिति ।

'घटमानये'त्यत्र 'घट'मिति पदाद् घटकर्मत्वयोरुपस्थित्यनन्तरं घटीया कर्मतेति खण्डवाक्यार्थबोधः । तदनन्तरमानयनादिपदज्ञानं, तदनन्तरमानयनपदार्थस्मरणम्, अत्रानयनपदार्थस्मरणकाले पूर्वतनघटाद्युपस्थितेर्नाशाद्, राजपुरप्रवेशन्यायेन शाब्दबोधवादिनामपि समूहालम्बनस्मृतिरावश्यकीति शङ्कायां तेषां समाधानन्त्वित्थम् —

तत्र घटस्मरणनाशेऽपि घटीया कर्मतेत्याकारकावान्तरवाक्यार्थबोधस्यैव पदजन्यपदार्थोपस्थितित्वेन तेनैव घटकर्मकमानयनमिति

1 प्र. प. ३५४ 2 दिनकरीये ३०६

महावाक्यार्थबोधः। पदजन्यपदार्थोपस्थितित्वेन शाब्दबोधं प्रति कारणत्वं न स्वीक्रियते, परन्तु अवान्तरवाक्यार्थबोधसाधारणोपस्थितित्वेनैव। तथा च सर्वत्र खण्डवाक्यार्थबोधपूर्वकमेव महावाक्यार्थबोधः। अत एव सर्वत्र खण्डवाक्यार्थबोधरूपस्य विशेषणतावच्छेदकप्रकारकनिश्चयस्य पूर्वं सत्त्वाद् विशिष्टस्य वैशिष्ट्यमिति रीत्यैव महावाक्यार्थबोध उत्पद्यते।

यत्र खण्डवाक्यार्थबोधनाशोत्तरं महावाक्यार्थबोधस्तत्रापि खण्डवाक्यार्थबोधसमानाकारं स्मरणं कल्पयित्वा विशिष्टवैशिष्ट्यबोधः। यत्र तु खण्डवाक्यार्थशाब्दबोधजनकस्मृतिरेव चरमपदविषयिणी समूहालम्बनरूपा तत्रैव महावाक्यार्थबोधप्राक्क्षणे खण्डवाक्यार्थबोधसत्त्वम्। एवञ्च खण्डवाक्यार्थविषयकशाब्दबोधं विनापि समूहालम्बनस्मरणेन विशिष्टवैशिष्ट्यावगाहिशाब्दबोधोत्पत्तिस्वीकारे यत्र यत्किञ्चित्कारणवैगुण्येन न खण्डवाक्यार्थविषयकशाब्दबोधः किन्तु पदार्थविषयकसमूहालम्बनस्मरणमेवासीद् तत्र विशेष्ये विशेषणमिति रीत्या महावाक्यार्थबोधसामग्र्याः अक्षततया तादृशरीत्या महावाक्यार्थबोधोऽप्यवर्जनीयः।

**नागेशमतम्॥**

नागेशस्य मते आसत्तेः शाब्दबोधकारणत्वं नास्ति।

'आसत्तिरपि मन्दस्याविलम्बेन शाब्दबोधे कारणम्' इति नागेशः।

'मणिदर्पणकारः राजचूडामणिमखी आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थितिरिति मणिकृत' इति मणिकृन्मतमुद्धृत्य, अव्यवधानञ्च परस्परान्वयधीविरोधिपदार्थोपस्थितिव्यवधानाभाव' इति अव्यवधानपदं निर्वक्ति। ततः अत्राहुरित्यादिना "अव्यवधानेनान्वयप्रतियोग्युपस्थित्यनुकूलतात्पर्यस्यैवासत्तित्वेनाभिमतत्वाद्" इत्यादिना तात्पर्यस्यासत्तित्वमुक्त्वा, "वस्तुतस्तु एतादृशतात्पर्यज्ञानस्य प्रकरणादिवत् वाक्यार्थतात्पर्यग्रहे एवोपयोगो नान्वयबोधे, वाक्यार्थतात्पर्यग्रहे सत्येतद्विलम्बेनान्वयबोधविलम्बाभावाद्, तस्माद् अन्वयप्रतियोग्युपस्थितिरेवासत्तिः सा च स्वरूपसत्येव हेतुरिति दिगिति वदति।

**भाट्टमतम् ॥**

आसत्तिस्तु 'अव्यवधानेनान्वयप्रतियोग्युपस्थिति'रिति गागाभट्टाः। अव्यवधानञ्च प्रकृतान्वयबोधाननुकूलक्षणेन।

पदजन्यपदार्थोपस्थितिरासक्तिरिति भाट्टसारानुरोधं लक्षणम्। भाट्टसारानुसारेणासत्तिः आसक्तिरित्युच्यते। [1]मानमेयोदयकारः आसत्तिरिति पदं न प्रयुनक्ति, परन्तु सन्निधिरिति।

**प्राभाकरमतम्**

यस्यार्थस्य[2] श्रवणानन्तरं आकाङ्क्षायोग्यताभ्यामर्थान्तरे बुद्धिपरिवृत्तिः स सन्निधिरित्युच्यते (प्र. प. ३८६)। स च न केवलं शब्दमूलकः, अध्याहृतेनापि अन्विताभिधानस्य सम्भवाद्। न च शब्द एवाध्याहृतोऽस्तु स एवार्थमुपस्थापयतीति वाच्यम्। अन्विताभिधानानुपपत्तिनिबन्धनो ह्यध्याहारः। योग्यप्रतियोग्यर्थोपस्थित्यैव सानुपपत्तिरुपशान्ता भवति।

एवञ्चैतत् सिद्धं यद् नैयायिकाः आकाङ्क्षायोग्यतासत्तितात्पर्यज्ञानानि शाब्दबोधकारणानीत्यङ्गीकुर्वन्तीति। तत्रासत्तिः सन्निधिरित्यपि नाम्ना व्यवह्रियते। प्राचीननैयायिकैः तात्पर्यज्ञानस्य शाब्दबोधकारणता नाभ्युपगता। तर्कसंग्रहे आकाङ्क्षायोग्यतासन्निधीनामेव वाक्यार्थबोधहेतुत्वमुपन्यस्तम्। नव्यनैयायिकैस्तु तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वं स्वीक्रियते।

मीमांसकेषु भाट्टैः चतुर्णामप्येतेषां वाक्यार्थबोधहेतुत्वमङ्गीक्रियते। प्राभाकरैस्तु तात्पर्यज्ञानं विना त्रयाणामेव वाक्यार्थे हेतुत्वं स्वीक्रियत इति विशेषः। तेषाम्मते तात्पर्यज्ञानस्य न हेतुत्वम्।

नागेशास्तु योग्यतातात्पर्यासत्तीनां हेतुत्वं नाङ्गीकुर्वन्ति ॥

---

1 न्या. मी. द. प्रा. वि. पृष्ठम् २२५

2 ,, ,, ,, २३२

# ॥ पञ्चमोऽध्यायः ॥

## शाब्दबोधप्रकारः

वक्ता यदा वाक्यमुच्चारयति तदा प्रथमं श्रोतुः पदज्ञानं जायते। तदनन्तरं पदैः वृत्या उपस्थापितानामर्थानां स्मृतिर्जायते ततः पदार्थानां संसर्गमवगाह्य जायमानः शाब्दबोधः। पदार्थानां संसर्गमवगाह्य जायमानः विशेषणविशेष्यभावापन्ननानापदार्थविषयकः वाक्यार्थबोधः शाब्दबोध इत्यभिधीयते। तस्मिन् शाब्दबोधे मुख्यविशेष्यतया को भासत इत्यत्र शास्त्रकाराणां मध्ये अभिप्रायभेदो वर्तते। तत्र मीमांसकमतानुयायिनः सर्वत्राख्यातार्थ-भावनामुख्यविशेष्यक एव शाब्दबोधो भवतीति वदन्ति। वैयाकरणास्तु धात्वर्थमुख्यविशेष्यको भवति शाब्दबोध इति वदन्तस्तत्र युक्तिं प्रदर्शयन्ति। नैयायिकास्तु शाब्दबोधः प्रायः प्रथमान्तार्थमुख्यविशेष्यक इति वदन्तः स्वाभिप्रायं युक्तियुक्तं समर्थयन्ति। एतेषु त्रिष्वपि मतेषु शाब्दबोधप्रकारः कीदृश इति विचारणमधुना क्रियते।

**मीमांसकमतम्**

क्रियापदं विना नामपदं निराकाङ्क्षं बोधं न जनयति। 'तण्डुलम्' इति केवलद्वितीयान्तपदोच्चारणे श्रोतुः न निराकाङ्क्षः बोधो जायते। परन्तु यदा 'पचति' इति पदं शृणोति तदा 'पाकं करोती'ति बोधो जायते। अतः क्रियापदमेव द्वितीयान्तादि-पदार्थस्य मुख्यविशेष्यं भवति। क्रियापदे धातुः पुरुषप्रत्ययश्च वर्तते। तत्र धात्वर्थः फलम्। व्यापारो नैव धात्वर्थः। प्रत्ययार्थ—कालो भावना कर्तृत्वं, संख्या इत्यादयः। 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, तयोस्तु प्रत्ययः प्राधान्येन' इति व्युत्पत्तिरस्ति। अतः धात्वर्थापेक्षया प्रत्ययार्थस्य प्राधान्यम्। कालभावनादिषु प्रत्ययार्थेषु

मध्ये भावनाया एव प्राधान्यम्। 'भावप्रधानमाख्यातम्' इत्यस्यायमेवार्थः। अत्र भावपद भावनावाचकम्। भवनानुकूलः व्यापारः भावनापदस्यार्थः। अतः 'भावप्रधान'मित्यस्य भावनाप्रधानमित्यर्थः। आख्यातार्थेषु कालसंख्याकर्तृत्वभावनादिषु मध्ये भावनाया एव प्रधानत्वमित्यर्थलाभाद् वाक्यार्थे सर्वत्र भावनामुख्यविशेष्यकत्वं सम्भवतीति सिद्ध्यति।

प्रथमान्तस्य चैत्र इत्यादिपदस्य मुख्यविशेष्यत्वं कदापि न सम्भवति। 'चैत्र' इत्येतावन्मात्रोच्चारणे निराकाङ्क्षः बोधो न जायते। 'किं करोति' इत्याकाङ्क्षायाः सत्त्वाद्। अतः यथा 'तण्डुल'मित्यादिद्वितीयान्तपदानि निराकाङ्क्षं बोध न जनयन्ति, तथैव 'चैत्र' इत्यादिप्रथमान्तपदान्यपि। 'चैत्रः पण्डित' इत्यत्रापि 'अस्ति' इत्यादिक्रियायाः अध्याहारो वाच्यः। 'अस्तिर्भवन्तीपरः प्रथमपुरुषः अप्रयुज्यमानोऽप्यस्ति' इति कात्यायनस्मरणाद्। 'अहं पण्डित' 'त्वं पण्डित' इत्यादिप्रथमपुरुषभिन्नस्थलेऽपि क्रियापदाध्याहार आवश्यकः।

प्रातिपदिकार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन सुब्जन्योपस्थितिः कारणं, लिङ्गसङ्ख्याव्यतिरिक्तसुबर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन क्रियापदजन्योपस्थितिः कारणमिति कार्यकारणभावो वर्तते। प्रथमाप्रकृत्यर्थः प्रथमार्थे, प्रथमार्थश्च आख्यातार्थभावनायामन्वेति। प्रथमार्थश्च कर्तृत्वम्। 'चैत्रः पचति' इत्यत्र प्रथमान्तार्थस्य चैत्रस्य आधेयतासम्बन्धेन प्रथमार्थे कर्तृत्वेऽन्वयः। कर्तृत्वस्याख्यातार्थभावनायामन्वयः। यद्यप्याख्यातस्यापि कर्तृत्वमर्थः, तस्य च आख्याताभिहितभावनायामन्वयः, अतः प्रथमायाः कर्तृत्वरूपार्थस्वीकारस्यावश्यकता नास्ति, तथापि चैत्रत्वावच्छिन्नवृत्तित्वेन कर्तृत्वस्य बोधार्थं प्रथमाविभक्तेः कर्तृत्वरूपार्थस्वीकार आवश्यकः। अतः प्रथमाविभक्तेः सङ्ख्यैवार्थ इति प्रवादो न युक्तः। 'अभिहिते प्रथमा' इति वार्तिककारो वदति च। आख्यातेन कर्तृत्वाभिधाने एव चैत्रादिपदोत्तरप्रथमायाः साधुत्वम्।

कर्तृत्वञ्चाखण्डो धर्मः। नानुकूलकृतिमत्त्वम्।

एवञ्च सुबन्तपदानां क्रियापदं स्वार्थविशेष्यसमर्पकम्। क्रियापदे च प्रत्ययार्थः धात्वर्थस्य विशेष्यम्। 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, तयोस्तु प्रत्ययः प्राधान्येने'ति व्युत्पत्तेः। प्रत्ययार्थेऽपि भावनायाः प्राधान्यं, 'भावप्रधानमाख्यातम्' इति निरुक्ताद्।

'ओदनं पचती'त्यत्र प्रथमान्तपदाभावेन भावनामुख्यविशेष्यकस्य बोधस्य स्वीकारः, प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधवादिनामपि आवश्यकः। 'ओदनकर्मिका विक्लृत्त्यनुकूला वर्तमानकालिका भावने'ति बोधस्य सर्वानुभवसिद्धत्वाद् तदनुरोधेन सर्वत्रापि भावनामुख्य विशेष्यकस्यैव बोधस्य स्वीकारो युक्त। 'पचती'त्यादौ 'ति' इत्याख्यातेनोच्यमाना सङ्ख्या आख्यातार्थे कर्तर्येवान्वेति। न तु प्रथमान्तार्थे चैत्रादौ। चैत्र इत्यत्र सुबेकवचनादेकत्वोपस्थितिर्जायते। सा चैकत्वसङ्ख्या चैत्रादौ प्रथमान्तार्थे अन्वेति। अतः प्रथमान्तार्थे तिङुपात्तसङ्ख्यायाः अन्वये आकाङ्क्षा नास्ति। चैत्रो मैत्रश्च गच्छत इत्यत्र सुपा एकत्वं तिङा द्वित्वञ्च बोध्यते। एकत्वान्वयानुभवस्य, द्वित्वान्वयानुभवस्य वा अशाब्दत्वं वक्तव्यम्। तत्र च सुबुपात्तैकत्वान्वयबोध एव शाब्दः न तिङुपात्तद्वित्वान्वयबोध इत्यङ्गीक्रियते। तथाङ्गीकारस्यैवोचितत्वाद्।

प्रथमान्तार्थमुख्यविशेष्यकबोधवादिनां मते 'चैत्रः पचति' चैत्रो न पचति, चैत्र एव पचति इत्यादिषु तत्तत्स्थलानुरोधेन अन्यादृशकार्यकारणभावकल्पनाया आवश्यकत्वेन अनेककार्यकारणभावकल्पनागौरवं परिहर्तुन्न शक्यते। मीमांसकमते तु नामार्थभिन्न सुबर्थलिङ्गसङ्ख्याव्यतिरिक्तः सर्वोऽपि भावनायामेवान्वेतीति कार्यकारणभावकल्पनायां लाघवं विद्यते।

'ओदनं पचती'त्यत्र प्रथमान्तं पदं न विद्यते। अत्र शाब्दबोधो जायत एव। प्रथमान्तपदाभावाद् प्रथमान्तार्थो मुख्यविशेष्यो न भवति। अतोऽत्र भावनाया एव मुख्यविशेष्यत्वं कल्पनीयम्। एकत्र भावनाया मुख्यविशेष्यत्वे सिद्धे तस्या एव सर्वत्रापि मुख्यविशेष्यत्वकल्पनमुचितम्।

'संयोगेन घटाभाववद् द्रव्य'मिति ज्ञानदशायामपि 'घटवद् द्रव्य' मिति ज्ञानं जायत एव। अत इदं ज्ञायते यद् वाक्याद् बोधे जायमाने, प्रथमं सम्बन्धः सम्बन्धत्वेन संसर्गमर्यादया भासते। सम्बन्धसामान्यसंसर्गकशाब्दबोधे जाते सम्बन्धस्य विशिष्य जिज्ञासायां प्रमाणान्तरेण सम्बन्धविशेषतात्पर्येऽवधृते तत्र तत्र सम्बन्धे शाब्दबोधः पर्यवस्यति। एवमेव 'वर्तमानकालवती भावने'ति शाब्दबोधे सम्बन्धविशेषो विशिष्य न संसर्गमर्यादया भासते, अपि तु सम्बन्धत्वेन। तदनन्तरं विशिष्य सम्बन्धावगतौ सत्यां बोधस्तत्र पर्यवस्यति। एवञ्च सम्बन्धसामान्यसंसर्गककालप्रकारकभावनाविशेष्यकबोधे तादृशतिङ्समभिव्याहारज्ञानं कारणमित्येक एव कार्यकारणभावः। अतो 'नश्यती'त्यादौ वर्तमानः कालः भावनायां स्ववृत्त्युत्पत्तिकनाशनिरूपितत्वसम्बन्धेनान्वेति; 'तण्डुलं पचती'त्यादौ त्वाधेयतासम्बन्धेनेति, सर्वत्र विशेष्यभावनाया एकत्वेऽपि तत्र तत्र सम्बन्धानां विलक्षणत्वाद् तत्तत्संसर्गकबोधे तत्तत्समभिव्याहारज्ञानस्य कारणतानां कल्पनीयतया कार्यकारणभावानन्त्यमिति दूषणं निरस्तम्।

'पचति' इत्यादौ धात्वर्थः पाकः कर्मतासम्बन्धेन भावनायामन्वेति। 'ओदनं पचती'त्यादौ चौदनस्य कर्मत्वेनान्वितत्वाद् पाकः करणत्वेन भावनायामन्वेति, 'पाकेनौदनं करोती'ति विवरणाद्। यद्यपि पाकं प्रति कृतेः कारणत्वं, न तु कृतिं प्रति पाकस्य करणत्वम्, अतः आख्यातार्थभावनायां धात्वर्थस्य करणतासम्बन्धेनान्वयो न युक्तस्तथापि स्वनिष्ठकरणतानिरूपकौदनोद्देश्यकत्वसम्बन्धेन पाकस्य भावनायामन्वयस्वीकाराद्, करणत्वस्य संसर्गघटकत्वाद् संसर्गत्वव्यवहारोपपत्तिः।

'ओदनं पचती'त्यत्र द्वितीयार्थः कर्मत्वम्। तच्चाखण्डम्। तत्रैव कर्मत्वे द्वितीयार्थसंख्या सामानाधिकरण्यसम्बन्धेनान्वेति, समानपदोपात्तत्वाद्। प्रकृत्यर्थः द्वितीयार्थे कर्मत्वे आधेयतासम्बन्धेनान्वेति। कर्मत्वञ्च स्वनिरूपकपाकानुकूलत्वसम्बन्धेन भावनायामेवान्वेति।

'पचती'त्यत्र पाकं करोतीति विवरणाद्, 'ओदनं पचती'त्यत्र पाकेनौदनं करोतीति विवरणाच्च धात्वर्थः करोत्यर्थभावनाकारकम्। धात्वर्थसाधारण्येन कारकप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति भावनाविशेष्यतासम्बन्धेन लिङ्गानन्वयिपदजन्योपस्थितिः कारणम् इत्येकविधकार्यकारणभावकल्पने लाघवाद् कर्मत्वादीनामपि योग्येन सम्बन्धेन भावनायामेवान्वयो युक्तः। अन्यथा अनेककार्यकारणभावकल्पनागौरवम्। एवं धात्वर्थपाकान्वयार्थमुपस्थितं भावनाविशेष्यत्वमिति तस्यैव कर्मत्वादिप्रकारतानिरूपितत्वं कल्पयितुमुचितम्। नत्वनुपस्थितधात्वर्थविशेष्यत्वस्य। एवं 'काष्ठैरोदनं पचती'ति वाक्य काष्ठैः पाकेनौदनं करोतीति विवृण्वन्ति। तत्र काष्ठकरणत्वादीनां करोत्यर्थान्वयित्वं सम्प्रतिपन्नमिति विव्रियमाणवाक्येऽपि विभक्त्यर्थकरणत्वादीनां करोत्यर्थभावनायामन्वयो युज्यते। एवमेव तत्तद्विभक्तिबोध्यं कर्तृत्वसम्प्रदानत्वादिकमपि अखण्डमेव स्वनिरूपितधात्वर्थानुकूलत्वसम्बन्धेन भावनायामन्वेति।

प्रथमक्लृप्तव्युत्पत्तिभङ्गेन व्युत्पत्त्यन्तरकल्पनं न प्रामाणिकम्। प्रथमक्लृप्तव्युत्पत्तिभङ्गेन व्युत्पत्त्यन्तरकल्पनस्य प्रामाणिकत्वे तु नैयायिकाः षष्ठीतत्पुरुषस्थले 'राजपुरुष' इत्यादौ राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकृत्य तस्याभेदेन सम्बन्धेन पुरुषपदार्थेऽन्वयेन राजसम्बन्ध्यभिन्नः पुरुष इति शाब्दबोधो नाङ्गीक्रियेरन्। निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वादेव तैरेवमङ्गीक्रियते। एतद्व्युत्पत्तिभङ्गेनात्र स्वत्वसम्बन्धेन राजपदार्थस्य पुरुषपदार्थेऽन्वयोऽपि स्वीकर्तुं शक्यः। परन्तु तैस्तथा न क्रियते, प्रथमक्लृप्तव्युत्पत्तिभङ्गेन, अपरव्युत्पत्तिकल्पनस्यानौचित्याद्। अतः नामार्थभिन्नः सुबर्थलिङ्गसङ्ख्याव्यतिरिक्तः सर्वोऽपि भावनायामेवान्वेतीत्यङ्गीकाराद् व्युत्पत्तिभेदमङ्गीकृत्य तस्य तस्य पदार्थस्य योग्येन साक्षाद् सम्बन्धेन स्वस्वविशेष्य एवान्वयः समीचीन इति वादो न युक्तिसहः।

'चैत्रः ओदनं पचती'त्यत्र शाब्दबोध इत्थम् — चैत्रकर्तृका सामानाधिकरण्यसम्बन्धेन एकत्वविशिष्टं यदोदनवृत्ति कर्मत्वं, स्वनिरूपकपाकानुकूलत्वसम्बन्धेन तद्विशिष्टा, स्वनिष्ठकरणतानि-

रूपकौदनोद्देश्यकत्वसम्बन्धेन पाकविशिष्टा सामानाधिकरण्येनैकत्ववती वर्तमानकालिका भावना। इति।

'चैत्रेण ओदनः पच्यते' इत्यत्र शाब्दबोधप्रकारः — 'सामानाधिकरण्यसम्बन्धेन एकत्वविशिष्टं यद् चैत्रवृत्ति कर्तृत्वं, स्वनिरूपकपाकानुकूलत्वसम्बन्धेन तद्विशिष्टा स्वनिष्ठकरणतानिरूपकौदनोद्देश्यकत्वसम्बन्धेन पाकविशिष्टा स्वाश्रयौदनवृत्तिविक्लृप्तिजनकपाकानुकूलत्वसम्बन्धेन एकत्वविशिष्टा वर्तमानकालिकभावना' इति शाब्दबोधः।

'चैत्रेण सुप्यते' इति भावाख्यातस्थले चैत्रकर्तृका एकत्वविशिष्टस्वापवती स्वापभावनेति बोधः। भावाख्यातेनापि भावना बोध्यते, 'चैत्रेण स्वापः क्रियते' इति विवरणाद्। धात्वर्थस्वापोऽपि आख्यातार्थः। ...'भावेचाकर्मकेभ्यः' इत्यनुशासनाद्। सोऽपि भावनायामन्वेति। द्वितीयवारं स्वापबोधः साधुत्वार्थः।

'चैत्रो न पचति' इत्यत्र 'चैत्रकर्तृका पाकभावना अभावप्रतियोगिनी'ति बोधः। वस्तुतोऽत्र नञो लक्षणया चैत्रनिष्ठाभावोऽर्थः। अत्र 'चैत्रकर्तृका पाकभावना चैत्रनिष्ठाभावप्रतियोगिनी'त्यर्थ सिद्धेः, पचत्यपि चैत्रे 'न पचती'ति प्रयोगापत्तिर्न सम्भवति। नञः चैत्रनिष्ठाभावबोधकत्वानङ्गीकारे चैत्रकर्तृकपाकभावनायाः अन्यनिष्ठाभावप्रतियोगित्वेन पचत्यपि चैत्रे न पचति इति प्रयोगापत्तिः स्याद्। अथवा 'चैत्रो न पचति' इत्यादिनञ्समभिव्याहारस्थले आख्यातस्य कृत्यभावे लक्षणा। नञ्पदं तात्पर्यग्राहकम्। प्रथमान्तपदार्थ. आधेयतासम्बन्धेन कृत्यभावे अन्वेति। तथा च चैत्रनिष्ठः पाकानुकूलकृत्यभावः इति बोधः। अतो नातिप्रसङ्गः।

'चैत्र एव पचति' इत्यत्र चैत्रवृत्तिः चैत्रान्यावृत्तिश्च एककर्तृका पाकभावनेति बोधः।

'नीलो घट' इत्यत्र 'अस्तीति क्रियापदमध्याहार्यम्। आख्यातार्थः आश्रयत्वम्। नीलपदार्थः घटपदार्थश्च स्वकर्तृकस्थितिनिरूपितत्वसम्बन्धेन आख्यातार्थभावनायामन्वेति। (अत्र भावना

आश्रयत्वम् ।) नीलघटयोरभेदबोधो मानसः । अभेदबोधस्यापि शाब्दत्व यदि वक्तव्यं, तदा नीलस्य स्वाभिन्नघटकर्तृकस्थितिनिरूपितत्वसम्बन्धेन भावनायामन्वय इति स्वीकुर्याद् । नीलविशिष्टा घटविशिष्टा च स्थितिभावनेति बोधः ।

'घटः पटो ने'त्यत्र भवतीति क्रियापदमध्याह्रियते । पटपदं पटभिन्ने लाक्षणिकम् । नञ्पदं तात्पर्यग्राहकम् । पटपदार्थश्च स्वाभिन्नघटकर्तृकस्थितिनिरूपितत्वसम्बन्धेन भावनायामन्वेति । घटोऽपि स्वनिष्ठकर्तृत्वघटितसम्बन्धेन तत्रैवान्वेति ।

अतः प्रातिपदिकार्थव्यतिरिक्तः सुबर्थलिङ्गसङ्ख्याव्यतिरिक्तश्च सर्वोऽपि भावनायामेवान्वेतीति व्युत्पत्तिकल्पनालाघवमस्तीति सर्वत्र भावनामुख्यविशेष्यक एव शाब्दबोधः ।

**वैयाकरणमतम्**

वैयाकरणाः धात्वर्थमुख्यविशेष्यकं बोधमङ्गीकुर्वन्ति । 'भावप्रधानमाख्यात'मिति निरुक्तपङ्क्ति, 'क्रियाप्रधानमाख्यात'मिति महाभाष्यपङ्क्तिञ्च प्रमाणतयोद्धरन्ति ।

'भावप्रधानमाख्यातम्' इत्यत्राख्यातपदं तिङन्तमभिधत्ते । 'आख्यातमाख्यातेन क्रियासातत्ये' इत्यादौ आख्यातशब्दः तिङन्तवाची । अतः तिङन्तं भावप्रधानमित्यर्थः सिद्ध्यति । [1]'भाव'श्च धात्वर्थः । 'प्रधान'त्वञ्च मुख्यविशेष्यत्वम् । तथा च तिङन्तजन्यबोधे धात्वर्थः मुख्यविशेष्यतया भासत इत्यर्थः सिद्ध्यति ।

नमति आख्यातार्थं प्रति विशेषणीभवतीति नाम । सुबन्तं नामपदेन व्यवह्रियते । सुबन्तार्थश्च सर्वत्र तिङन्तार्थविशेषणं भवति । अतः सर्वत्र धात्वर्थमुख्यविशेष्यक एव बोध इति सिद्ध्यति ।

तिङन्ते धातुः प्रत्ययश्चेति द्वौ भागौ वर्तेते । तत्र धातोः फलं व्यापारश्चार्थः । प्रत्ययस्य कालः सङ्ख्या कर्ता कर्म चार्थः ।

---

1 'धात्वर्थः केवलः शुद्धः भाव इत्यभिधीयते ।'

तत्र व्यापाराश्रयः कर्ता। फलाश्रयं कर्म। व्यापारस्य फलस्य च धातुनैव लाभाद् प्रत्ययस्य तिङः आश्रयत्वमेवार्थः। तिङर्थः कर्त्रादिः धात्वर्थे प्रकारतयान्वेति।

एवञ्च वाक्ये सुबन्तार्थः तिङन्तार्थे विशेषणं, तिङन्ते च धात्वर्थः प्रधानम्। प्रत्ययार्थः धात्वर्थे विशेषणतया भासते। धात्वर्थश्च फलं व्यापारश्चेत्युक्तम्। तत्र नवीनवैयाकरणमते, कर्तरिप्रयोगे व्यापारमुख्यविशेष्यकः, कर्मणिप्रयोगे फलमुख्यविशेष्यकश्च शाब्दबोधः। प्राचीनवैयाकरणमते तु उभयोरपि प्रयोगयोः व्यापारमुख्यविशेष्यक एव शाब्दबोधः। तिङर्थः कर्त्रादिः धात्वर्थे विशेषणम्।

'यत्रोभे भावप्रधाने भवत' इति निरुक्तपङ्क्तिव्याख्यानावसरे निरुक्तभाष्यकारैरेवमुच्यते — [1]"नामाख्यातयोः परस्परविनाभूतयोः स्वस्वपदार्थोक्तौ एकस्य भावप्राधान्यमन्यस्य सत्त्वप्राधान्यम्। अथ पुनः यत्र वाक्ये ते उभे नामाख्याते भवतः तत्र वाक्ये भावप्रधाने — आख्यातार्थप्रधाने। वाक्ये हि आख्यातं प्रधानम्। तदर्थत्वाद् गुणभूतं नाम। तदर्थस्य भावनिष्पत्तावङ्गत्वाद्। एवं तावद्वाक्ये आख्यातं प्रधानम्" इति। अतः सुबन्ततिङन्तसमुदायरूपे वाक्ये धात्वर्थमुख्यविशेष्यतयैव बोधस्सम्भवतीति प्रामाणिकानां मतमिति सिद्धयति।

'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येने'ति न्यायः सुबर्थविषयत्वेन सङ्कोचनीयः। 'अवर्णादचि परे पूर्वपरयोरेको गुण आदेशो भवती'ति 'आद्गुण' (६-१-८७) इति सूत्रेण विधीयते। 'वृद्धिरेचि' (६-१-८८) इति सूत्रेण तु अवर्णादेचि परे वृद्धिरेकादेशस्स्यादिति विधीयते। तथा चावर्णादेच्भिन्नेऽचि परे गुणः स्यादिति आद्गुणसूत्रार्थः पर्यवस्यति। तथैव, 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येने'ति प्रत्ययार्थस्य प्राधान्यबोधकस्यास्य न्यायस्यापि सुबर्थविषयत्वेनार्थसङ्कोचः क्रियते, 'भाव-

1 उद्धरणी-शा. त. (षष्ठे तरङ्गे) पृष्ठं १७२.

प्रधानमाख्यातम्' इति विशेषस्मृतिसत्त्वाद्। सुबर्थेऽपि लिङ्गः सङ्ख्या च प्रातिपदिकार्थे विशेषणम्। लिङ्गसङ्ख्याव्यतिरिक्तः सुबर्थ एव प्रातिपदिकार्थविशेष्यम्।

'भावप्रधानमाख्यात'मित्यस्य धात्वर्थापेक्षया भावनायाः (कृतेः) प्रधानत्वमित्यर्थवर्णनमपि न सङ्गच्छते। 'प्रत्ययार्थः प्रधानं स्याद् प्रकृत्यर्थो विशेषण'मिति न्यायेनैव सिद्धत्वाद् पुनः प्रत्ययार्थस्य भावनायाः प्राधान्यबोधकत्वं व्यर्थं स्याद्।

सर्वत्र प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधो भवतीति वादोऽपि न युक्तः। पाकक्रिया भवतीत्यर्थे 'पचति भवती'ति प्रयोगो भाष्यसम्मतः। अत्र धात्वर्थस्यैव प्राधान्यम्। नात्र प्रथमान्तपदम्, यस्यार्थः धात्वर्थविशेष्यतया भासेत।

किञ्च प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधस्वीकारे 'पश्य मृगो धावती'त्यत्र एकवाक्यता न स्याद्।

'पश्य मृगो धावती'त्यत्र 'मृगो धावती'त्यंशस्य मृगकर्तृकं धावनमित्यर्थः। धावनपदार्थस्य कर्मतासम्बन्धेन दर्शनपदार्थेऽन्वयः। मृगकर्तृकधावनकर्मकं दर्शनमित्यर्थः। अत्र न कापि व्युत्पत्तिर्विरुध्यते। कर्मबोधकस्य धातुत्वाद्, प्रातिपदिकसंज्ञाया अभावाद् न द्वितीयापत्तिः।

प्रथमान्तार्थमुख्यविशेष्यकत्वे तु 'पश्य मृगो धावती'त्यत्र मृगो धावतीत्यंशस्य धावनानुकूलकृतिमान् मृग इति बोधः। तत्र धावनस्य कृतौ विशेषणत्वाद् दृश्धात्वर्थे दर्शने विशेषणतया –(कर्मतया)न्वेतुं न शक्यते, [1]'एकत्र विशेषणतये –' ति व्युत्पत्तेर्विरोधात्। अतः 'पश्य मृगो धावती'त्यत्र 'धावनानुकूलकृतिमान्, मृगः, दर्शनाश्रयस्त्वम्' इति बोधो वक्तव्यः। तथा च वाक्यभेदः। धावनानुकूलकृतिमन्मृगस्यैव विषयतापर्यवसितेन कर्मतासम्बन्धेनान्वयः। तथा

---

1 'एकविशेषणवैशिष्ट्येनोपस्थिते तज्जातीयसम्बन्धेन विशेषणान्तरान्वयो ने'ति व्युत्पत्तिः।

च धावनानुकूलकृतिमन्मृगविषयकदर्शनाश्रयस्त्वम्' इति शाब्दबोधः, अतः अत्रापि युष्मच्छब्दार्थस्यैव मुख्यविशेष्यत्वमिति, एकमुख्यविशेष्यकबोधजनकत्वरूपैकवाक्यत्वमस्त्येव, अनेकमुख्यविशेष्यकबोधजनकत्वरूपवाक्यभेदो नास्तीति कथनमप्यसङ्गतम्। मृगस्य दर्शनकर्मत्वविवक्षायां मृगपदोत्तरं द्वितीया वक्तव्या स्याद् 'कर्मणि द्वितीया' (२-३-२) इत्यनुशासनाद्। प्रातिपदिकार्थस्य विशेष्यतया कर्मत्वविवक्षायामेव द्वितीया भवति, अत्र मृगस्य कर्मतासम्बन्धेन दर्शने अन्वय इत्यपि न समीचीनम्। तथा सति नामार्थधात्वर्थयोः साक्षाद् भेदेन सम्बन्धेनान्वयस्याव्युत्पन्नत्वाद् इति व्युत्पत्तिविरोधः। नामार्थस्य मृगपदार्थस्य भेदसम्बन्धेन कर्मतया धात्वर्थे दर्शने साक्षादन्वयः व्युत्पत्तिविरुद्धः। एतस्याः व्युत्पत्तेः स्वीकार आवश्यकः। अन्यथा तण्डुलस्य कर्मतासम्बन्धेन धात्वर्थे पाके साक्षादन्वयस्यापि वक्तुं शक्यतया 'तण्डुलं पचती' त्यर्थे 'तण्डुलः पचती'ति प्रयोगापत्तिः। तण्डुलं पचतीत्यर्थे तण्डुलः पचतीति न कोऽपि प्रयुनक्ति। अतः नामार्थधात्वर्थयोः साक्षाद् भेदेनान्वयबोधो नेत्यङ्गीकरणीयम्। तथा च मृगस्य कर्मतासम्बन्धेन दर्शनेऽन्वयः न सम्भवति। अतः द्वितीयापत्तिर्वर्तत एव। द्वितीयायां सत्यां 'लटः शतृशानचावप्रथमासमानाधिकरणे' (पा-सू. ३-२-१२४) इति तत्र शतृप्रत्ययः स्याद् इति तु नापादनीयम्। यतः शत्रापत्तिः न द्वितीयाबाधिका, अपि तु कर्मणोऽभिधानमेव द्वितीयाबाधिका। अत्र च तिङा कर्मणः अभिधानाभावाद् 'कर्मणि द्वितीया' इति द्वितीया स्यादेव। तथा च 'धावन्तं मृगं पश्ये'ति वाक्यमुचितं न तु 'पश्य मृगो धावती'ति वाक्यम्। 'पश्य मृगो धावती'त्यत्र तमित्यध्याहारे वाक्यभेदः। 'धावनानुकूलकृतिमान् मृगः, दर्शनाश्रयस्त्व'मित्यर्थवर्णने तु [1]भाष्योक्तरीत्या धावनस्य दर्शनाक्रियाकर्मत्वं न सम्भवति।

न च 'पश्य मृगो धावती'त्यत्र दर्शनक्रियाकर्म न मृगः, परन्तु धावनविशिष्टमृगः, तत्प्रतिपादकं 'धावति मृग' इति वाक्यं,

---

1 'क्रियापि कृत्रिमं कर्म। क्रियापि हि क्रिययेप्सिता भवति। कया क्रियया। सन्दर्शनक्रियया' इति — महाभाष्यम्।

तस्य च वाक्यस्य प्रातिपदिकसंज्ञाविरहान्न द्वितीयापत्तिः। नामार्थस्यैव धात्वर्थेन सह साक्षात् भेदसम्बन्धेनान्वयबोधः अव्युत्पन्नः। 'धावति मृग' इत्यस्य नामत्वं न विद्यते। तथा च व्युत्पत्तिविरोधोऽपि न। कर्मतासम्बन्धेन धावनविशिष्टमृगस्य धात्वर्थे दर्शनेऽन्वयः। तथा च धावनविशिष्टमृगस्य दर्शनकर्मत्वबोधे विशेषणीभूतस्य धावनस्यापि दर्शनकर्मत्वं सम्भवतीति महाभाष्योक्तं धावनक्रियाया अपि दर्शनक्रियाकर्मत्वञ्चोपपद्यत इति वाच्यम्। एवं कथने वाक्यैकवाक्यता एव सम्भवति, भाष्ये तु पदैकवाक्यतोक्ता। प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधवादिनां मते 'पश्य मृगो धावती' त्यत्र पदैकवाक्यता न स्याद्।

अतः निरुक्तमहाभाष्यकारादिमहर्षिसम्मतः धात्वर्थमुख्यविशेष्यक एव बोधः सम्यक्।

**प्राचीनवैयाकरणमतमनुसृत्य शाब्दबोधप्रकारः**

चैत्रस्तण्डुलं पचती'त्यत्र तण्डुलपदोत्तरद्वितीयायाः आश्रयोऽर्थः। 'कर्मणि द्वितीया' इत्यनुशासनाद् कर्मत्वं द्वितीयार्थः। कर्मत्वञ्च फलाश्रयत्वम्। तत्र फलं धात्वर्थतया सिद्ध्यति। अतः आश्रयः द्वितीयार्थः। तण्डुलरूपप्रकृत्यर्थः द्वितीयार्थे आश्रये अभेदेन सम्बन्धेनान्वेति। पच् धातोः विक्लित्तिः व्यापारश्चार्थः। द्वितीयार्थः आश्रयः स्ववृत्याश्रयत्वनिरूपकसम्बन्धेन विक्लित्तिरूपफलेऽन्वेति। विक्लित्तिः जनकतासम्बन्धेन व्यापारेऽन्वेति। 'ति' इत्याख्यातस्य कर्ता एकत्वसङ्ख्या वर्तमानकालश्चार्थः। प्रथमान्तार्थः चैत्रः अभेदेन तिङर्थे कर्तरि अन्वीयते। तिङर्थसङ्ख्या समानपदोपात्ते कर्तरि अन्वीयते। तिङर्थः कर्ता कालश्च धात्वर्थे व्यापारे अन्वीयेते। तथा च 'चैत्रस्तण्डुलं पचती'त्यत्र तण्डुलाभिन्नाश्रयकविक्लित्यनुकूलः चैत्राभिन्नैककर्तृकः वर्तमानकालिकः व्यापार इति बोधः।

'चैत्रेण पच्यते तण्डुल' इत्यत्र चैत्रेणेति तृतीयाया आश्रयोऽर्थः। चैत्रपदार्थः तृतीयार्थे आश्रये अभेदेनान्वेति। 'पच्यत' इत्यत्र 'त'

इति तिङः आश्रयः सङ्ख्या कालश्चार्थः। तिङर्थे आश्रये प्रथमान्ततण्डुलपदार्थः अभेदेनान्वेति। तिङर्थः एकत्वसङ्ख्या तिङर्थे आश्रये अन्वेति एकपदोपात्तत्वाद्। सङ्ख्यान्वितः आश्रयः धात्वर्थे फले अन्वेति, फलञ्च व्यापारेऽन्वेति। तिङर्थः वर्तमानकालः धात्वर्थे व्यापारेऽन्वेति। तण्डुलाभिन्नैकाश्रयकविक्लृत्यनुकूलः चैत्राभिन्नाश्रयकः वर्तमानकालिकः व्यापार इति बोधः।

'चैत्रेण सुप्यत' इत्यत्र तिङ् धात्वर्थस्वापानुवादकः वर्तमानकालबोधकश्च। चैत्राभिन्नाश्रयकः वर्तमानस्वाप इति बोधः।

'चैत्रो न पचती'त्यत्र 'चैत्रकर्तृकपाकाभाव' इति बोधः।

**नव्यवैयाकरणमतमनुसृत्य शाब्दबोधप्रकारः**

'चैत्रस्तण्डुलं पचती'ति वाक्ये तण्डुलपदोत्तरद्वितीयायाः 'कर्मणि द्वितीया' इति कर्मत्वशक्तिमान् अर्थः।

'कष्टं श्रितो भवती'त्यत्र क्रियाकारकयोरभिसम्बन्धस्य द्वितीया वाचिका भवती'ति समर्थसूत्रभाष्याद् क्रियाकारकभावसम्बन्धः अपि द्वितीयार्थः। भेदसमानाधिकरणविशेषणत्वज्ञाने एव सम्बन्धाकाङ्क्षा जायत इति विशेषणत्वमपि द्वितीयार्थः। एवञ्च कर्मत्वशक्तिमान्, क्रियाकारकभावः विशेषणत्वञ्च द्वितीयार्थः। तत्र कर्मत्वशक्तिरखण्डा, न तु क्रियाजन्यफलाश्रयत्वम्। अत्र कर्मत्वशक्तिः प्रकृत्यर्थे विशेषणं, पञ्चकं प्रातिपदिकार्थ इति व्यवस्थापितत्वाद्।

'पचती'त्यत्र 'ति' इति तिङः कर्तृत्वशक्तिमान्, कालः सङ्ख्या चार्थः। धातोः फलावच्छिन्नव्यापार, व्यापारावच्छिन्नफलश्चार्थः। कर्तरिप्रयोगे फलावच्छिन्नव्यापारः, कर्मणिप्रयोगे व्यापारावच्छिन्नफलञ्चेति विवेकः। अत्र पच्धातोः विक्लृत्यवच्छिन्नव्यापारोऽर्थः। 'चैत्रस्तण्डुलं पचती'त्यत्र कर्मीभूततण्डुलविशिष्टः चैत्राभिन्नकर्तृकः वर्तमानः पाक इति बोधः।

कर्माख्याते कर्त्राख्याते च व्यापारमुख्यविशेष्यकशाब्दबोधस्वीकारे तयोर्भिन्नार्थकत्वं न स्याद्। 'सुप आत्मनः क्यच्' इति सूत्रभाष्ये,

'इष्यते पुत्र इत्यर्थे पुत्रीयतीति न। भिन्नार्थकत्वाद्। किन्तु पुत्रमिच्छतीत्यर्थ एवे'त्युक्तम्। अतः कर्माख्याते कर्त्राख्याते च व्यापारमुख्यविशेष्यकशाब्दबोधस्वीकारे तयोर्भिन्नार्थकत्वाभावाद् भाष्यासङ्गतिः।

'चैत्रो न पचति' इत्यत्र आरोपिता चैत्रकर्तृकपाकक्रियेति बोधः। ततः पाकाभावबोधो मानसो जायते।

'चैत्र एव पचती'त्यत्र एवकारार्थः अवधारणम्। तच्च ज्ञानविशेषः अवधारणत्वेन भासते। अवधारणविषयचैत्रकर्तृकः पाक इत्यन्वयबोधः।

**नैयायिकमतम्।**

नैयायिकाः प्रथमान्तार्थमुख्यविशेष्यकबोधवादिनो भवन्ति। तेषामयमाशयः — 'पण्डितश्चैत्र' इत्यादितिङन्तरहितमपि वाक्यं प्रयुज्यमानं द्रष्टुं शक्यते। 'पण्डिताभिन्नश्चैत्र' इति तत्र बोधः। अत्र प्रथमान्तार्थः चैत्र एव मुख्यविशेष्यतया भासते। तिङन्तं पदं तु नात्र वर्तते। अतः धात्वर्थस्य, आख्यातार्थस्य वा मुख्यविशेष्यत्वं सम्भवतीति वक्तुन्न शक्यम्। 'अस्तिर्भवन्तीपरः प्रथमपुरुषः अप्रयुज्यमानोऽप्यस्ति' इति कात्यायनवचनानुसारेण अत्र क्रियापदाध्याहार आवश्यक इति न वक्तव्यम्। 'त्वं पण्डितः' 'अहं पण्डित' इत्यादौ अस्तीत्यध्याहारस्यायुक्तत्वाद्। प्रातिपदिकार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन सुबजन्योपस्थितिः कारणं, सुबर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन क्रियापदजन्योपस्थितिः कारणमिति कार्यकारणभावेन सर्वत्र क्रियापदाध्याहारः सिद्ध्यति, अतो'हं पण्डितः' 'त्वं पण्डित' इत्यादिस्थलेऽपि क्रियापदाध्याहारो वक्तव्य इति वादो युक्तिहीनः। कुत इति चेद् प्रातिपदिकार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन सुब्जन्योपस्थितिः कारणमित्यादिरूपकार्यकारणभावस्यैवासम्भवाद्। सुप्त्वं न जातिः अम्त्वादिना साङ्कर्याद्। जातित्वाभावाच्च सुप्त्वेन सकलसुपां ग्रहणं न जायते। एवं प्रातिपदिकत्वमपि न जातिः। अतः अनुगताननतिप्रसक्तानां सुप्त्वप्रातिपदिकत्वादीनां ग्रहणासम्भवाद्

उपर्युक्तकार्यकारणभावस्यैवासम्भवः। अत उक्तकार्यकारणभावेन 'त्वं पण्डित' 'अहं पण्डित' इत्यादौ क्रियापदस्याध्याहार आवश्यक इत्युक्तिर्न समञ्जसा। 'अस्तिर्भवन्तीपरः प्रथमपुरुषः अप्रयुज्यमानोऽप्यस्ति' इति वाक्ये अस्तिपदं सामान्यतः धातुमभिधत्ते, भवन्तिपदञ्च सकललकारमप्यभिधत्ते, अतः सर्वत्र यथायोगं क्रियापदाध्याहारः कर्तव्य इति कात्यायनसम्मतोऽर्थ इति वादोऽपि न समीचीनः, 'न विधौ परः शब्दार्थ' इति वचनमनुसृत्य विधायकवाक्ये लक्षणायाः स्वीकारस्यायुक्तत्वाद्।

वस्तुतः सर्वत्र क्रियापदाध्याहारः कर्तव्य इत्यर्थो मुनिना नैडद्वाक्यमुपदिष्टम्। 'कल्की म्लेच्छान्तक' इत्यत्रास्तीति लडन्तस्याध्याहारो न युज्यते तत्र भाविकालवाचकक्रियापदस्यैवोपपत्तेः। एवं 'रामो रावणस्य हन्ते'त्यत्रापि अस्तीति लडन्तास्धातोरध्याहारो न युज्यते, तत्र भूतकालवर्तिक्रियाया एवोपपत्तेः। एवं कालस्य विभागपरे वाक्ये 'त्रयः काला' इत्यत्र 'सन्ती'त्यध्याहारोऽपि सुतरां न युज्यते। अतः यत्र प्रयोक्तुरस्तित्वविवक्षा तत्र तद्बोधायास्तिपदमध्याहार्यमित्येव 'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति' इत्यस्यार्थः।

वैयाकरणा अपि तिङन्तशून्यं वाक्यमभ्युपगच्छन्ति। 'भूषणसारे' श्रीकौण्डभट्टाः धात्वर्थनिरूपणस्य प्राथम्यं वर्णयन्तः तिङन्तशून्यं वाक्यं भवतीत्यभ्युपगच्छन्तीति ज्ञातुं [1]शक्यते। आख्यातार्थव्यापाराश्रयत्वस्य कर्तृत्वस्वरूपत्वनिरासकः "तस्मिन् प्रयोगे य आख्यातार्थ इत्यस्यावश्यकत्वेन आख्यातशून्ये देवदत्तः पक्तेत्यादौ देवदत्तस्याकर्तृत्वापत्ते" इति भूषणसारग्रन्थः स्पष्टमेव [2]तिङन्तरहितं वाक्यमाचष्टे।

---

1 'प्रायशो वाक्यस्य सुप्तिङन्तसमुदायत्वाद्, सुबन्तानाञ्च प्रायः क्रियाविशेषणत्वाद्, धातोश्च क्रियावाचकत्वेन पुरःस्फूर्तिकत्वाद् इच्छावशाद्वा प्रथमतो धात्वर्थनिरूपणं बोध्यम्'। भू. सा.

2 शा. त. (षष्ठे तरङ्गे)।

लघुमञ्जूषायामपि श्रीनागेशभट्टः 'सुप्तिङन्तचयो वाक्य'मित्यस्य 'सुबन्तचयः तिङन्तचयः, सुप्तिङन्तचय' इति विवरणं करोतीत्यतः सुबन्तचयात्मकं वाक्यं नवीनवैयाकरणैरप्यङ्गीक्रियत इति ज्ञातुं शक्यम्। चैत्रेण शयितव्यमिति प्रयोगो तैरिष्यत एव। तत्र शयितव्यमिति प्रथमान्तपदम्। न च तस्य तिङ्सामानाधिकरण्यमस्ति। यदि तत्रापि प्रथमासाधुत्वायास्तिपदमध्याह्रियते, तदा सुबन्तचयपर्याप्तत्वं तद्वाक्यस्य न सम्भवति। यदि च तिङ्समानाधिकरणयोग्यत्वमेव वार्तिके विवक्षितमिति तत्र प्रथमा उपपाद्यते तदा तथैव 'चैत्रः पण्डित' इत्यादावपि प्रथमानिर्वाहः सम्भवति। अतः पण्डिताभिन्नश्चैत्र इति शाब्दबोधः अस्तिपदाध्याहारवादिभिरपि अङ्गीकरणीयः। तस्माद् चैत्रः पण्डित इत्यादौ प्रथमान्तार्थमुख्यविशेष्यको बोधः क्लृप्त इति सति सम्भवे प्रथमान्तार्थमुख्यविशेष्यक एव बोधः स्वीकर्तुमुचितः।

'चैत्रस्तण्डुलं पचति' इत्यत्र तण्डुलपदोत्तरद्वितीयायाः कर्मत्वमर्थः। प्रातिपदिकार्थविशेष्यतया कर्मत्वे विवक्षित एव द्वितीया विधीयते। अतस्तण्डुलपदार्थस्य द्वितीयार्थकर्मत्वेऽन्वयः। तस्य च पच्धात्वर्थपाके पाकस्यानुकूलतासम्बन्धेन कृतौ, कृतेश्च प्रथमान्तार्थेऽन्वयः। कृतिश्च व्यापाररूपा शुद्धं प्रथमान्तार्थमपेक्षते।

'चैत्र' इत्यादिषु प्रथमान्तेषु प्रथमायाः प्रातिपदिकार्थ एवार्थ इत्यसङ्गतम्। तस्यार्थस्य प्रातिपदिकेनैव लाभाद्। अनन्यलभ्यः शब्दार्थ इति न्यायेन प्रथमाया तदर्थत्वकथनं न चारुतरम्। चैत्रपदोत्तरप्रथमाया चैत्र इत्यर्थः चैत्रपदं तात्पर्यग्राहकमिति कल्पने तु अनन्तानां प्रातिपदिकानां व्यर्थत्वापरपर्यायतात्पर्यग्राहकत्वकल्पनापेक्षया प्रथमायाः प्रयोगसाधुत्वसम्पादकताकल्पनमेवोचितम्। [1]'तटान्' 'तटीः' इत्यादिप्रथमारहितस्थल इव 'तटः' 'तटी' इत्यत्रापि लिङ्गबोध इति प्रथमायाः लिङ्गमर्थ इत्युक्तिरपि न युक्ता। एवं प्रथमारहितस्थले 'द्रोणं व्रीहिमानये'त्यत्र द्रोणपदस्य द्रोणपरिमिते लक्षणास्वीकार इव 'द्रोणो व्रीहि'रिति प्रथमास्थले अपि द्रोणपदस्य लक्षणस्वीकार एवोचितः। अतः प्रथमायाः संख्यैवार्थः।

---

1 शा. त. (षष्ठे तरङ्गे)

संख्या च प्रातिपदिकार्थे अन्वेति न तु प्रातिपदिकार्थः सङ्ख्यायाम्। तथा सति सङ्ख्याया धात्वर्थे परम्परासम्बन्धेनान्वयो वाच्यः। तथा च गौरवम्। अतः सङ्ख्या प्रातिपदिकार्थे अन्वेतीति स्वीकार एवोचितः। तथा च चैत्र इति पदस्य एकत्वविशिष्टः चैत्र इत्यर्थः।

प्रथमाविभक्तेः कर्तृत्वमर्थः इति यदुक्तं तन्न युक्तम्। आख्यातेन कर्तृत्वाभिधानाद्। अनन्यलभ्यस्यैव शब्दार्थत्वाद्। आख्यातेन सामान्यतः कर्तृत्वमभिधत्ते तस्य चैत्रनिष्ठत्वेन बोधार्थं प्रथमायाः कर्तृत्वार्थकत्वं स्वीकर्तव्यमित्यपि न युक्तम्। आख्यातार्थस्य प्रथमान्तार्थे अन्वयेनैव चैत्रवृत्तिकर्तृत्वमित्यस्यार्थस्य लाभाद्। कर्तृत्वञ्च कृतिरेव। कृत्यतिरिक्तस्य कर्तृत्वस्याप्रामाणिकत्वाद्। यत्राख्यातेन कृतिरूपकर्तृत्वमभिधीयते, तस्मिन् वाक्ये धात्वर्थव्यापाराश्रय चैत्रादिपदात् प्रथमा।

आख्यातेन कृत्यभिधानस्य प्रथमाप्रयोजकत्वे 'चैत्रेण सुप्यत' इत्यादि भावाख्यातस्थलेऽपि भावाख्यातेन कृतिरभिहितेति चैत्रपदोत्तरं प्रथमा स्यादित्याशङ्का अनुचिता। भावाख्यातेन कृतिरूपस्य कर्तृत्वस्यानभिधानाद्। अतः चैत्रादिपदोत्तरं तृतीयैव। 'प्रातिपदिकार्थनिष्ठे कर्तृत्वादिके समभिव्याहृताख्यातादिना अभिहिते सति तत्प्रातिपदिकोत्तरं प्रथमा' इत्येव 'अभिहिते प्रथमा' इति वार्तिकस्यार्थः।

तथा च प्रथमान्तार्थः कुत्रापि विशेषणतया नान्वेति। अतः प्रथमान्तार्थ एव मुख्यविशेष्यः।

प्रथमान्तार्थस्य चैत्रादेः प्रथमार्थे अन्वयाभावेऽपि आख्यातार्थ कृतौ आधेयतासम्बन्धेनान्वय इति स्वीकारे नामार्थयोः साक्षाद् भेदसम्बन्धेनान्वयो नास्तीति व्युत्पत्तिविरोधो न आख्यातार्थकृते नामार्थत्वाभावाद्। तथा च प्रथमान्तार्थः विशेषणतयान्वेतीति प्रथमान्तार्थस्य न मुख्यविशेष्यत्वमिति वादोऽपि न समीचीनः। अनुभवानुरोधेन युक्त्यनुरोधेन च प्रथमान्तार्थस्य मुख्यविशेष्यत्वं वाक्यजन्यबोधे नैयायिकैरभ्युपगम्यते।

तथा हि — तच्छब्दः पूर्ववाक्ये यः प्रधानं तं परामृशति। [1]'पुरुषः प्रयाति, तस्य पादयोरभिवादये'त्यत्र तच्छब्दः पुरुषं परामृशति। यदि तत्र 'यानानुकूलकृतिमान् पुरुष' इति प्रथमान्तार्थ मुख्यविशेष्यकः बोधः न भवति, तर्हि तच्छब्दः पुरुषपरामर्शी न भवेत्। धात्वर्थस्य भावनाया वा तत्र तच्छब्दपरामर्शित्वं न सम्भवति, बाधितत्वाद्। एवञ्च वाक्ये प्रथमान्तार्थ मुख्यविशेष्यक एव बोधः उपपन्नः। 'यो यः शूद्रस्य पचति, द्विजोऽन्नं सोऽतिनिन्दित' इति वाक्येऽपि तच्छब्दः प्रथमान्तार्थ द्विजपरामर्शी। अतः अनुभवानुरोधात् युक्त्यनुसारित्वाच्च प्रथमान्तार्थ मुख्यविशेष्यकबोध एव स्वीकार्यः।

'भावप्रधानमाख्यात'मिति निरुक्तवचनाद् धात्वर्थ मुख्यविशेष्यक एव बोधस्सम्भवतीति कथनन्न चारुतरम्। 'भावप्रधानमाख्यात'मिति निरुक्तपङ्क्तेः भावनाप्रधानमाख्यातमित्यर्थ वर्णनमेव नैयायिका अभ्युपगच्छन्ति। भावना च कृतिः। कत्राख्याते कर्तृत्वं, कर्माख्याते कर्मत्वं, आश्रयत्वं प्रतियोगित्वमित्यादयो भावनापदव्यपदेश्याः। एवञ्च धात्वर्थ निष्ठप्रकारतानिरूपितभावनानिष्ठविशेष्यताशालिबोधजनकमाख्यातमिति फलितम्। तथा च 'धात्वर्थापेक्षया प्रत्ययार्थस्य प्राधान्यम्' इत्यर्थः। 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोस्तु प्रत्ययः प्राधान्येने'ति व्युत्पत्तिं वैयाकरणा सुबर्थविषयतया सङ्कोचयन्ति। तत्तु न समञ्जसम्। सुबन्ते तिङन्ते च प्रकृत्यर्थापेक्षया प्रत्ययार्थस्यैव प्राधान्यम्। प्रथमायाश्च सङ्ख्यातिरिक्तार्थाभावाद्, सङ्ख्यायाश्च प्रातिपदिकार्थे साक्षात्सम्बन्धेनान्वयात् प्रथमान्तार्थः न कुत्रापि विशेषणतयान्वेति। 'न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्यय' इत्यनुसारेणैव प्रथमाविभक्तिः प्रातिपदिकाद्विधीयते। अतः प्रथमा प्रयोगसाधुत्वार्था एव। प्रथमान्तार्थस्य च मुख्यविशेष्यतया बोधः।

'चैत्रेण सुप्यते' इत्यत्र तु धात्वर्थमुख्यविशेष्यक एव बोधः।

---

1 शा. त. (षष्ठे तरङ्गे)

तत्र प्रथमान्तपदाभावाद्। [1]शिरोमणिभट्टाचार्यैः आख्यातवादे, 'चैत्रेण सुप्यते' 'गगनेन स्थीयत' इत्यादौ आख्यातार्थमुख्यविशेष्यको बोध इति स्वीकृतम्। तथाचात्र चैत्रकर्तृकस्वापाश्रयत्वमिति शिरोमणिसम्मतो बोधः।

अत्र धात्वर्थमुख्यविशेष्यकबोधस्वीकारेऽपि नैयायिकमते न कोऽपि दोषः। न हि तैः प्रथमान्तपदासमभिव्याहारस्थलेऽपि प्रथमान्तपदमध्याहृत्य प्रथमान्तमुख्यविशेष्यक एव बोधस्सम्भवतीति निर्बध्यते, परन्तु अनुभवानुरोधेन युक्त्यनुसारेण च प्रथमान्तपदसमभिव्याहारे प्रायः प्रथमान्तार्थमुख्यविशेष्यको बोधस्सम्भवतीत्येव स्वीक्रियते। धात्वर्थमुख्यविशेष्यकबोधवादिनां वैयाकरणानामपि मते सर्वत्र धात्वर्थमुख्यविशेष्यक एव बोधस्सम्भवतीति स्वीकर्तुं न शक्यते। वृत्तिविग्रहवाक्ययोः समानविशेष्यकसमानप्रकारकबोधजनकत्वं तैरङ्गीक्रियते। वैयाकरणपदस्य व्याकरणमधीत इति विग्रहवाक्यम्। तत्र व्याकरणाध्ययनकर्ता इति बोधः वैयाकरणा अङ्गीकुर्वन्ति। तथा च तत्र ते न धात्वर्थमुख्यविशेष्यकं बोधमित्यङ्गीकुर्वन्ति। एवं नैयायिका अपि भावाख्यातस्थले धात्वर्थमुख्यविशेष्यकं बोधमङ्गीकुर्वन्ति। न हि व्युत्पत्त्यनुसारेण बोधः कल्प्यन्ते, परन्तु बोधानुसारेण व्युत्पत्तयः कल्प्यन्ते।

'भावप्रधानमाख्यातम्' इति निरुक्तपङ्क्तिः धात्वर्थमुख्यविशेष्यकबोधवादिभिः वैयाकरणैः यद्यपि प्रमाणीक्रियते तथापि निरु-

---

1 चैत्रेण सुप्यत इत्यत्रापि 'चैत्रकर्तृकस्वापाश्रयत्व'मित्याकारस्य धात्वर्थप्रकारकस्य आश्रयत्वरूपभावनाविशेष्यकत्वस्य बोधस्य जननेन लक्षणसङ्गमनाद्। अयञ्च बोधः शिरोमणिसम्मतः। "चैत्रेण सुप्यते गगनेन स्थीयत इत्यादौ प्रथमान्तपदाभावाद् धात्वर्थस्य भावनाया विशेषणतयैवान्वयस्य व्युत्पन्नत्वाद् भावनाया बाधितत्वाच्च भावनाविशेष्यविरहादनन्वितैव सङ्ख्या, एकवचनन्तु साधुत्वार्थम्"। इति आख्यातवादे शिरोमणिभट्टाचार्या निरुपयन्ति। 'भावना विशेष्यविरहाद' इत्यनेन भावनाविशेष्यको बोधस्तत्र, न तु भावना विशेषणकेतरविशेष्यको बोध इति लभ्यते'। शा. त. (षष्ठे तरङ्गे) पृष्ठम् १८४.

क्तोक्तमन्यदपि तैः प्रमाणीक्रियत इति वक्तुन्न शक्यते। निरुक्त-भाष्यस्वरसाद् सकलकारकसङ्ख्याविशिष्टभावना धात्वर्थ इत्यभि-प्रायेण निरुक्तपङ्क्तिः प्रवृत्तेति विज्ञातुं शक्यते। कारकस्य धात्वर्थ-त्वन्तु न युज्यते। महाभाष्ये यद्यपि कारकस्य धात्वर्थतोक्ता तथापि कारकस्य प्रत्ययवाच्यताप्युक्ता। आकरग्रन्थव्युत्पादितेषु यः पक्षः युक्तः स एव गृह्यते। वैयाकरणाश्च कारकस्य प्रत्ययवा-च्यतामङ्गीकुर्वन्ति, न तु धातुवाच्यत्वम्। अतः निरुक्तोक्तं सर्वमपि वैयाकरणैः न प्रमाणीकुर्वन्तीति विज्ञायते। अतोऽपि 'भावप्रधान-माख्यातम्' इति निरुक्तपङ्क्ति धात्वर्थमुख्यविशेष्यकबोधस्थापनार्थं प्रमाणीकृत्य तद्भिन्नतया बोधस्वीकाराद् इतरमतेषु दोषसंसूचनं न युज्यते। स्वानुभवसिद्धः बोध एव संवादकः।

'पश्य मृगो धावती'त्यत्रैकवाक्यत्वं मृगस्य धावनकर्मत्वञ्च भाष्ये व्युत्पादितम्। प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारे तद् द्वयमपि न सिद्धयति। महाभाष्यकारवचनमप्रमाणमित्यवगणनञ्च न युज्यते, अतः कथमत्र बोधः नैयायिकमत इति चेद्—

[1]प्रथमान्तार्थविशेषिताख्यातार्थधावनकृतेः कर्मतया दर्शनक्रि-यायामन्वयस्वीकारेण पदैकवाक्यत्वं, धावनस्य दर्शनकर्मत्वञ्चेत्यु-भयमपि सिद्धं भवति।

अत्र प्रथमान्तार्थः धावतीत्यख्यातार्थे आधेयतासम्बन्धेनान्वेति। क्वचित् प्रथमान्तार्थस्यापि विशेषणतयान्वयो व्युत्पत्तिवैचित्र्याद्। धावतीति धात्वर्थधावनमपि आख्यातार्थकृतावन्वेति। मृगान्वित-धावनविशिष्टकृतेः दृश्धात्वर्थे दर्शने कर्मतासम्बन्धेनान्वयः। मृगा-न्वितधावनविशिष्टकृतिकर्मकदर्शनस्य आख्यातार्थाश्रयत्वे, आश्रयत्वस्य चाध्याहृतत्वंपदार्थेऽन्वयः। तथा च 'मृगनिष्ठधावनकृतिकर्मकदर्श-नाश्रयस्त्वम्' इति 'पश्य मृगो धावती'त्यत्र शाब्दबोधः।

---

1 शा. त.

*24

अत्र मुख्यविशेष्यः त्वंपदार्थ एक एवेति एतदेकं वाक्यम् आख्यातार्थस्य दर्शनेऽन्वयाच्च पदैकवाक्यता। आख्यातार्थस्य कृतेरेव धात्वर्थे दर्शनेऽन्वयोपगमाद् न [1]नामार्थधात्वर्थयोरिति व्युत्पत्तिविरोधः। कर्मबोधकाख्यातोत्तरं द्वितीया शङ्कितुमपि न शक्यते। कृतेरतीन्द्रियत्वाद् धावनविशिष्टकृतेः दर्शनकर्मत्वमवगाहमानो बोधः 'सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्यबाधे' इति न्यायेन विशेषणीभूतधावनस्यैव दर्शनकर्मत्वे पर्यवस्यति। इत्थञ्च धावनस्य दर्शनकर्मत्वं महाभाष्योक्तमुपपद्यते।

वैयाकरणानां मतेऽपि 'आनय मृगो धावती'ति वाक्याद् मृगविशिष्टधावने आनयनकर्मत्वस्य बाधाद् सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्यबाधे' इति न्यायेनैव मृगविशिष्टधावनस्य बोधितमानयनकर्मत्वं मृगे पर्यवस्यतीति स्वीकर्तव्यम्। तथा च नैयायिकनये न कोऽपि दोषः। 'शृणु मेघो गर्जति' इत्यत्रापि 'मेघनिष्ठगर्जनकृतिकर्मकश्रवणाश्रयस्त्वम्' इत्येव बोधो वाच्यः।

'पचति भवति' इत्यत्र भवतीत्यस्य भवनाश्रयत्वमर्थः। तस्य 'पचती'ति पच्यर्थान्विताख्यातार्थकृतौ अन्वयः। 'भवनाश्रयः पाकानुकूलकृति'रिति बोधः। 'चैत्रः पचति भवती'त्यत्र तु कृते प्रथमान्तार्थे आश्रयतया अन्वयः। 'भवनाश्रयपाकानुकूलकृतिमांश्चैत्र' इति बोधः।

नैयायिकानां मते कृतेराख्यातार्थत्वाद् 'पचति व्रजती'ति प्रयोगापत्तिर्न सम्भवति। पाकानुकूलकृतेः व्रजनाश्रयत्वस्य बाधात्। येषां मते धात्वर्थविशेष्यः कर्ता तान् प्रत्येव 'पाककर्ता व्रजनाश्रय' इत्यर्थे पचति व्रजतीति प्रयोगापत्तिरापादयितुं शक्यते।

तस्माद् असति बाधके प्रायः प्रथमान्तार्थमुख्यविशेष्यक एव बोधः समुचितः।

---

1 'नामार्थधात्वर्थयोः परस्परं साक्षाद् भेदसम्बन्धेनानन्वयः। इति व्युत्पत्तिः।

चैत्रस्तण्डुलं पचतीत्यत्र तण्डुलपदोत्तरद्वितीयायाः कर्मत्वमर्थः। कर्मत्वञ्च क्रियाजन्यफलाश्रयत्वम्। तत्र क्रिया फलञ्च धातुत एवं लभ्यते। फलं व्यापारश्च धात्वर्थ इति सिद्धान्ताद्। 'क्रियाजन्यफलाश्रयत्व'मित्यत्र जन्यत्वं संसर्गतया भासते। तथा चाश्रयत्वमेव द्वितीयार्थं इति सिद्ध्यति। परन्त्वाश्रयत्वस्य द्वितीयार्थत्वे तस्य धात्वर्थे फले निरूपकतासम्बन्धेनान्वयो वाच्यः। निरूपकतासम्बन्धश्च वृत्यनियामकः। वृत्यनियामकसम्बन्धस्य अभावप्रतियोगितावच्छेदकत्वं नाङ्गीकुर्वन्ति। अतः 'तेमनं पचति न तण्डुलम्' इत्यादौ आश्रयत्वस्य द्वितीयार्थत्वस्वीकारे, निरुपकतासम्बन्धावच्छिन्नाश्रयत्वाभावः फले नञा बोधनीयः स्याद्। वृत्यनियामकस्याभावप्रतियोगितानवच्छेदकत्वाद् तन्न समीचीनः। अतः द्वितीयायाः आधेयत्वमर्थः।

तण्डुलपदोत्तराम्विभक्त्यर्थसङ्ख्या तण्डुलपदार्थे समवायसम्बन्धेनान्वेति। समवायेन साक्षात्सम्बन्धेनान्वितः तण्डुलपदार्थः निरूपितत्वसम्बन्धेन द्वितीयार्थे आधेयत्वेऽन्वेति। तादृशमाधेयत्वमाश्रयतासम्बन्धेन धात्वर्थे फलेऽन्वेति।

'चैत्रस्तण्डुलं पचती'त्यत्र पच्धात्वर्थः विक्लृत्तिः व्यापारश्च। तत्र फले विक्लृत्तौ द्वितीयार्थस्याधेयत्वस्याश्रयतासम्बन्धेनान्वयः। आश्रयतासम्बन्धस्य च वृत्तिनियामकत्वेन 'तेमनं पचति न तण्डुल' मित्यादौ अभावप्रतियोगितावच्छेदकत्वं सम्भवत्येव।

'पचती'त्यत्र 'ति' इत्याख्यातार्थः कृतिः, वर्तमानकालः, एकत्वसङ्ख्या च। तत्र कृतौ फलान्वितः व्यापारः [1]विषयत्वसहितानुकूलत्वसम्बन्धेनान्वेति। आख्यातार्थवर्तमानकालश्च व्युत्पत्तिवैचित्र्येण आख्यातार्थकृतावन्वेति। कृतिश्च प्रथमान्तार्थे चैत्रेऽन्वेति। आख्या-

---

1 'यत्नमात्रं शक्यं विषयत्वं जनकत्व वा संसर्गमर्यादया भासते' इत्याख्यातवाददीधितिपङ्क्तिः।

'वाकारः समुच्चयार्थः' इति मथुरानाथव्याख्यानपङ्क्तिश्चात्र श्री. सुब्रह्मण्यशास्त्रिमहोदयैरुद्ध्रियेते। (शा. त. पृष्ठम् २०१)

तार्थसङ्ख्या प्रथमान्तार्थे नान्वेति (इति [1] निष्कर्षानुसारिणां मतम् । तथा च चैत्रस्तण्डुलं पचतीत्यत्र 'तण्डुलनिरूपिताधेयताश्रयविक्लृत्तिजनकव्यापारानुकूलवर्तमानकालकृतिमानेकत्वविशिष्टश्चैत्र' इति 'चैत्रस्तण्डुलं पचती'त्यत्र शाब्दबोधः ।

'चैत्रेण पच्यते तण्डुल' इत्यत्र 'चैत्रेणे'ति तृतियायाः कृतिरर्थः । 'चैत्रपदार्थस्याधेयतासम्बन्धेन कृतावन्वयः । कृतिश्च धात्वर्थे व्यापारे जन्यत्वविषयत्वोभयसम्बन्धेनान्वेति । कृत्यन्वितः व्यापारः (कर्माख्यातस्थलनियन्त्रितव्युत्पत्तिवैचित्र्याद्) जन्यतासम्बन्धेन धात्वर्थे फलेऽन्वेति । तस्य चाख्यातार्थाश्रयत्वेऽन्वयः । आश्रयत्वस्य स्वरूपसम्बन्धेन प्रथमान्तार्थे तण्डुलेऽन्वयः । स्वरूपसम्बन्धश्च वृत्तिनियामक एवेति नञ्समभिव्याहारे तत्सम्बन्धावच्छिन्नतदभावबोधनं प्रथमान्तार्थे सङ्गच्छते । एवञ्च 'चैत्रेण पच्यते तण्डुल' इत्यत्र शाब्दबोधश्चेत्थम् — 'चैत्रनिष्ठकृतिजन्यव्यापारजन्यविक्लृत्याश्रयस्तण्डुल' इति ।

'चैत्रेण सुप्यते' इति भावाख्यातस्थले तु आख्यातः साधुत्वमात्रार्थः । न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः । भावाख्यातः भावे विहितः । भावश्च धातुना लभ्यते । सङ्ख्या च नात्र आख्यातार्थः । सङ्ख्यान्वयिनः अभावाद् । अतोऽत्र धात्वर्थमुख्यविशेष्यक एव बोधः । चैत्रेणेति तृतीयायाः कर्तृत्वं कृतिर्वा अर्थः । कृतेर्जन्यतासम्बन्धेन स्वापेऽन्वयः । चैत्रनिष्ठकृतिजन्यः स्वापः, चैत्रकर्तृकः स्वाप इति वा बोधः ।

'चैत्रो न पचती'त्यत्र नञर्थोऽभावः । पच्धात्वर्थः विक्लृत्यनुकूलव्यापारः । तस्याख्यातार्थे कृतौ, कृतेः नञर्थाभावे प्रतियोगितया, अभावस्य चाश्रयतया प्रथमान्तार्थेऽन्वयः । 'विक्लृत्यनुकूलव्यापारानुकूलकृत्यभाववान् चैत्र' इति शाब्दबोधः ।

'चैत्र एव पचती'त्यत्रैवकारस्य 'अन्यः' 'अभाव'श्चार्थः । अन्य इत्यस्य भेदविशिष्ट इत्यर्थः । प्रथमान्तार्थस्यैवकारार्थैकदेशे

---

1 व्युत्पत्तिवादे गदाधरभट्टाचार्याः ।

भेदेऽन्वयः। आख्यातार्थकृते एवकारार्थेऽभावे. अभावस्य एव-कारस्यापरस्मिन्नर्थे 'अन्यस्मिन्' चान्वयः। पाकानुकूलकृतिमांश्चैत्रः, पाकानुकूलकृत्यभाववान् चैत्रान्य इति शाब्दबोधः।

एवं त्रिष्वपि मतेषु, केषुचिद् वाक्यविशेषेषु जायमानान् शाब्दबोधप्रकाराः निर्दिष्टाः। एतेषु मीमांसकाः वैयाकरणाश्च स्वस्वदर्शनानाम् उपज्ञातृभिः निर्दिष्टया, सूचितया, ज्ञापितया वा रीत्या एव वाक्यार्थबोधप्रकारमङ्गीकुर्वन्ति। तत्र मीमांसकाः सम्बन्धसामान्यसंसर्गकशाब्दबोधानन्तरं प्रवृत्त्यादिनिर्वाहार्थं संसर्ग-विशेषावगाहि मानसबोधमङ्गीकुर्वन्ति। अतः एतन्मतमनुसृत्य शाब्दबोधाङ्गीकारे, शाब्दज्ञानानन्तरक्षणे प्रवृत्तिर्न स्याद् इति [1]प्रवृत्तेर्विलम्बं कल्पयितव्यम्। एवं तत्तद्विभक्तिबोध्यकर्तृत्वसम्प्रदान-त्वादीनां स्वनिरूपकधात्वर्थानुकूलत्वसम्बन्धेन भावनायामन्वय-स्वीकारेण धातूपस्थापितस्यैवार्थस्य अनेकधा परम्परासम्बन्धेन भानकल्पनं, सुबर्थसङ्ख्यायाः सुबर्थे परम्परयान्वय इत्येवंरीत्या, बोधस्य गुरुतरपरम्परासम्बन्धविषयकत्वकल्पनं च भवति। अत एतदपेक्षया तत्तदर्थे तत्तदर्थस्य साक्षात्सम्बन्धावगाही प्रथमान्तार्थ-मुख्यविशेष्यकबोधाङ्गीकार एव युक्ततरः। अनुभवसिद्धबोधानुसारेण व्युत्पत्तयः कल्प्यन्ते; न तु व्युत्पत्त्यनुसारेण बोधः शिक्ष्यते। अतः सुबर्थलिङ्गसङ्ख्याव्यतिरिक्त - प्रातिपदिकार्थव्यतिरिक्तप्रकारकशाब्द-बोधं प्रति भावनाविशेष्यतासम्बन्धेन लिङ्गानन्वयिपदजन्योपस्थितिः कारणमित्यनुगतेन कार्यकारणभावेन 'प्रातिपदिकार्थव्यतिरिक्तः सुबर्थलिङ्गसङ्ख्याव्यतिरिक्तश्च सर्वोऽपि भावनायामन्वेती'त्यस्या व्युत्पत्तेः संरक्षणार्थं परम्परासम्बन्धेन विभक्त्यर्थकर्मत्वादीनां भावनायामन्वयो न समीचीनः।

प्राचीनवैयाकरणमतेऽपि व्यापारमुख्यविशेष्यकबोधस्वीकाराद् कर्तरिप्रयोगे कर्मणिप्रयोगे च बोधाकारः समानः।

अतः सति सम्भवे प्रथमान्तपदसमभिव्याहारे प्रथमान्तार्थ-मुख्यविशेष्यक एव बोधः। न हि वाक्ये प्रथमान्ताः सर्वे मुख्य-

---

1 श. त.

विशेष्यतया भासत्ते इति तैरङ्गीक्रियते। क्वचित् निपातार्थमुख्य-विशेष्यक एव बोधः। भावाख्यातस्थले धात्वर्थमुख्यविशेष्यक एव बोधः। क्वचिच्च आख्यातार्थमुख्यविशेष्यको बोधः। एवञ्चानुभवानुरोधेव तत्तत्स्थलेषु धात्वर्थमुख्यविशेष्यत्वम्। आख्यातार्थमुख्यविशेष्यत्वं निपातार्थमुख्यविशेष्यत्वञ्चाङ्गीकुर्वतां तेषां प्रथमान्तपदसमभिव्याहारे प्रायः प्रथमान्तार्थमुख्यविशेष्यकबोधोऽभिमतः। अनुभवानुरोधित्वाद् युक्त्यनुसारित्वाच्चायं पक्षस्स्वीकार्यः ॥

## उपसंहार :

आशयविनिमयार्थं भाषा कथमुपकरोतीति विषयमधिकृत्य प्रस्तावो नावश्यकः। आशयविनिमये भाषायाः प्रामुख्यं सर्वैरङ्गीकृतम्। असिद्धमेव साधयितव्यम्। सिद्धसाधनं दोषायैव। अतो भाषाया प्राधान्यसंस्थापनाय प्रयत्नो नावश्यकः।

यत्र यत्र भाषाया उपयोगो वर्तते, तत्र सर्वत्रापि शाब्दबोधविचारः प्रसक्त एव। पदं, पदार्थं, वाक्यं, वाक्यार्थम् इत्यादीन्यधिकृत्य सुविशदं पठनम् इदानीमपि परिष्कृतराज्येषु क्रियते। भारते तु अतिपुरातनकाल एव एतादृशविषये चिन्ता आसीद्।

शाब्दचिन्तापद्धतौ निरताः मुख्यतया वैयाकरणाः, मीमांसकाः नैयायिकाश्चासन्। तैर्विरचितेष्वनेकेषु ग्रन्थषु भारतीयशाब्दचिन्ता विस्तृता वर्तते।

अतः 'शब्दप्रमाणविचार'रूपेऽस्मिन् प्रबन्धे प्रायः शब्दानामाशयबोधनप्रकारे भिन्नाभिप्रायवतामेषां वैयाकरणमीमांसकनैयायिकानां मतानि स्वीकृत्य प्रदर्शितानि। पुरातनभारते शब्दप्रमाणविचारः कीदृश आसीदित्यत्र केवलमन्वेषणपरोऽयं पठनप्रबन्धः।

## उपयुक्तग्रन्थसूची

**संस्कृतग्रन्थाः**

अष्टाध्यायी सूत्रपाठः - पाणिनिमुनिप्रणीतः
काव्यप्रकाशः - श्रीमम्मटभट्टविरचितः
तर्कभाषा - केशवमिश्ररचिता
तर्कभाषाप्रकाशिका - चिन्नं (चेन्न) भट्टविरचिता

तर्कसंग्रहः

अन्नंभट्टविरचितः, गोवर्धनमिश्रकृतन्यायबोधिन्या, मेरुशास्त्रिकृतवाक्यवृत्या जगन्नाथशास्त्रिकृतनिरुक्त्या पट्टाभिराम-शास्त्रिकृतटिप्पण्या, तथा रामरुद्रकृतरामरुद्रीय - राय नरसिंहशास्त्रिकृत नृसिंहप्रकाशिका - नीलकण्ठशास्त्रि कृत-नीलकण्ठप्रकाशिका - पट्टाभिरामशास्त्रिकृतपट्टभिरामशास्त्र-प्रकाशिकेति व्याख्याचतुष्टयसमुपेतस्वोपज्ञतर्कसंग्रहदीपिकया च समुपबृंहितः ।

न्यायदर्शनम् -

(वात्स्यायनभाष्यसंवलितम्) सम्पादकः स्वामी द्वारिका-दासशास्त्री

न्यायदर्शनविमर्शः

कालीप्रसादसिंहकृतः, संस्कृतबुक् डिप्पो (प्र) लिः २८/१ विधान सरणी, कलिकात्ता ६

न्यायबिन्दुः

आचार्यधर्मकीर्तिविरचितः, धर्मोत्तराचार्यविरचितव्याख्यासमेतः

न्यायमीमांसादर्शनयोः प्रमाणविचारः

डो. एस्. बी. रघुनाथाचार्यकृतः

न्यायमञ्जरी
श्री जयन्तभट्टविरचिता, संपादकग्रथितसौरभाख्यटिप्पणी समन्विता। सम्पादकः विद्वान् के. एस्. वरदाचार्यः।

न्यायवार्तिकम्
उद्योतकरविरचितम्, पण्डितविन्ध्येश्वरीप्रसादद्विवेदिना सम्पादितम्।

न्यायसिद्धान्तमुक्तावली
श्रीविश्वनाथभट्टाचार्यविरचिता, श्रीमहादेवभट्टारब्धेन श्री दिनकरभट्टप्रपूरितेन प्रकाश (दिनकरी) व्याख्यानेन तदुपरि श्रीरामरुद्रभट्टाचार्यारब्धया पण्डितराज श्रीराजेश्वरशास्त्रि प्रपूरितया तरङ्गिणी (रामरुद्री) टीकया सहिता

तत्त्वचिन्तामणिः
(शब्दाख्यतुरीयखण्डम्) श्रीगङ्गेशोपाध्यायविरचितम्

प्रमाणलक्षणम्
सर्वज्ञात्ममुनिकृतम्

प्रमाणवार्तिकम्
आचार्यधर्मकीर्तिविरचितम् आचार्यमनोरथनन्दिकृतवृत्तिनामक व्याख्यासहितम्

भाट्टचिन्तामणिः
भट्टकुलावतंसमहामहोपाध्याय श्रीगागाभट्टेतिप्रसिद्धनामधेय श्रीविश्वेश्वरसुधीविरचितः

मणिदर्पणः
(शब्दपरिच्छेदः) श्रीराजचूडामणिमखिकृतः, संस्कृतग्रन्थ-प्रकाशनकार्याध्यक्षेण त. गणपतिशास्त्रिणा संशोधितः

मीमांसाश्लोकवार्तिकम्
श्रीमत्कुमारिलभट्टपादविरचितम्, श्रीपार्थसारथिमिश्रप्रणीतया न्यायरत्नाकराख्यया व्याख्यया समलंकृतम्

रसगङ्गाधरः

महाकवि श्री जगन्नाथपण्डितराजविरचितो नागेशभट्टकृत-टीकया च सहितः

वाक्यपदीयम्

भर्तृहरिप्रणीतम्, हेलाराजविरचितया प्रकाशव्याख्यया पण्डित-रघुनाथशर्मणा विरचितया अम्बाकर्त्रीव्याख्यया समलङ्कृतम्।

वैयाकरणसिद्धान्तकौमुदी

म. म. श्रीभट्टोजिदीक्षितविरचिता

वैयाकरणसिद्धान्तलघुमञ्जूषा

नागेशभट्टविरचिता, सभापतिशर्मोपाध्यायकृतरत्नप्रभाख्य व्याख्योपेता

वैयाकरणभूषणसारः

श्रीमत्कौण्डभट्टविरचितः, प्रभादर्पणाख्यव्याख्याद्वयोपेतः

वैशेषिकसूत्रोपस्कारः – श्रीशङ्करमिश्रकृतः

व्याकरणमहाभाष्यम् – श्रीपतञ्जलिमहर्षिप्रणीतम्

व्युत्पत्तिवादः

श्रीगदाधरभट्टाचार्यविरचितः, गूढार्थतत्त्वालोकाख्यव्याख्या सहितः।

शक्तिवादः

नैयायिकचक्रचूडामणि श्रीगदाधरभट्टाचार्यप्रणीतः पण्डित प्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिव्याख्यया सहितः।

शब्दशक्तिप्रकाशिका

श्रीमज्जगदीशतर्कालङ्कारभट्टाचार्यविरचिता श्रीकृष्णकान्त विद्यावागीशविनिर्मितया कृष्णकान्तटीकया श्रीमद्रामभद्रसिद्धान्तवागीशविरचितया बहुव्रीहिसमासान्तया प्रबोधिनी व्याख्यया न्यायोपाध्याय पण्डितय ढुंढिराजशास्त्रिणा कृतया विषमस्थलटिप्पण्या च स्वलंकृता

शब्दतरङ्गिणी

पण्डितराजशास्त्ररत्नाकर वे. सुब्रह्मण्यशास्त्रिणा विरचिता

सर्वदर्शनसंग्रहः

श्रीमाधवाचार्यप्रणीतः

सुबोधिनी

महामहिमदर्शनकलानिधि रामवर्मपरीक्षिद्गोश्रीमहाराजविरचिता

स्फोटसिद्धिः

मण्डनमिश्रविरचिता

## English Books

Indian Theories of Meaning

by Dr. K. Kunjunni Raja, The Adyar Library And Research Centre.

Inference in Indian And Western Logic

by Dr. Birendra Kumar Bhattacharya, Sanskrit Pustak Bhandar, Calcutta.

Navya Nyaya :

Some Logical Problems in Historical Perspective by Dr Gopikamohan Bhattacharya, Bharatiya Vidya Prakashan, Varanasi.

The Philosophy of Nyaya - Vaiśesika And Its conflict With The Buddhist Dignaga School.

by Dharmendra Nath Sastri

The Vaisesika Sutras Sutras of Kanada With The Commentary of Śankara Miśra And Extracts From the Gloss of Jayanarayana.

Translated by

Nandala Sinha
S.N. Publications, Kamala Nagar
Delhi - 110007

## S'abdapramāṇa vicāra by Dr. T.Arya Devi

*This book deals with the means of valid knowledge in general and the concept of s'ābda as a means of valid knowledge with special consideration.*

*It presents the differences of opinion in the various systems of Indian Philosophies like Mimamsa, Nyaya and vya'karana in the field of sabdaboda ............*

"S'abdapramāṇa vicāra is an excellent Sanskrit work on S'abdapramana according to the Nyaya school, giving a lucid and faithful expression of the various aspects of the Nyaya theory on S'abdapramana. It is a worthy successor of the S'abdatarangini by the late Veppathur Subrahmanya S'astri."

DR. K.KUNJUNNI RAJA

"I appreciate this meritorious work which is a faithful approachment and thorough study, of different s'astras like Nyaya', Vyakarana and Mimamsa. The deep knowledge of the author in different sastras especially in Navyanyaya is highly appreciable."

DR. M.S. MENON

**SAPARYA PUBLICATIONS**
**THRISSUR - 680 004**

Rs.150/-

# ŚABDAPRAMĀṆA VICĀRA



**Dr. T.ARYADEVI**

Indic Digital Archive Foundation
gpura.org